॥ श्रीः ॥

श्रीकुमारमणीतं

शिल्परत्नम् ।

(पूर्वो भागः ।)

मायावैभवकल्पिता गुणमया +++++++
जीवौघास्तदधिष्ठिताश्च विविधा यत्संस्थिता यन्मयाः ।
आत्मानं परमं तमौपनिषदैर्वाक्यैः सदा स्वस्तिकै-
रन्विष्टं भुवनैकनाथममलं वन्दे विरिञ्चाधिपम् ॥ १ ॥

पारुष्याङ्को येन चादौ युगानां
वास्या तष्ट्वा स्निग्धतां प्रापितोऽर्कः ।
नित्यं देवैरर्चितो विश्वकर्मा
सोऽयं भूयात् सर्वलोकोदयाय ॥ २ ॥

त्रिपुरपुरत्रयरचना यत्करयोः कर्मचातुरी जाता ।
शिल्पिवरं तं दनुजैरर्चितचरणं मयं वन्दे ॥ ३ ॥

नानाविशालगणितागमशिल्पशास्त्रा-
द्युत्पत्तिमुख्यभुवमद्भुतविक्रमाढ्याम् ।
सेतूर्ध्वकाननविवा(स)कृताधिवासां
वन्दे षडाननवतीं परदेवतां मे ॥ ४ ॥

(धौ?म)न्ये मतङ्गभृगुकाश्यपकुम्भजात-
मुख्या मुनीन्द्रपतयो मम सुप्रसन्नाः ।

---

१. 'य' ख. पाठः.

शिल्पागमाम्बुनिधिपारगता मदीय-
चित्तप्रबोधनकरा गुरवोऽप्यमेयाः ॥ ५ ॥
सम्पूज्यते सदसि भार्गवसृष्टभूमा-
गेऽस्मिन् बुधैः सकलशिल्पकथासु योऽसौ ।
तं मे नमामि पितरं भृगुवंशजातं
शश्वत्स्वपुत्रहितपूरणजागरूकम् ॥ ६ ॥

ब्राह्मं क्षात्रं च तेजोऽप्यहमहमिकया वर्णिते यत्र वीरे
तस्य श्रीदेवनारायणधरणिपतेराज्ञयाज्ञाकरोऽहम् ।
मन्दोऽप्यत्यन्तमोहादतिविपुलतरेभ्योऽथ पूर्वागमेभ्यः
संक्षिप्तं शिल्परत्नं प्रलिखितुमधुना प्रक्रमे तत्क्रमेण ॥ ७ ॥

आचार्यलक्षणं पूर्वं मानसाधनलक्षणम् ।
पश्चाद् (भूलक्षणं चैव) भूपरिग्रहमेव च ॥ ८ ॥
ग्रामादीनां लक्षणं च पदविन्यासलक्षणम् ।
वास्तुपूजाक्रमं तत्र ग्रामादेर्द्वारलक्षणम् ॥ ९ ॥
तत्र देवालयस्थानं परं खातविधिक्रमम् ।
शङ्कुना दिक्परिज्ञानं गर्भन्यासं ततः परम् ॥ १० ॥
वास्तु(कर्म)विधानं च साधनानां च लक्षणम् ।
आयादिलक्षणं पश्चात् पश्चात् प्रासादलक्षणम् ॥ ११ ॥
पादाधिष्ठाननियममुपपीठस्य लक्षणम् ।
आद्यङ्गलक्षणं नाललक्षणं भित्तिलक्षणम् ॥ १२ ॥
+ + + + + + भित्तिभूषाः सर्वस्वलक्षणम् (?) ।
द्वाराणां लक्षणं पश्चात् तोरणानां च लक्षणम् ॥ १३ ॥

जालस्य लक्षणं कूटगोष्ठादीनां च लक्षणम् ।
पञ्जराचरणं वृत्तस्फुटितस्य तु लक्षणम् ॥ १४ ॥
पश्चात् कुम्भलताचारमुत्तराणां च लक्षणम् ।
प्रस्तरस्य गलस्यापि शिखरस्य च लक्षणम् ॥ १५ ॥
लुपाया लक्षणं पश्चात्तत्र मूर्ध्नेष्टकाविधिम् ।
नासिकालक्षणं स्तूपिलक्षणं शान्तिकादिकम् ॥ १६ ॥
वृत्ताष्टाश्रपडश्रादिप्रासादाकारलक्षणम् ।
मण्डपस्य विधिं पञ्चप्राकारं गोपुरं ततः ॥ १७ ॥
परिवारविधिं पश्चान्महापीठस्य लक्षणम् ।
ध्वजस्य लक्षणं सन्धिलक्षणं चित्रलक्षणम् ॥ १८ ॥
प्रत्येकं क्रमतः प्रोक्त्वा पूर्वभागे भवन्त्यति ।
षट्चत्वारिंशदध्यायाः शिल्परत्नाख्यसंग्रहे ॥ १९ ॥
अथातो बिम्बलिङ्गादिसाधनस्वीकृतिक्रमः ।
लिङ्गस्य लक्षणं पश्चाल्लिङ्गलक्षणलक्षणम् ॥ २० ॥
बिम्बायामविधिं पश्चादुत्तमं दशतालकम् ।
मध्यमं दशतालं चाप्यधमं दशतालकम् ॥ २१ ॥
उत्तमं नवतालं च मध्यमं नवतालकम् ।
अधमं नवतालं चाप्यष्टतालस्य लक्षणम् ॥ २२ ॥
सप्ततालं च षट्तालं पञ्चतालं तथैव च ।
चतुस्तालं ततः पश्चाद् भूषायुधविधिं पुनः ॥ २३ ॥
शूलसंस्थापनं पश्चाद् रज्जुबन्धक्रमं पुनः ।
मृल्लेपनं तथा देवीलक्षणं वाहलक्षणम् ॥ २४ ॥

(कि)ञ्च शैवप्रकरणं वैष्णवं शक्तिमार्गजम् ।
ध्यानं च बिम्बदोषं च पीठलक्षणमेव च ॥ २५ ॥
प्रतिष्ठायाः क्रमं पश्चाज्जीर्णोद्धारं ततः परम् ।
लिङ्गप्रासादकरणं मानुपालयलक्षणम् ॥ २६ ॥
कूपप्रश्नं ततः पश्चादासनादिपरिच्छदम् ।
कर्मकारजनस्यास्य वेतनाकल्पनक्रमम् ॥ २७ ॥
क्षुरिकालक्षणं पञ्चत्रिंशदन्ताध्यायसमन्वितम् ।
भवेत् तदुत्तरं भागं सज्जनेभ्यो नमो नमः ॥ २८ ॥

अत्र पूर्वमाचार्यलक्षणम् ।

ग्रामादिकं वा नृगृहादिकं वा
वाप्यादिकं वा विबुधालयं वा ।
यः कर्तुमिच्छत्यथ संवृतं ते-
नस्याद्गुरुशिल्पिरेतदर्थम् (?) ॥ २९ ॥

विप्रः कुलीनः कृतसंस्क्रियौघः
स्वधीतवेदागमतत्त्ववेत्ता ।
वर्णाश्रमाचारपरोऽधिदीक्षो
दक्षस्तपस्वी गुरुरास्तिकोऽस्तु ॥ ३० ॥

पूर्वं स्थपतिरिष्टव्यः शिल्पशास्त्रविशारदः ।
तथैव शिल्पशास्त्रज्ञो युक्तः स्वाचार्यलक्षणैः ॥ ३१ ॥
स्थापकोऽपि वृतः कर्त्रा वास्तुकर्म समाचरेत् ।
ताभ्यामुभाभ्यां प्रारब्धं विमानं वान्यदेव वा ॥ ३२ ॥

निष्पाद्यमा समाप्तेः स्यात् ताभ्यामेव हि नेतरैः ।
तयोरभावे तत्पुत्रैः शिष्यैर्वा कर्मतत्परैः ॥ ३३ ॥

अथ शिल्पिलक्षणम् ।

स्थपतिः स्थापनार्हः स्यात् सर्वशास्त्रविशारदः ।
न हीनाङ्गोऽतिरिक्ताङ्गो धार्मिकस्तु दयापरः ॥ ३४ ॥
अमात्सर्योऽनसूयश्च तान्त्रिकः स्वभिजातवान् ।
गणितज्ञः पुराणज्ञ आनन्दश्चाप्यलुब्धकः ॥ ३५ ॥
चित्रज्ञः सर्वदेशज्ञः सत्यवादी जितेन्द्रियः ।
अरोगी चाप्रमादी च सप्तव्यसनवर्जितः ॥ ३६ ॥
सुनामा दृढबन्धुश्च वास्तुविद्याब्धिपारगः ।
स्थपतेस्तस्य शिष्यो वा सूत्रग्राही सुतोऽथवा ॥ ३७ ॥
स्थपत्याज्ञा(नधारी ? नुरोधी) च सर्वकर्मविशारदः ।
सूत्रदण्डप्रमाणज्ञो मानोन्मानप्रमाणवित् ॥ ३८ ॥
तक्षणात् स्थूलसूक्ष्माणां तक्षकः स तु कीर्तितः ।
मृत्कर्मज्ञो गुणी शक्तः सर्वकर्मस्वतन्त्रकः ॥ ३९ ॥
गुरुभक्तः सदा हृष्टः स्थपत्याद्यनुगः सदा ।
तक्षितानां तक्षकेणाप्युपर्युपरि युक्तितः ॥ ४० ॥
वृद्धिकृद् वर्धकिः प्रोक्तः सूत्रग्राह्यनुगः सदा ।
एभिर्विनापि सर्वेषां कर्म कर्तुं न शक्यते ॥ ४१ ॥
तस्मादेष सदा पूज्यः स्थपत्यादिचतुष्टयः ॥ ४१½ ॥

इति शिल्परत्ने गुर्वादिलक्षणं नाम
प्रथमोऽध्यायः ।

अथ द्वितीयोऽध्यायः ।

अथ मानसाधनम् ।

परमाणुरिति प्रोक्तो योगिनां दृष्टिगोचरः ।
त्रसरेणुरष्टभिः स्यात् तैरेव परमाणुभिः ॥ १ ॥

तदष्टभिस्तु बालाग्रं लीक्षा बालाग्रकाष्टभिः[1] ।
लीक्षाष्टभिस्तु जूका स्याज्जूकाष्टगुणितो यवः ॥ २ ॥

यवोदरैः षड्गुणैर्वा सप्तभिर्[2]वाधमादिकम् ।
क्रमादष्टगुणैर्वाथ मानाङ्गुलमिति स्मृतम् ॥ ३ ॥

श्वेतशाली महाशाली रक्तशाली तथैव च ।
सौगन्धिशेमराली च शाली पञ्चविधा स्मृता ॥ ४ ॥

क्षुण्णे सिता स्मृता शाली रक्तो व्रीहिरुदाहृतः ।
तासामुदरविस्तारैरपि मानाङ्गुलं स्मृतम् ॥ ५ ॥

शाल्यायतैस्त्रिभिस्तैश्च सार्धैस्तैर्वेदसम्मितैः ।
मानाङ्गुलो नचाप्येव कनिष्ठादीनि कल्पयेत् ॥ ६ ॥

र(व)शाल्यायतं तेषु द्विगुणं वा त्रिमात्रकम् ।
चतुस्त्रिंशद्विधं दुष्टमेवं मानाङ्गुलं बुधैः ॥ ७ ॥

तन्मूर्तुदक्षिणकरमध्यमामध्यपर्वणः(?) ।
दैर्घ्यं मात्राङ्गुलं श्रेष्ठं नीचं तद्व्याससम्मितम् ॥ ८ ॥

इत्थं गात्राङ्गुलं शिल्पशास्त्रज्ञैरीरितं द्विधा ।
अङ्गुलत्रितया मुष्टिर्वितस्तिर्द्वादशाङ्गुलिः ॥ ९ ॥

---

१. 'ष्टकाग्रभि', २. 'मै' क. पाठः.

तद्वयं हस्तमुद्दिष्टं तच्च किष्कुरिति स्मृतम्।
एकैकाङ्गुलवृद्ध्यातो भवन्त्यष्टौ कराः स्फुटम् ॥ १० ॥
प्राजापत्यं धनुर्मुष्टिश्चापग्रहमतः परम्।
प्राच्यां वैदेहकं नाम्ना वैपुल्यं च प्रकीर्तितम् ॥ ११ ॥
इत्थमेकोत्तरत्रिंशदङ्गुलान्ताः कराः स्मृताः।
एवं त्वशीतिसंयुक्तद्विशतं करभेदकम् ॥ १२ ॥

हस्तैश्चतुर्भिर्भवतीह दण्डो नीचोत्तमः पञ्चभिरेव हस्तैः।
सार्धाब्धिहस्तैरथ मध्यमोऽयं क्रोशः सहस्रद्वितयेन तेषाम् ॥
स्याद् योजनं क्रोशचतुष्टयेन तथा कराणां दशकेन वंशः।
निवर्तनं विंशतिसंख्यवंशैस्तयैव रज्जुर्गजदण्डदीर्घः ॥

आ सन्धेर्बद्धमुष्टिस्तु करोऽरत्नि(तिरत्नि)रुदाहृतः।
स एवारणिरुद्दिष्टास्याष्टौ चेदाकनिष्ठिका ॥ १५ ॥
प्रादेशतालगोकर्णवितस्त्यः स्युर्यथाक्रमम्।
तर्जन्यादिकनिष्ठान्तमङ्गुष्ठाग्राद् प्रसारिताः ॥ १६ ॥

मानाङ्गुलैः केवलमेव कुर्याद् देवालयादीनि गृहाणि वा नृणाम्
कुण्डादिकानामथ मण्डलानां सर्वत्र मात्राङ्गुलमिष्यते बुधैः ॥

याने च शयने [illegible]कुः प्राजापत्यं विमानके।
आरामोद्यानकादौ[1] तु प्राजापत्यकरं स्मृतम् ॥ १८ ॥
वास्तूनां च धनुर्मुष्टिर्ग्रामादीनामियं तु वा।
वापीकूपादिमार्गादौ ग्रामादीनां धनुर्ग्रहम् ॥ १९ ॥
विप्रादीनां करौ द्वौ द्वौ प्रकीर्णकधनुर्ग्रहौ।
वैपुल्यचापमुष्ट्याख्यौ स्यातां भवनमापने ॥ २० ॥

---

१. 'तीष्टक' क. पाठः.

प्राजापत्याख्यवैदेहौ किष्कुप्राच्यौ च तत्क्रमात् ।
सर्वेषां सर्ववस्तूनां किष्कुरेवाथवा मतः ॥ २१ ॥
धनुर्ग्रहप्रकीर्णाद्या द्विजानां गृहमापने ।
वैपुल्यं च धनुर्मुष्टिः क्षत्रियाणां विशेषतः ॥ २२ ॥
प्राजापत्यं च वैदेहं वैश्यजात्यार्हकं स्मृतम् ।
किष्कुप्राच्यककूचैव शूद्राणामिति केचन(?) ॥ २३ ॥
दण्डेन तद्ग्रामनिवेशनाद्यं पुराणि खेटं निगमं च कुर्यात् ।
हस्तेन वेश्मादिषु मानमुक्तं स्वल्पेषु चेदङ्गुलकैर्यवैर्वा ॥ २४ ॥
मुष्टिः स्याद् यज्ञपात्रादौ वितस्तिर्वस्त्रकादिषु ।
तालं बिम्बादिके माने भवेत्तद्धर्मि (?) तद्विधौ ॥ २५ ॥

इति शिल्परत्ने मानसाधनकथनं नाम
द्वितीयोऽध्यायः ।

तृतीयोऽध्यायः ।

अथ भूमिलक्षणम् ।

गोमर्त्यैः फलपुष्पदुग्धतरुभिश्चाढ्या समा प्राक्प्लवा
स्निग्धा धीररवा प्रदक्षिणजलोपेताशुबीजोद्गमा ।
सा प्रोक्ता बहुपांसुरक्षयजला तुल्या च शीतोष्णयोः
श्रेष्ठा भूरधमा समुक्तविपरीता मिश्रिता मध्यमा ॥ १ ॥
वृत्तार्धेन्दुनिभा त्रिपञ्चरसकोणा शूलशूर्पाकृति-
र्मर्त्यानेकपकूर्मपृष्ठकपिलावक्त्रोपमा मेदिनी ।
भस्माङ्गारतुषारिथकेशचितिवल्मीकादिभिः संयुता
वर्ज्या मध्यनता सगर्भकुहरा विस्रा विदिक्स्थापि च ॥ २ ॥

पङ्कक्लिन्ना रविकरहता वातनाकीटजुष्टा (?)
तोयाभावा विपतरुयुता कण्टकैरन्विता वा ।
पैशाचाढ्या यमपिशितभुग्वह्निदिक्षु स्वभावा-
न्निम्ना भू(रिव?मि)र्नवगृहविधौ निन्दिता शर्कराढ्या ॥ ३ ॥
पूर्णा सुपद्मा च तथैव भद्रा धूम्रा च भूमिर्विहिता चतुर्धा ।
वक्ष्ये च तासामपि लक्षणानि संक्षेपतो भूमिपरिग्रहार्थम् ॥ ४ ।
प्लक्षन्यग्रोधनिम्बार्जुनवकुलकुलस्था(प?स)नाशोकनिष्पा-
वाङ्कोलैर्मालतीचम्पकतिलखदिरैः कोद्रवैर्मुद्रिता वा ।
भूमिर्या भूधराधीश्वरशिखरगता पार्श्वसंस्थाथवाद्रेः
पूर्णा सा पुष्टिदात्री सुरनिलयसमा कल्पने स्वल्पतोया ॥ ५
कर्पूरागरुनालिकेरतिलकैर्दर्भैः कदम्बार्जुनै-
र्मालेयैः क्रमुकेक्षुकेतककुशैः कुन्दारविन्दोत्पलैः ।
पूर्वोदक्प्लवशालिनी बहुजला वा या दरीदृश्यते
सेयं शान्तिकरी सुरेशयजने सूक्ता सुपद्मा मही ॥ ६ ॥
तीरं वारिनिधेः श्रिताथ सरितस्तीर्थस्य वा दक्षिणे
व्रीहिक्षेत्रविचित्रिताप्यदिशि यज्ञार्हाङ्घ्रिपैरङ्किता ।
कीर्णा पुष्पफलप्रवालतरुभिर्योयानहृद्यापि वा
भद्रा सा परिगीयते वसुमती प्रीतिप्रदा यज्वनाम् ॥ ७ ॥
अर्कैर्वेणुविभीतकैः स्नुहियुतैः श्लेष्मातकैः पीलुभिः
संकीर्णा बहुशर्करा च कठिना गर्भान्विता सोषरा ।

---

१. 'वृ' ख. पाठः.

गृध्रश्येनवराहवायसशिवाशाखामृगैः सन्ततं
जुष्टा यष्टुरनिष्टदा निगदिता धूम्रा मही सूरिभिः ॥ ८ ॥
वारुण्यैन्द्री तथाग्नेयी वायवी भूश्चतुर्विधा ।
तद्भवा च शिला ज्ञेया तन्नामा शुभदा शुभा ॥ ९ ॥
या कोमलतरुव्राता स्वतः पुष्पितकानना ।
जलाशयैश्च सर्वत्र युक्ता भूर्वारुणी स्मृता ॥ १० ॥
या क्षीरवृक्षबहुला सौम्ये यस्या जलं महत् ।
व्रीहिक्षेत्रं च याम्यायां सा माहेन्द्री क्षितिः स्मृता ॥ ११ ॥
गृध्रकङ्कवराहर्क्षश्येनगोमायुवायसैः ।
संयुक्ता दूरपानीया भूराग्नेयी विनिन्दिता ॥ १२ ॥
अक्षस्नुहिकलिङ्गार्कपीलुश्लेष्मातकण्टकैः ।
युक्ता या निर्जला भूमिरशुभा वायवी स्मृता ॥ १३ ॥
विप्रादिक्रमतः कुशेषुवनदूर्वाकाशयुक्ता भुव-
स्तुल्यातानवितानसिन्धुररसाब्ध्यंशाधिदीर्घा अपि ।
श्वेतापाटलपीतमेचकरुचश्चाज्यासृगन्नासवा-
मोदाः स्वादुकषायतिक्तकटुकास्वादान्विताश्च स्मृताः ॥
अलाभे धवलरम्याया सर्ववर्णहितावहा ।
तथैव प्राक्प्लवा भूमिः सुगन्धा मधुरान्विता ॥ १५ ॥
सङ्कीर्णरूपा वसुधात्र वर्णैर्गन्धै रसैश्चाखिलवर्जनीया ।
एनामनालक्षितवर्णचिह्नां नक्तं परीक्षेत निमित्ततश्च ॥
क्ष्मां खात्वामघटं निधाय भृतधान्यं वर्धमानं मुखे
कृत्वासिच्य घृतं दिशासु सितरक्तापीतकृष्णा दशाः ।

विप्रादिक्रमतः प्रदीप्य विधिवन्नीते मुहूर्ते ज्वलेद्
वर्तिर्यस्य धरास्य तासु सकलास्विच्छासु सर्वोचिता ॥ १७ ॥

परेषामपरा शास्ता(त्व?)परेषां न परा धरा।
सर्वा मही प्रशस्ता स्याद् देवानां तद्विशेषतः ॥ १८ ॥

तत् खातं वा जलापूर्णं कृत्वा शतपदं व्रजेत्।
पुनरागच्छतः प्राग्वत् पूर्णं चेद् भूमिरुत्तमा ॥ १९ ॥

यवन्यूना मध्यमा स्यात् त्याज्या न्यूना ततोऽधिकम्।
न्यग्रोधोदुम्बराश्वत्थप्लक्षाः पूर्वादिगाः शुभाः ॥ २० ॥

अश्वत्थः पूर्वतो धन्यो दक्षिणे चाप्युदुम्बरः।
न्यग्रोधः पश्चिमे प्लक्षोऽप्युत्तरेति परे जगुः ॥ २१ ॥

पूर्वाद्युदुम्बराश्वत्थप्लक्षन्यग्रोधकास्तु वा।
सर्वत्र केसराच्चूताः पुन्नागा नागडाडिमाः ॥ २२ ॥

पनसाश्चम्पकाः पूगा नालिकेराश्च शोभनाः ॥ २२½ ॥

पनसः प्राच्यां श्रेष्ठः क्रमुको याम्येऽथ पश्चिमे केरः।
सौम्ये चूतो धन्यो नागस्तत्रैव केसरः प्राच्याम् ॥ २३½ ॥

तिन्त्रिणिरुदिता याम्ये छत्रिश्रेष्ठे हि पश्चिमे भागे।
अन्तस्सारा वृक्षा यदि सन्ति ह्यन्तरेव सन्त्वपि ते ॥ २४½ ॥

ये सन्ति त्वचिसारास्तेऽपि च सन्त्वेव सर्वतो[1] बाह्ये।
सकलं सारं येषां ते वृक्षाः सर्वदिक्षु युज्यन्ताम् ॥ २५½ ॥

वृक्षा निस्साराश्चेत् तेषां क्षेत्रेषु वर्तनं नेष्टम्।
हाटकतरुरपि नेष्टो मन्दिरसविधेऽपि तारितं यस्मात् ॥ २६½ ॥

---

[1] क

तस्मात् सर्वे वृक्षाः सर्वदिगन्ते विनिन्दितास्ते स्युः ॥ २७ ॥

गोवह्निप्रेतभूताम्बुनागेभधनसंज्ञिताः ।
वीथ्यः ग्रामादिनीचत्वाद् ज्ञेया निखिलभूमिषु ॥ २८ ॥

इन्द्राग्न्योरन्तराद्यन्तरालनीचवशात् क्रमात् ।
पैतामहापधाख्यौ च श्मशानं रोगवर्धनम् ॥ २९ ॥

आसुरं प्रथमं पुण्यं दीर्घायुश्चेति वीथयः ।
इन्द्रोन्नतं पुत्रनाशं वह्न्युन्नतमधार्थदम् ॥ ३० ॥

याम्योन्नतमरोगं तु स्त्रीप्रदं राक्षसोन्नतम् ।
तत्र लाभं वारुणोच्चं वायूच्चं धननाशनम् ॥ ३१ ॥

सौम्योच्चं रोगदं विद्यादीशानोच्चं महागदम् ।
दद्युस्ते त्वन्तराख्याः स्वनामसदृशं फलम् ॥ ३२ ॥

प्राच्यां निषिद्धो हि गि(रि:) तच्छायाप्युदये रवेः ।
यत्रापतति तत्रापि ग्रामाद्यं न प्रशस्यते ॥ ३३ ॥

ग्राह्या तु चोत्तमा मध्या गर्हिता कन्यसा मही ॥ ३३½ ॥

इति शिल्परत्ने भूमिलक्षणं नाम
तृतीयोऽध्यायः ।

अथ चतुर्थोऽध्यायः ।

शूद्रपरगृहप्रकारः ।

एवं परीक्ष्य सकले(सदिते)र्विहीनां
दोषैर्गुणैरुपचितां वसुधामवेक्ष्य ।
शुद्धिं च शास्त्रविहितां विधिवद् धरायाः
कुर्यात् गृहं गृहपतिर्गुरुमर्चयित्वा ॥ १ ॥

तत्तद्योगां महीं लब्ध्वा छित्त्वा गुल्मादिकानपि ।
मात्वा गुरुः सुलग्नर्क्षे तत्तदर्थं परिग्रहेत् ॥ ३ ॥

प्राकारपर्यन्तमथ प्रकल्प्य दत्त्वा बलिं तत्र च भूतकूरम् ।
शङ्कुं निधाय प्रविधाय सूत्रमुन्मीय भूमिग्रहणं विदध्यात् ॥
पुन्नागैकतरूद्भवान् करमितान् तत्पादनाहान् दृढान्
शङ्कून् प्राग्विधिनाथ मन्त्रमहितान्मध्यादिशर्वान्तिमम् ।
मात्वा कल्पितसालसीम्नि परितः शङ्कुं द्विसंवेष्टितं
मन्त्री संग्रविसार्य सूत्रमपि गृह्णातु क्षितिं सर्वतः ॥ ४ ॥

तत्तत्सीमासु तच्छङ्कून् विन्यस्य प्रथमं गुरुः ।
ताडयेल्लोहकूटेन मुद्गरेणाथवा समम् ॥ ५ ॥

नाश्मना (वा) न काष्ठेन ताडयेद् दोषकृद् यतः ।
ततः शिल्पी यथेष्टं तु शङ्कून् कूटेन ताडयेत् ॥
सहसा प्रविशेच्छङ्कुर्न विशेद् वात्र विघ्नकृत् ।
शनैर्व्रजन्नृजुः शङ्कुः कर्मसिद्धिं तदा वदेत् ॥ ७ ॥
मध्यादिशतशङ्कूनां भिन्ने शीर्णेऽथ ताडने ।
फलानि क्रमशो विद्यात् कर्तुः पुत्रस्य वा मृतिः ॥ ८ ॥
भयं मृतिस्त्वर्थनाशं भयं शोकं मृतिं सुखम् ।
अविशीर्णोच्छ्रितशिखे स्थानवृद्धिं समादिशेत् ॥ ९ ॥

कार्पाससूत्ररज्जुः स्यात् प्रशस्ता सुदृढा समा ।
गौणी कौश्यथवा मौञ्जी तया सूत्रं प्रसारयेत् ॥ १० ॥

नियुक्तसूत्रपाते यो यजमानोऽथवा परः ।
निर्विकारौ यदा स्यातां निश्शल्यां भवमादिशेत् ॥ ११ ॥

कण्डूयनादिविकृतौ शल्यमस्तीति निर्दिशेत् ।
श्वसृगालाजगोश्वादीनथ तत्समये तथा ॥ १२ ॥
यदि पश्येदतः सूत्राच्छल्यमस्तीति निर्दिशेत् ।
शिरःकण्डूयनेऽस्थि स्याच्छिरसो हस्तमानके ॥ १३ ॥
मुखस्पर्शे कपालं वा काष्ठं वा चिकुरे तथा ।
कर्णकण्डूयने हस्तत्रिके लोहजभृङ्गलाम् ॥ १४ ॥
अंसयोरथ बाह्वोर्वा कटौ लोहान् प्रकोष्ठयोः ।
हस्तमात्रे वदेदेवमेवोर्वोः काष्ठकास्थिनी ॥ १५ ॥
उरोहृदययोः स्पर्शे तावन्मात्रेऽस्थि निर्दिशेत् ।
जानुकण्डूयनेऽस्ताम्भः करमात्रे भवेदतः ॥ १६ ॥
जङ्घयोः केशमादेयं कुञ्जरास्थीनि पादयोः ।
अङ्गुष्ठाद्यङ्गुलिष्वर्धाकालोकांस्यं (?) विनिर्दिशेत् ॥
मार्जारलङ्घनेऽप्यस्ति तत्प्रमाणे शुनां वदेत् ।
अजादाजं तु वा शौनं महिषास्थि तुरङ्गमात् ॥ १८ ॥
माहिषेण वदेज्जम्बुकास्थि कौलन्तु जम्बुकात् ।
कौलेन व्याघ्रजं वास्थि व्याघ्रेणैवं भवेत् पुनः ॥ १९ ॥
इभेन नारं विज्ञेयं गर्दभं तु नरेण हि ।
गर्दभेनाजजं सूत्रलङ्घने (तु) वदेदिति ॥ २० ॥
क्षेत्रप्रवेशनात् तेषां दर्शने शब्दिते श्रिते ।
तेषां कीर्तनतो वापि शल्यमेवं समादिशेत् ॥ २१ ॥
भस्माङ्गारतुषादीनि पक्षिणां लङ्घनादितः ।
वदेत् त्वनद्धते शल्ये देवमर्त्यगृहादिकम् ॥ २२ ॥

यदि कुर्यात् तत्र देवे नैव सान्निध्यवर्धनम्।
(स?)मानुषे तत्र वसतां गोनाशं च प्रवासनम् ॥ २३ ॥
रोगनैर्धन्यमाक्लेशं धननाशं च निर्दिशेत्।
जीवन्मध्ये तु धान्यार्तिं कूर्मो नित्यं प्रवर्तयेत् ॥ २४ ॥
मण्डूकोऽप्यचलां लक्ष्मीं मूषिको धर्मशीलताम्।
मध्ये मण्डूककूर्मौ वा स्वर्णं चेद् वितरेन्मणिम् ॥ २५ ॥
खाताच्चाभ्युद्धरेत् तस्मादुद्धृतश्चेदनर्थकृत्।
तस्माद् यत्नात् समुद्धृत्य दुःशल्यं पुनरञ्जसा ॥ २६ ॥
करोतु शुद्धभूतायां कर्षणाद्यं गुरुर्भुवि।
कारयेदसनाद्यैर्वा क्षीरवृक्षैरथापि वा ॥ २७ ॥
कारयेन्मतिमानत्र लक्षणेन हलं युगम्।

अथ हललक्षणम्।

जिनाङ्गुलायतं घ्राणं तदध्यर्धं च मेखलाम् ॥ २८ ॥
षडङ्गुलं तु विस्तारं घ्राणे वेदाङ्गुलं घनम्।
क्रमेण कार्यतां प्राप्तं तस्याग्रं जिह्वयाञ्चितम् ॥ २९ ॥
सी(सा?रा)यामं त्रिहस्तं तद्युगं युगकरायतम्।
तयोः सप्ताङ्गुलं नाहं युगकीलान् करार्धकान् ॥ ३० ॥
युगसंख्यामात्रघनान् वृषसम्बन्धनक्षमान्।
करोतु जिह्वां लोहैर्वा खादिरेणाथवा दृढाम् ॥ ३१ ॥
कृष्टपूर्वौ वृषौ स्यातां कर्षणे कपिलौ सितौ।
सुलग्ने विधिनाचार्यस्तत्र कर्षणमाचरेत् ॥ ३२ ॥

---

१. 'गं' क. पाठः.

काष्ठेष्टकतुषाङ्गारपाषाणास्थिसरीसृपान् ।
हलाग्रेणोद्धृतां दृष्ट्वा तस्य विद्यादिदं फलम् ॥ ३३ ॥
काष्ठेष्वग्निभयं सर्वास्विष्टकासु धनागमम् ।
अङ्गारेषु महद् रोगं तुषेष्वेव धनक्षयम् ॥ ३४ ॥
पाषाणेष्वपि कल्याणं कुलनाशं तथास्थिषु ।
+ + + + + + + + + + + + + + + + ॥ ३५ ॥

कृष्ट्वा तां कपिलैर्वृषैश्च बहुशः कृत्वा हलाद्यैर्नवै-
राचार्योऽथ नवाम्बरो भुवि वपेद् धान्यानि तन्मन्त्रकैः ।
अद्भिरतान्यभिसेचयेच्च परितः संरक्ष्य संवर्धये-
दापुष्पाफलमत्र तानि पशुभिः संभक्षयेदादरात् ॥ ३६ ॥
यानि स्वस्वाङ्कुरोक्तानि बीजान्यथ पृथक् पृथक् ।
तानि निष्पावकादीनि विहितान्यत्र वापने ॥ ३७ ॥

भूयस्तत्र विधाय गोनिवसनं नीत्वा च संवत्सरं
मुद्गादीनि पुनश्च तत्र निवपेद् धान्यानि पूर्वक्रमात् ।
भूयस्तान्यपि भक्षयेच्च पशुभिः शुद्धे मुहूर्ते तथा
खात्वा शल्यविमोचितामतिदृढां भूयो विदध्यान्महीम् ॥
त्रिरात्राङ्कुरिता श्रेष्ठा वेदरात्रैस्तु मध्यमा ।
अधमा भूतरात्रैस्तु मही स्याद् बीजवापने ॥ ३९ ॥
विधिनैवं स्वीकृतायां धरायां लक्षणान्वितम् ।
ग्रामादिकं करोत्वार्यो गुरुशिल्पिभिरन्वितः ॥ ४० ॥

इति शिल्परत्ने भूमिपरिग्रहणं नाम
चतुर्थोऽध्यायः ।

अथ पञ्चमोऽध्यायः ।

ग्रामादिलक्षणम् ।

चतुरश्राष्टदण्डा भूः काङ्किणी तच्चतुर्गुणा ।
मापो वेदगुणस्तस्माद् भवेद् वर्तनकाह्वया ॥ १ ॥
तत्पञ्चगुणिता खाटी कुडुम्बं तच्चतुर्गुणम् ।
एककुडुम्बसमेतं कुटितं वाप्येकभोगं वा ॥ २ ॥
तल्लक्षणविस्तारं वक्ष्ये पश्चाद् विशेषतः (?) ॥ २½ ॥
द्विजकुलपरिपूर्णं वास्तु यन्मङ्गलाख्यं
नृपवणिगतियुक्तं वास्तु यत् तत् पुरं स्यात् ।
कतिपयजनवासो ग्राम इत्युच्यतेऽस्मिन्
मठमिति पठितं यत् तापसानां निवासम् ॥ ३½ ॥
ग्रामश्च खेटकश्चैव खर्वटं दुर्गमेव च ॥ ४ ॥
नगरं राजधानी च पत्तनं द्रोणिकामुखम् ।
शिबिरं स्कन्धवारश्च स्थानीयं च विडम्बकम् ॥ ५ ॥
निगमश्चाथ निर्दिष्टः स्याच्छाखानगरं ततः ।
एषां चतुर्दशानां च लक्षणं पृथगुच्यते ॥ ६ ॥
नद्यादीनां दक्षिणादौ तीरे ग्रामान् निवेशयेत् ।
ग्रामयोः खेटकं मध्ये राष्ट्रमध्ये तु खर्वटम् ॥ ७ ॥
पर्वते वा वने वाब्धौ दुर्गं स्याद्वा जलावृतम् ।
दुर्गं तु पार्वतं वन्यमौ(द)कं चैरणं तथा ॥ ८ ॥
दैवकं धावनं चैव कृतकं चेति सप्तधा ।

नृपभवनसमोपेतं हस्त्यश्वरथपदातिबहुलमुख्यम् ।
धान्यस्नेहक्षारलवणभैषज्यगन्धविषयुक्तम् ॥ ९½ ॥
लोहाङ्गारस्नायुविषाणवेण्विन्धनादिसर्वयुतम् ।
तृणचर्मशाकयुक्तं वल्लूरकसारदारुसंयुक्तम् ॥ १०½ ॥
दुर्गं दुर्गममुक्तं दुर्लङ्घ्यं दुरवगाहमतिमात्रम् ।
रक्षार्थं च जयार्थं त्वरिभिरभेद्यं च दुर्गमिष्टं स्यात् ॥ ११ ॥
गिरिमध्यं गिरिपार्श्वं गिरिशिखरं पार्वतं दुर्गम् ।
निर्जल(तल?)तरुवनगहनं वनदुर्गं तदुभयमिश्रं स्यात् ॥१२½॥
तदेव सह(ज)जलं चेज्जलदुर्गं पङ्कयुक्तं वा ।
नद्यब्ध्यावृतकं यज्जलदुर्गं निगदितं पूर्वैः ॥ १३½ ॥
अक्षयजलत(रु)विपुलैरणगहनसालभैरणं प्रोक्तम् ।
इन्द्रश्च वासुदेवो गुहो जयन्तश्च वैश्रवणः ॥ १४½ ॥
अश्विन्यौ श्रीमन्दिरशिवौ च दुर्गा सरस्वती चेति ।
प्राकारस्थास्त्वेते यस्मिंस्तद् दिव्यदुर्गं स्यात् ॥ १५½ ॥
धावनकृतकौ दुर्गौ विज्ञेयौ स्वस्वनामसदृशतरौ ।
एकोनविंशतिविधं दुर्गं प्रायेण कथितं स्यात् ॥ १६½ ॥
अक्षयजलान्नभक्षमतिविपुलोर्थगहनसालम् (?) ।
सर्वं हि दुर्गजातं सप्राकारं च मुखरक्षम् ॥ १७½ ॥
बहिरुदकरहितवनच्छन्नपथं दुष्प्रवेशं च ।
गोपुरमण्डपयुक्तं सोपानं छन्नमच्छन्नम् ॥ १८½ ॥
द्विकवाटचतुष्कुटिकद्वर्गलकं करभानद्विकीलम् ।
सस्थूणमध्यमालं त्विण्टकसहितं च सुदृढसोपानम् ॥ १९½ ॥

द्वाराणि मण्डपसभाशालागाराणि कार्याणि।
पर्यन्ते यन्त्रयुतं परितः परिखैश्च संयुक्तम् ॥ २०½ ॥
पांसुचययुक्तमार्गं विधिवत् कार्यं हि सर्वत्र।
परितः शिबिरोपेतं नानाजनवाससङ्कीर्णम् ॥ २१½ ॥
द्वादशसालाद्युक्तं चतुरं वृत्तं तदायतं वापि।
नन्द्यावर्तं कौक्कुटमिभकुम्भनागवृत्तं च ॥ २२½ ॥
नेमिघ्नं च त्रिकोणं षट्कोणाष्टाश्रनेमिखण्डं च।
प्राकारं चेष्टकया द्वादशहस्तोच्छ्रयाद्दीनम् ॥ २३½ ॥
उत्सेधार्धविशालं कार्यं स्यात् सर्वदुर्गेषु।
पांसुचययुक्तमार्गं मूला भित्तिः ससञ्चारा ॥ २४½ ॥
राष्ट्रस्य मध्ये नद्या वा समीपे नगरं स्मृतम् ॥ २५ ॥
तदेव शङ्कुपङ्क्त्याद्यैः प्राकाराट्टालगोपुरैः।
शतघ्न्याद्यैश्च परितः परिस्तीर्णोच्छ्रिताट्टका ॥ २६ ॥
एकद्वित्रिचतुर्द्वारा राजधानीति कथ्यते।
नानापण्यधनाकीर्णं सागरानूपसंश्रितम् ॥ २७ ॥
सांयात्रिकवणिग्जुष्टं पत्तनं परिचक्षते।
तदेवा(ध्या?ध्ये)श्च नद्याश्च सङ्गमागतपोतकम् ॥ २८ ॥
द्वीपान्तरवणिग्जुष्टं विदुर्द्रोणीमुखं बुधाः।
परराष्ट्रे स्वदेशे वा चतुर्विधबलान्वितम् ॥ २९ ॥
विजिगीषोः सन्निवेशं शिबिरं तत् प्रचक्षते।
नातिदूरे तदेव स्यान्नृपयोर्युध्यतोर्मिथः ॥ ३० ॥
सेनानिवेशं तु पृथक् स्कन्धावार उदीरितः।

पर्वतस्याथवा नद्याः पार्श्वे राजबलान्वितम् ॥ ३१ ॥
राष्ट्रस्यान्तकपालाय तत् स्थानीयं विदुर्बुधाः ।
कृषीवलादिकावासो ग्रामोपान्ते विडम्बकम् ॥ ३२ ॥
चातुर्वर्ण्यैः कर्मकारैर्नानाकर्मोपजीविभिः ।
पण्याश्वधनधान्याद्यैर्युक्तं तु निगमं स्मृतम् ॥ ३३ ॥
वने वा नगरोपान्ते नागरैस्तु जनैर्वृतम् ।
क्षेत्रारामाकरोपेतं शाखानगरमिष्यते ॥ ३४ ॥

अथ तेषां दण्डमानानि ।

अष्टाष्टदण्डविस्तारो ग्रामः स्यादधमाधमः ।
द्विगुणत्रिगुणौ तस्माद् ग्रामौ तौ मध्यमोत्तमौ ॥ ३५ ॥
षट्पञ्चाशच्च द्विशतं दण्डाः खेटेऽधमाः स्मृताः ।
विंशत्या त्रिंशतैर्दण्डैर्मध्यश्चतुरशीतिभिः ॥ ३६ ॥
त्रिभिः शतैश्चोत्तमः स्यात् खेटं त्वेव त्रिधा स्मृतम् ।
अष्टौ च चत्वारिंशच्च दण्डास्तद्वच्चतुश्शतम् ॥ ३७ ॥
हीने तु खर्वटे ज्ञेया मध्ये पञ्चशताधिकम् ।
द्वादशैवोत्तमे षट्भिः सप्तत्या पञ्चभिः शतैः ॥ ३८ ॥
हीनदुर्गं षट्शतैश्च चत्वारिंशद्भिरन्वितम् ।
चतुर्दण्डोत्तरैः सप्तशतैर्दुर्गं तु मध्यमम् ॥ ३९ ॥
अष्टाष्टियुक्सप्तशतैर्युतं दुर्गमिहोत्तमम् ? ।
सद्वात्रिंशद्वसुशतैः षण्णवत्याष्टभिः शतैः ॥ ४० ॥
षडुत्तरैर्नवशतैर्नींचे त्रिनगराणि वै ।
सहस्रेण च सार्धेन द्विसहस्रेण च क्रमात् ॥ ४१ ॥

नीचं मध्यं तथा श्रेष्ठं नगरं मध्यमत्रये ।
त्रिचतुष्पञ्चसाहस्रैर्नगराण्युत्तमत्रये ॥ ४२ ॥
षट्सप्ताष्टसहस्रैस्तैर्दण्डैः स्युश्चोत्तमोत्तमे ।
नगराणां त्रये तानि नगराणि यथाक्रमम् ॥ ४३ ॥
विकारदण्डवृद्ध्या तत् प्रत्येकं नवधा पुनः ।
राजधान्यादिकानां तु मानं नगरवद् भवेत् ॥ ४४ ॥

अथान्यथाग्रामः ।

मानाद् ग्रामस्योत्तमस्य पर्यन्तो लक्षदण्डवान् ।
तस्माद् विंशतिसाहस्रदण्डह्रासात् क्रमेण तु ॥ ४५ ॥
ग्रामाणां पञ्चधा मानं मुख्यतैवमुदीरितम् (?) ।
तस्माद् विंशतिसाहस्रदण्डात् पञ्चशतस्य तु ॥ ४६ ॥
ह्रासक्रमाद् ग्राममानान्यापञ्चशतदण्डतः ।
चत्वारिंशत्प्रभेदानि मध्यमाने भवन्त्विह ॥ ४७ ॥
विस्तारात् पादमर्धं वा त्रिपादं तत्समं तु वा ।
मुखायामो भवेदेषां ग्रामादीनां विशेषतः ॥ ४८ ॥
विपुले तु मुखायामं षडष्टांशैः प्रकीर्तितम् ।
एतावन्मानुषेष्वेव मानं ग्रामादिषु स्मृतम् ॥ ४९ ॥
देवासुरपुरादीनां मानं न ज्ञायते नरैः ।
सहस्रैर्जगतीपङ्क्तिवसुसंख्यैर्द्विजन्मनाम् ॥ ५० ॥
श्रेष्ठोत्तमः श्रेष्ठमध्यो ग्रामः श्रेष्ठाधमस्तथा ।
सप्तषट्पञ्चसाहस्रैर्ग्रामा मध्योत्तमादयः ॥ ५१ ॥
चतुस्त्रिद्विसहस्रैस्तु ग्रामाः स्युरधमत्रयाः ।
विप्राणां दशसप्तेषुशतैर्नीचोत्तमादयः ॥ ५२ ॥

ग्रामा भवन्त्यथ क्षुद्रास्तेऽप्येकादशधा स्मृताः ।
चतुस्त्रिद्विशतैरिष्टाः शतैश्चतुरशीतिकैः ॥ ५३ ॥
सचतुष्षष्टिपञ्चाशद्वात्रिंशत्यष्टकैरपि ।
विका(रा)दित्यसंख्यैश्च ब्राह्मणैः सुनिवेशितैः ॥ ५४ ॥
एकद्विजाद्यादशकैरेकभोगादिका दश ।
सकलाद्यासनान्ते तु पदे ग्रामादि विन्यसेत् ॥ ५५ ॥
युग्मे सूत्रं तु वीथ्याः स्युरयुग्मे पदपङ्क्तयः ।
द्वयोर्न सङ्करं कुर्यात् सङ्करश्चेदनर्थकृत् ॥ ५६ ॥

अथ तेषां विन्यासभेदाः ।

दण्डकः स्वस्तिकश्चैव प्रस्तरश्च प्रकीर्णकः ।
नन्द्यावर्तः परागश्च पद्मकः श्रीप्रतिष्ठितः ॥ ५७ ॥
ग्रामादीनां तु सामान्यं विन्यासस्त्वष्टधा स्मृतः ।
तस्मिन्नेकैव वी(थ्या?थी) स्यात् प्राचीना सोऽपि दण्डकः ॥
प्राग्वीथिर्दक्षिणगा दक्षिणवीथिः प्रतीचिमुखा ।
पश्चिमवीथ्युत्तरगा प्रागग्रा चौत्तरी वीथिः ॥ ५९ ॥
एवं चेत् स्वस्तिकनाम्ना शिल्पशास्त्रेषु कीर्तितः ।
प्राक्प्रत्यगायतास्तिस्रः सौम्यास्तिस्रोऽथ वीथयः ॥ ६० ॥
चतस्रः पञ्च वा षड् वा सप्त वा प्रस्तरस्तु सः ।
चतस्रो वीथयः प्राच्यां सौम्यां द्वादशवीथयः ॥ ६१ ॥
रुद्रदिङ्नन्दवसुभिर्मिता वापि प्रकीर्णके ।
प्रत्यग्गा वीथयः पञ्च सौम्यान्ताः स्युस्त्रयोदश ॥ ६२ ॥

शक्र्या वातिशक्र्याप्यष्ट्यात्यष्ट्या च सम्मितम्।
नन्द्यावर्ते तु विन्यासे ग्रामादौ प्रभवन्ति हि ॥ ६३ ॥

प्राच्यौष्टवीथयो यस्मिन् सौम्या धृत्यादिसंख्यया।
आकृत्यन्तं समा यत्र परागोऽसौ विधीयते ॥ ६४ ॥

प्राचीना वीथयः सप्त त्रयोविंशादितः क्रमात्।
आ सप्तविंशतेः सौम्या विन्यासे पद्मके स्मृताः ॥ ६५ ॥

प्राचीना वीथयोऽष्टौ स्युरष्टाविंशतिकादितः।
आद्यात्रिंशदुदीच्यः स्युर्विन्यासे श्रीप्रतिष्ठिते ॥ ६६ ॥

एकद्वित्रिचतुष्पञ्चदण्डैः स्याद् वीथिविस्तृतिः।
प्रागुत्तराभ्यां वीथिभ्यां कर्करीबन्धमध्यमा ॥ ६७ ॥

चतुर्द्वारा भावयेयुर्वप्रास्या दण्डकादयः।
ग्रामपर्यन्तवीथिस्तु ख्याता मङ्गलवीथिका ॥ ६८ ॥

नगरे रथवीथिः सा रथ्याख्या खर्वटादिषु।

अथ तेषूद्यानवाप्यादीनां स्थानानि।

ग्रामादिष्वथ पर्जन्ये जलमार्गस्तथैन्द्रगः ॥ ६९ ॥

ईशार्गलान्तराले वा प्रागुदीचि प्लवो यथा।
शस्तं सर्वत्र वाप्यादि ह्युत्तरे पुष्पवाटिका ॥ ७० ॥

दक्षिणे गणिकावाटं परितः शूद्रजन्मनाम्।
वैश्यानां वणिजां प्राच्यां मध्ये राजापणो भवेत् ॥ ७१ ॥

प्रागुदीच्यां कुलालानां वापकानां च तत्र हि।
जालिकानां तु वायव्ये सूनानां पश्चिमे गृहम् ॥ ७२ ॥

---

१. 'च्याः षड्वी' ख. पाठः.

तैलविक्रयिणां सौम्ये तक्ष्णां वाप्यनिलेऽनले ।
वायव्ये कारुकादीनां रजकानां तु पश्चिमे ॥ ७३ ॥
क्रोशद्वये वा तस्यार्धे बहिश्चण्डालपक्कणम् ।
प्रागुत्तरेण तु क्रोशाद् बहिः पितृवनं भवेत् ॥ ७४ ॥
अनुक्तानां तथान्येषां युक्त्यावासं प्रकल्पयेत् ।

अथ द्रोणीमुखादौ भेदः ।

परितोत्थ(?)पदयुक्तैर्मध्ये वणिजां गृहश्रेणिः ॥ ७५ ॥
तद्दक्षिणतः पार्श्वे शेषं स्यात् तन्तुवायानाम् ।
उत्तरतस्तच्चद्वद् वासालिर्यन्त्रिकाणां तु ॥ ७६ ॥
कर्मोपजीविनां स्याद् गृहगणनमथ तत्पथाद् बाह्ये ।
ताम्बूलादिफलं च प्रोक्तं सारान्वितं द्रव्यम् ॥ ७७ ॥
ईशानादिमहेन्द्रद्वारान्तं चान्तरापणं न्यस्तम् ।
तत्रैव मत्स्यमांसं शुष्कं[1] शाकं च विज्ञेयम् ॥ ७८ ॥
माहेन्द्राद्यग्न्यन्तं भक्ष्यं भोज्यं च निर्दिष्टम् ।
अग्न्यादिगृहक्षतपर्यन्तं तत्र भाण्डानि (?) ॥ ७९ ॥
तस्मान्निर्ऋतिपदान्तं कांस्यादिकमत्र विज्ञेयम् ।
निर्ऋतेः पुष्पपदादिदन्तपदान्तेऽपि वस्त्रं स्यात् ॥ ८० ॥
तस्मात् समीरणान्तं तण्डुलमथ धान्यपञ्चकं गण्यम् ।
तस्मात् फल्लाटान्तं वस्त्रं कौशेयमित्यादि[2] ॥ ८१ ॥

---

१. 'क्कं', ख. पाठः. २. 'यान्तमि' क. पाठः.

तत्रैव लवणादिद्रव्यं तैलादिकं ज्ञेयम्।
तस्मादीशपदान्तं सपुष्पकं गन्धकलभादि ॥ ८२ ॥
अभ्यन्तरगतमार्गेष्वथ रत्नं हाटकं वस्त्रम्।
माञ्जिष्ठमरिचमपिरतं (?) ताम्रादिकं लोहम् ॥ ८३ ॥
पिप्पलीकं हारिद्रं मधुघृततैलादिकं सर्वम्।
तत्रान्तर्बाह्ये (वा) भैषज्यं क्वापि सर्वतः कार्यम् ॥ ८४ ॥
एवमनुक्तद्रव्याण्यपि च भवन्त्वत्र युक्तितः स्थाने।

अथ राजधान्यादिभेदः।

राजधान्यां नृपावासः पाकशालान्तरिक्षके ॥ ८५ ॥
अधीशयोर्वा पर्जन्ये शय्यासद्म गृहक्षते।
अस्त्रशाला च निर्ऋतौ वारुणे भोजनालयम् ॥ ८६ ॥
विहारशाला वायौ स्यात् फल्लाटे कोशसंचयम्।
गोष्ठागार तथा सौम्ये व्यायामोऽप्यर्गले स्मृतः ॥ ८७ ॥
पर्जन्ये स्नानभवनमैशान्यां चार्वतां गृहम्।
नृत्तशाला तु गान्धर्वे पूष्णि वा गजमन्दिरम् ॥ ८८ ॥
दित्यदित्योरतुरङ्गाणां स्त्रीणां सौम्ये च पश्चिमे।
मध्ये प्रपामण्डपं स्याद् वायौ चार्चा च कारयेत् ॥ ८९ ॥
मध्ये ब्रह्मगृहं नृपास्थितिगृहं मित्रे विहारोऽनिले
व्यायामोऽर्गलके धनं धनपतौ स्नानादि पर्जन्यके।
ईशेऽर्चाथथ भुक्तिसद्म वरुणे नृत्तादि गान्धर्वके
शस्त्राद्यं निर्ऋतौ गृहक्षतपदे शय्यागृहं भूभुजाम् ॥ ९० ॥

एवं ग्रामपुरादिभेदमखिलं प्रोक्तं यथालक्षणं
ब्रह्मागस्त्यपुरन्दरैरपि यथा त्वष्ट्रा मयेनोदितम् ।
यद् विज्ञाय निवेदितेषु शुभदो भूयादशेषामरैः
संपूज्यो मुनिभिस्तथैव मनुजैर्देवो मृडानीपतिः ॥ ९१ ॥

इति शिल्परत्ने ग्रामादिलक्षणं नाम
पञ्चमोऽध्यायः ।

अथ षष्ठोऽध्यायः ।

अथ पदविन्यासः ।

+ + + पदविन्यासः कथ्यते वास्तुसिद्धये ।
सकलं पेचकं पीठं महापीठोपपीठके ॥ १ ॥
उग्रपीठं स्थण्डिलं च मण्डूकपरशायिकम् ।
आसनं च तथा स्थानीयं च देशीयमुच्यते ॥ २ ॥
भयचण्डिताख्यपदं तथा भद्रनहासनम् ।
पद्मगर्भं त्रियुतकं वृत्तभोगाभिधं पुनः ॥ ३ ॥
कर्णाष्टकपदं तद्वत् तथैव गणिकापदम् ।
पदं सूर्यविशालं तु सुसंहितपदं पुनः ॥ ४ ॥
सुप्रतीकान्तकं तद्वद् विशालं विप्रगर्भकम् ।
विश्वेशं विपुलभोगं तथा विप्रतिकान्तकम् ॥ ५ ॥
विशालाक्षं विप्रभक्तिकं च विश्वेशसारकम् ।
तथैवेश्वरकान्ताख्यमिन्द्रकान्तपदं पुनः ॥ ६ ॥
द्वात्रिंशद्भेदसंयुक्तमेवं पदमिति स्मृतम् ।
प्रान्तसूत्रचतुष्कान्तरेकं स्यात् सकलं पदम् ॥ ७ ॥

प्राच्योदीच्यैककोष्ठादिसंप्रवृद्ध्या क्रमान्नयेत् ॥ ८ ॥
चतुष्पदं पेचकं स्यात् पीठं नवपदं स्मृतम् ।
महापीठं षोडशभिः पञ्चविंशति(कैः) पदैः ॥ ९ ॥
उपपीठं तु षट्त्रिंशत्पदैः स्यादुग्रपीठकम् ।
स्थण्डिलं ह्यूनपञ्चाशन्मण्डूकं चाष्टकाष्टकैः ॥ १० ॥
एकाशीतिपदैः ख्यातं क्षेत्रं(स्यात्)परशायिकम् ।
आसनं शतकोष्ठैः स्यादेकविंशाधिकं शतम् ॥ ११ ॥
पदं स्थानीयकं नाम चतुश्चत्वारिंशताधिकम् ।
दशवर्गपदं तद्वत् तथा देशीयमुच्यते ॥ १२ ॥
नवषष्ट्युत्तरशतं पदं चोभयचण्डितम् ।
(चतुरू)नद्विशतपदं ख्यातं भद्रमहासनम् ॥ १३ ॥
सपञ्चविंशद्द्विशतं पद्मगर्भमिति स्मृतम् ।
षट्पञ्चाशद्द्विशत(कं)पदं त्रियुतनामकम् ॥ १४ ॥
एकोननवतियुक्तद्विशतं वृत्तभोगकम् ।
सचतुर्विंशद्विशतपदं कर्णाष्टकाभिधम् ॥ १५ ॥
त्रिशतं चैकषष्ट्युक्तं पदं गणिकसंज्ञितम् ।
चतुर्दशतपदं सूर्यविशालं परिकीर्तितम् ॥ १६ ॥
सुसंहितपदं चैकचत्वारिंशच्चतुरशतम् ।
चतुरशीतिसंयुक्तं चतुःशतपदं पुनः ॥ १७ ॥
नाम्ना सुप्रतिकान्तं स्यादेकोनत्रिंशतान्वितम् ।
पदं पञ्चशतं नाम्ना विशालकमिति स्मृतम् ॥ १८ ॥

षट्सप्तत्या पञ्चशतं विप्रगर्भमिति स्मृतम् ।
विश्वेशपदमेवं तु शरवर्गाढ्यषट्छतम् ॥ १९ ॥

षट्सप्ततिसच्छतकं पदं विपुलभोगकम् ।
नवविंशतिकं सप्तशतं विप्रतिकान्तकम् ॥ २० ॥

विशालाक्षपदं वेदाशीतिसप्तशतं पदम् ।
एकोनषष्टिवियुतं नवशतपदं पुनः ॥ २१ ॥

विप्रभक्तिकसंज्ञं स्यात् परं विश्वेशसारकम् ।
पदैर्नवशतैर्युक्तं तथैवेश्वरकान्तकम् ॥ २२ ॥

एकषष्टियुतैः कोष्ठैः परं नवशतैः स्मृतम् ।
चतुर्विंशतिसाहस्रमिन्द्रकान्तपदं विदुः ॥ २३ ॥

एवं द्वात्रिंशतिविधं पदानां न्यासमीरितम् ॥ २३½ ॥

आद्यं पदं सकलमेकपदं यतीना-
मिष्टं हि विष्टरमिहाशनवह्निकार्ये ।
पैत्रामरादियजनं गुरुपूजनं च
तस्मिन् स्थितो निखिलदेवमयो विरिञ्चः ॥२४½ ॥

पैशाचकादिसविषग्रहतक्षतास्ते
पूज्या हि पेचकपदे चतुरंशयुक्ते ।
तस्मिन् विधेयमधुना विधिना विधिज्ञैः
शैवं च निष्कलमथो सकलं च युक्त्या ॥२५½॥

अथ पीठपदे नवभागयुते यजत दिश्यथ वेदचतुष्टयम् ।
विदिशीशपदाद्यदकं दहनं पवनं गगनमन्तरतो महिम् ॥२६½॥

षोडशांशं महापीठं पञ्चपञ्चामरान्वितम् ।
कर्णसूत्रद्वयेनापि कोणकोष्ठे वितथो यमः॥ २७½ ॥
भृङ्गश्च पितृसुग्रीवौ वरुणः शोषमारुतौ ।
मुख्यः सोमोऽदितिश्चापि बाह्ये देवाः प्रकीर्तिताः ॥२८½॥
आपवत्सार्यसावित्रा विवस्वानिन्द्रमित्रकौ ।
रुद्रो महीधरश्चान्तर्मध्ये ब्रह्माप्यकोष्ठगः ॥ २९½ ॥
उग्रपीठं भवेद् यत्र पञ्चविंशत्पदान्वितम् ।
तत्रैता देवताः पूज्याः पृथगेकपदस्थिताः ॥ ३०½ ॥
उग्रपीठपदे मध्ये चतुष्कोष्ठगतो विधिः ।
आर्यकश्च विवस्वांश्च मित्रकोऽथ महीधरः ॥ ३१½ ॥
पदद्वितयगा ह्यन्ये पदगा इति कीर्तिताः ।
स्थण्डिलाख्यपदे पूज्याः + + + + ॥ ३२½ ॥
पदानामपि सर्वेषां मण्डूकं चापि तत्परम् ।
अर्चितं सर्ववस्तूनामासनाख्यं परं तथा ॥ ३३½ ॥
तस्मात् सङ्क्षिप्य तन्त्रेभ्यो वक्ष्येऽहमपि तत्त्रयम् ॥३४॥

कृत्वा चतुष्षष्टिपदानि भूयः
कोणेषु सूत्रे विनिवेशयेद् द्वे ।
तत्र स्थितानामपि देवतानां
वक्ष्ये पदानां नियमं विशेषात् ॥ ३५ ॥

ब्रह्मा मध्यचतुष्पदप्रणिहितो दिक्ष्वार्यकाद्याः स्थिता-
स्तद्बाह्येऽथ चतस्र एकपदगे द्वे द्वे स्थिते पार्श्वयोः ।
कोणस्याप्यथ षोडशार्धपदगाः कोणेषु बाह्ये तथा

ईशानपर्जन्यजयन्तशङ्कुध्वान्तापनुत्सत्यभृशान्तरिक्षाः ।
अग्निश्च पूषा वितथाभिधानो गृहक्षतः प्रेतनिवासकर्ता ॥३७॥
गन्धर्वसंज्ञस्त्वथ भृङ्गराजो मृगाभिधानः पितरः प्रशस्ताः ।
दौवारिकः पश्चिमपूर्वसंस्थाः सुग्रीवसंज्ञस्त्वथ पुष्पदन्तः ॥३८
भूयः प्रशस्तौ वरुणासुरौ च शोषश्च रोगः पवनो भुजङ्गः ।
मुख्योऽथ कल्लाटनिशाकरौ च भूयोऽर्गलोऽदित्युदितिक्रमेण ॥
विष्कम्भबाह्यस्थपदप्रविष्टा द्वात्रिंशदेताः परितः प्रदिष्टाः ।
अन्तस्थकोणेऽर्धपदेषु चाष्टौ वक्ष्ये चतस्रश्च दिशासु योज्याः ॥
सावित्रः सविता हुताशनदिशि ब्रह्माग्निमध्येऽर्धगा-
विन्द्रश्चेन्द्रजयश्च राक्षसदिशि ख्यातौ पदार्धस्थितौ ।
रुद्रो रुद्रजयश्च वायुदिशि च ख्यातौ तथेशार्धगा-
वापश्चापि तथापवत्स इति च द्वन्द्वस्थिता देवताः ॥४१॥

पूर्वादिदिक्षु क्रमशः स्थिताः स्यु-
स्तथार्यकश्चापि पुनर्विवस्वान् ।
मित्रश्च पश्चाच्च महीधराख्यो
ब्रह्मा च मध्यस्थचतुष्पदस्थः ॥ ४२ ॥

दिक्षु कोणेषु बाह्यस्थाः पदबाह्ये पुनः क्रमात् ।
शर्वः स्कन्दार्यमाह्वौ च जभकः पिलिपिञ्जकः ॥ ४३
चरकी च विदारी च पूतना पापराक्षसी ।
एवं मण्डूकपदगाः कीर्तिता देवताः क्रमात् ॥ ४४ ॥
एकाशीतिपदं कृत्वा पदे परमशायिके ।
मध्ये नवपदः स्थाप्यो ब्रह्मा लोकपितामहः ॥ ४५ ॥

ततो दिक्षु च चत्वारि षट्पदेष्वार्यकादयः ।
तत्राष्टौ द्विपदस्थाः स्युः कोणे सावित्रकादयः ॥ ४६ ॥
ईशानाद्याः पदैकस्थाः सर्वमन्यद् यथापुरम् ॥ ४६½ ॥

एवं पङ्क्तिकृतिप्रभिन्नपदके ब्रह्मा पदे षोडशे
मध्ये तत्र बहिः पदाष्टकगता दिक्ष्वार्यकाद्याः क्रमात् ।
सावित्रादिकदेवताश्च द्विपदस्थाप्याश्च पूर्वक्रमा-
दीशानप्रमुखाश्च पूर्ववदिदं स्थानं पदे चासने ॥ ४७½ ॥

इन्द्रकान्तपदं यावत् तावन्निश्चितबुद्धिमान् ॥ ४८ ॥
एवं समूहयेत् तत्र तत्र दैवतनिर्णयम् ।
समानि यानि कोष्ठानि चतुष्पष्टिवदिष्यते ॥ ४९ ॥
असमानि यानि तान्येवमेकाशीतिवदिष्यते ।
ब्रह्माणं तु निरीक्ष्यैते स्थितास्तत्तत्पदेऽमराः ॥ ५० ॥

इति शिल्परत्ने पदविन्यासो नाम
षष्ठोऽध्यायः ।

अथ सप्तमोऽध्यायः ।

अथ वास्तुपूजा ।

पुरा सुरासुरे युद्धे पुरन्दरमुखैः सुरैः ।
विष्णोः प्रभावभूम्नैव भग्नाः पेतुरथासुराः ॥ १ ॥
गुरुर्भृगुस्ततस्तेषां संरम्भाद् भृशकोपितः ।
जुहाव हव्यं हव्यादे छागं चैकं सलक्षणम् ॥ २ ॥
स्वेदाम्भःकणिका तस्य यत् पपात हविर्भुजि ।
तत्तेजसा स तुच्छागश्छागवक्त्रोऽसुरोऽभवत् ॥ ३ ॥

भूमिं दिवं च सजराद्यतैरेवाभोगवर्षणा (?) ।
उपतिष्ठन्मुनिश्रेष्ठं किंकरोमीति चाब्रवीत् ॥ ४ ॥

तमाबभाषे भृगुजो जृम्भमाणं भयानकम् ।
विबुधानबुधप्रज्ञान् भ्रंशयाशु त्रिविष्टपात् ॥ ५ ॥

इत्युक्तस्तर्जयन् नादैर्निर्गच्छन् स्वमुखानले ।
निर्दहन्निव लोकांस्त्रीन् निर्जरानभ्यधावत ॥ ६ ॥

ऋभवोऽपि भयात् तस्य विभावैर्भ्रंशितैः स्वकैः ।
अभिजग्मुर्विभुं शम्भुं भवं भूतिविभूषणम् ॥ ७ ॥

भवोऽप्यभयदस्तेषां भार्गवाभिभवाद् भृशम् ।
भग्नानां भूतयेऽथाक्षणस्तृतीयादग्निमुत्थितम् ॥ ८ ॥

आदिशद् भूतरूपं तं भस्मीकृत्य भृगोः सुतम् ।
ततश्छागासुरं क्रूरं प्रवृद्धं दग्धुमर्हसि ॥ ९ ॥

इत्युक्तः क्व गतोऽसीति वह्निर्दुद्राव भार्गवम् ।
विप्रद्रुतो भयात् सोऽपि बभ्राम भुवनत्रयम् ॥ १० ॥

रक्षितारमदृष्ट्वान्यमृते भसितभूषणात् ।
ततस्तनीयसीं कृत्वा तनुं स्वां योगशक्तितः ॥ ११ ॥

विवेश शर्मणे शंभोः श्रवणेन शिवान्तरम् ।
स तस्योदरमाविश्य शङ्करस्य शिवङ्करम् ॥ १२ ॥

ददर्श च जगद्विश्वं + + + विश्वतश्चसत् ।
देवोऽपि दिव्यदार्शित्वान्निशाम्य स्वोदरेऽसुरम् ॥ १३ ॥

---

१. 'र' स. पाठः.

मा भैर्भार्गव ! तुष्टोऽहं नयबुद्ध्यानया तव ।
अत्रोषितोऽसि पुत्रो मे निर्गच्छ स्वेच्छया ह्यतः ॥ १४ ॥
अग्रचग्रहपदं दत्तं तथैश्वर्यं महत् तव ।
अथ शुक्रः प्रणम्येशं विज्ञाय जगदीश्वरम् ॥ १५ ॥
कृतार्थोऽनुगृहीतोऽस्मि मत्तोऽन्यः कोऽधुना कृती ।
इत्युक्तः प्रणतं प्रीतः शुक्रं वकेन्दुशेखरः ॥ १६ ॥
तुष्टोऽस्मि वरयाभीष्टं वरं शुक्र! प्रियोऽसि मे ।
सोऽपि वव्रे वरं तत्र तच्छागदनुजं पुरः ॥ १७ ॥
पुरारेः पातयन् पद्भ्यामभयस्तस्य वाञ्छितः ।
अथाधोवदनं दैत्यं दण्डवत् पतितं क्षितौ ॥ १८ ॥
प्राह प्रसन्नवदनः सर्वं दद्मि वरं च यत् ।
वाञ्छितं छाग! तत् तुभ्यमित्युक्तः प्राह शङ्करम् ॥ १९ ॥
त्वदनिष्टं यदज्ञानान्मयेश! दुरनुष्ठितम् ।
क्षन्तुमर्हसि तत् क्षमायां वसिष्ये त्वत्प्रसादतः ॥ २० ॥
अविरोधेन देवानां वरमेतत् प्रयच्छ मे ।
मयि ब्रह्मादयो देवा वसन्तः सन्तु पूजिताः ॥ २१ ॥
श्रुत्वैतच्छूलहस्तोऽपि प्राह वस्तु वरं त्वया ।
याचितो यत् ततो नाम्ना वास्तुपोऽसि तथास्तु ते ॥ २२ ॥
अद्यप्रभृति भूलोके दैवं वान्यच्च मानुषम् ।
कुर्वन्तो वास्तु वासार्थं प्रथमं त्वां यजन्तु ते ॥ २३ ॥

---

१. 'मं' क. पाठः.

पुष्पैश्च धूपदीपैश्च बलिभिश्च महार्हणैः।
त्वं च त्वद्देहसंस्थाश्च पूज्याः स्युर्देवताः क्रमात् ॥ २४ ॥

एवं मयैव विहितं कुर्वता वास्तुपूजनम्।
तदायतनवेश्मादौ वसतां सन्तु संपदः ॥ २५ ॥

अकृत्वा (वा)स्तुयजनं प्रासादभवनादिकम्।
कृतं तदासुरं सर्वं भूयात् तत्र च यत् कृतम् ॥ २६ ॥

इति दत्त्वा वरं देवः शुक्रवास्तुपयोः समम्।
वस्तुं देवान् नियुज्यास्मिन् तत्रैवान्तरधीयत ॥ २७ ॥

यद्देशदिङ्मुखं शंभोः पादयोः पतितोऽसुरः।
शुक्रेण देवैरुषितस्तथैवाभूद् विभोर्वरात् ॥ २८ ॥

तथैवाधोमुखोऽद्यापि वास्तुरीशानदिक्छिरः ॥ २८½ ॥

ईशे तस्य शिरस्तदा विनिहितः पादौ निर्ऋत्यां स्थितौ
वायव्ये च हुताशने च भुजयोः पद्भ्यां तथा कूर्परे।
क्षिप्तं वक्षसि हस्तयोरतलमिति प्रोक्ता च तस्य स्थिति-
स्तस्याङ्गेषु च देवता विनिहिताः प्रोक्ताः क्रमात् सूरिभिः॥

तस्येशः शिरसि स्थितश्च नयने सव्ये तथा दक्षिणे
पर्जन्यश्च तथा दितिश्च वदने चापः पुनः संस्थितः।
भूयस्तस्य च कन्धरे विनिहितः स्यादापवत्सस्तथा
पश्चात् तस्य तथांसयोर्विनिहिते स्यातां जयन्तादिती ॥ ३०½ ॥

भूयो महेन्द्रप्रमुखार्गलाद्याः संस्थापिताः स्युर्भुजयोः क्रमेण।
सावित्ररुद्रौ सवितेन्द्रजिच्च भयः प्रकोष्ठद्वयसंस्थिताः स्यः ॥

ब्रह्मा च नाभौ रतनयोर्हृये च
संस्थापितौ चार्यमहीधरौ च।
कुक्षौ विवस्वांश्च तथैव मित्रः
पादद्वये स्युः पितरो निविष्टाः ॥ ३२½ ॥

इन्द्रश्च मेढ्रे वृषणद्वये च पश्चात् तथैवेन्द्रजयो निविष्टः।
शिष्टा यथायुक्तिगतास्य देहे प्रत्येकमासां प्रवदामि पूजाम् ॥

अथा(न्या?न्येषां) मते वास्तुर्निकुञ्जः प्राक्शिरो भवेत्॥ ३४ ॥

अधोमुखो महीपृष्ठे वक्ष्ये तत्स्थामरान् क्रमात्।
तस्योत्तमाङ्गे विज्ञेया + + काभिधदेवताः ॥ ३५ ॥

सविता दक्षिणभुजे सवित्रः कक्ष उच्यते।
आपश्चैवापवत्सश्च सकक्षे वामतो भुजे ॥ ३६ ॥

विवस्वान् दक्षिणे पार्श्वे वामपार्श्वे महीधरः।
मध्ये ब्रह्मा स्वयं तद्वन्मित्रः पुंस्त्वेऽभिधीयते ॥ ३७ ॥

इन्द्रश्चेन्द्रजयश्चैव दक्षिणे पाद ईरितः।
रुद्रो रुद्रजयो वामपादे शेषा बहिः स्थिताः ॥ ३८ ॥

गृहे गृहे मनुष्याणां विबुधानां तथैव च।
ग्रामखेटपुरादौ वा कार्यं स्याद् वास्तुपूजनम् ॥ ३९ ॥

कर्मादौ च समाप्तौ च मध्ये च शुभमिच्छता।
सुमुहूर्ते विशुद्धेऽस्मिन् गोमयालिप्तभूतले ॥ ४० ॥

मण्डूकाख्यपदेनाथ तत्परेणाथवान्यतः।
पिष्टैः प्रोक्तक्रमात् कार्यं मण्डलं सुमनोहरम् ॥ ४१ ॥

ईशानाद्याः श्वेतकृष्णौ च शुक्लः
श्यामो रक्तः श्यामकृष्णाच्छवर्णाः ।
रक्तश्यामौ शुक्लकृष्णौ च रक्तो
दूर्वाश्यामः पीतकृष्णो जपाभः ॥ ४२ ॥

धूम्रो रक्तः शङ्खवर्णोऽमृताभः
कृष्णः सन्ध्यामेघरुग् धूम्रकृष्णौ ।
हेमाभस्ते धूम्रमुक्ताजपाभाः
श्यामश्वेतौ कृष्णरक्तौ क्रमात् स्युः ॥ ४३ ॥

सिन्दूराभास्त्वार्यकाद्याश्चतस्रः
श्वेतश्यामौ धूम्रकृष्णौ क्रमेण ।
सावित्र्याद्याः पीतरक्तौ घनाभौ
मध्ये ब्रह्मा तप्तहेमप्रभः स्यात् ॥ ४४ ॥

शर्वस्कन्दः श्वेतवर्णोऽर्यमाह्वो
रक्तः कृष्णो जम्भकोऽन्यः सिताभः ।
श्यामा धूम्रा रक्तवर्णा चरक्या-
द्याः स्युर्मन्दारार्तवाभाः क्रमेण ॥ ४५ ॥

तत्तद्वर्णपरागैर्वा चित्रिते मण्डलोत्तमे ।
मनोहरे गुरुपूजनामुपहारैः समाचरेत् ॥ ४६ ॥

(केलि?) आश्रित्य मार्गं मतिमानथैषा-
मेकं च वास्तुं परिपूजयेत् तु ।
अङ्गेषु तस्याप्यथ देवताश्च
सकलप्रमाणं परिपूजयेत् तान् ॥ ४७ ॥

परेशपूजाय घृताक्षताभिः पर्जन्यकस्योत्पलगन्धतोयैः।
पीता जयन्तस्य भवेत् पताका रक्तान्नदीपैश्च यजेन्महेन्द्रम्॥
सूर्यस्य पीतान्नवितानकाभ्यां सत्यस्य साज्येन तथोदकेन।
गोधूमकान्नेन भृशस्य पूजा कार्यान्तरिक्षस्य तु मांसमाषैः॥
अग्निं स्रुवाभ्यर्च्य तथैव लाजैः पूपाख्यमिष्ट्वा वितथं च हेम्ना।
मध्वोदनाभ्यां च गृहक्षताख्यं मांसौदनाभ्यां यममर्चयेच्च॥
गन्धर्वमिष्ट्वा कुसुमैः सुगन्धैः स्यात् पक्षिजिह्वा त्वथ भृङ्गराजे।
पूजा मृगस्याथ तिलैर्यवैर्वा सिद्धं निर्ऋत्यै कृसरं यथावत्॥
दौवारिकं शोभनदन्तकाष्ठैः सुग्रीवमिष्ट्वा तु यवैः सधूपैः।
स्तम्बैः कुशानामथ पुष्पदन्तं तद्वज्जलेशं सितपुण्डरीकैः॥
मध्वक्षताभ्यामसुराय पूजा शेषाय चान्नं घृतमिश्रितं स्यात्।
नीवारकान्नेन तु रोगपूजा चाज्येन वायोर्घृतलड्डुकैश्च॥
नागप्रसूनैरपि नागपूजां कुर्यात् तु मुख्याय तु मोदकैश्च।
फल्लाटसंज्ञस्य समुद्गमन्नं सोमाय राज्ञे मधुपायसाज्ये॥ ५४॥
भूयोऽक्षतैर्गलमर्चयित्वा संरक्तशाल्यन्नघृतैर्दितिं च।
माषान्नभक्ष्यैरदितिं यथावद् द्वात्रिंशदित्थं क्रमशो विभावयेत्॥
आपस्तु दुग्धेन तथापवत्सः पूज्यस्तु दध्ना घृतलड्डुकैश्च।
सावित्रमिष्ट्वाथ कुशैर्गुलान्नैस्तथा सवित्रे यजनं विदध्यात्॥
हारिद्रमन्नं सघृतं तथेन्द्रजयाय शस्तं बलिकर्मणीह।
रुद्राय मांसं विहितं तु पक्वं मांसं तथा रुद्रजये त्वपक्वम्॥
तथापि पूज्याः सममार्यकाद्यास्ते लड्डुकैर्लोहितशुक्लभक्तैः।
[illegible]

ब्रह्माणमाज्याक्षतपञ्चगव्यैः पुष्पैः सगन्धैश्चरुणा तिलैश्च ।
यथा विरिञ्चं परिपूजयेद् गुरुस्तथैव वास्तुः परिपूजितव्यः ॥
संपूज्य च प्राग् घृतपायसेन शर्वाह्वयस्कन्दमथो यजेत ॥
याम्येऽर्यम्णे समांसाज्यैरततः पित्तासृगामिषैः ॥ ६० ॥
जम्भकाय तु वारुण्यां पिलिपिञ्छाय चोत्तरे ।
सान्द्रलोहितपुष्पान्नैर्बलिमत्र प्रदापयेत् ॥ ६१ ॥
मांसौदनघृतापूपैरैशान्यां चरकीबलिः ।
मार्गे पीतेन मांसेन विदार्यै बलिमर्पयेत् ॥ ६२ ॥
पूतनायां तु राक्षस्यां दधिरक्तौदनैर्बलिः ।
क्षीरपित्तास्थिरक्तान्नैर्वायव्यां पापराक्षसीम् ॥ ६३ ॥
अथ देवासुरगन्धर्वयक्षपितरः सनागराक्षसकाः ।
पूर्वाद्यष्टदिशासु क्रमशः सपिशाचका ग्रहाः पूज्याः ॥ ६४ ॥
एतेषां भूतकूरान्नैर्बलिर्मण्डलबाह्यतः ।
पूर्वादिदिक्ष्वष्टकेषु शर्वस्कन्दादिके बहिः ॥ ६५ ॥
प्रत्येकमुक्तद्रव्याणामलाभे कुसुमाक्षतैः ।
सगन्धधूपदीपैश्च शुद्धान्नेन स्मृतो बलिः ॥ ६६ ॥
इत्येव वास्तुपुरुषं ब्रह्माणं च सदैवतम् ।
संपूज्य च बलिं दत्त्वा तत्तन्नाम्ना प्रसादयेत् ॥ ६७ ॥

इति शिल्परत्ने वास्तुपूजाविधानं नाम
सप्तमोऽध्यायः ।

अथाष्टमोऽध्यायः ।

अथ ग्रामादीनां द्वारविधिः ।

ग्रामादितत्तद्विस्तारेऽप्येकाशीतिपदे कृते ।
तत्तत्पदे महाद्वारमुपद्वारं च कारयेत् ॥ १ ॥

आदित्ये स्थापिते द्वारे पुत्रनाशोऽथ जायते ।
मित्रभङ्गस्तु सत्ये स्याद् भृङ्गे पथि निरुध्यते ॥ २ ॥

अन्तरिक्षे कृते द्वारे विनाशमधिगच्छति ।
पावके च कृते द्वारे म्रियते वेश्मनः पतिः ॥ ३ ॥

तत्र पूष्णि कृते द्वारे नश्येद् वारणपोषणे ।
वितथे स्थापिते द्वारे पत्युर्मरणमादिशेत् ॥ ४ ॥

गृहक्षतपदे द्वारे कृते सम्पद्विवर्धनम् ।
यमे द्वारे कृते सर्वनाशं च मरणं भवेत् ॥ ५ ॥

गन्धर्वे निर्मिते द्वारे सर्वकर्मविवर्धनम् ।
भृङ्गराजे विपद् द्वारे मृगे सस्यविनाशनम् ॥ ६ ॥

नैर्ऋतौ मरणं विद्याद् दौवारिकपदे भयम् ।
सुग्रीवे सर्वलाभः स्यात् पुष्पदन्तेऽखिलो गुणः ॥ ७ ॥

वरुणे स्थापिते द्वारे मित्राद् वा चोरतो भयम् ।
असुरे च कृते द्वारे नित्यमार्धिं वदेद्[1] भयम् ॥ ८ ॥

शोषणे च कृते द्वारे शुष्यते निखिलो गुणः ।
रोगे यदि कृते द्वारे पाण्डुरोगो भविष्यति ॥ ९ ॥

पवने स्थापिते द्वारे नरो वातेन पीड्यते ।
नागे च निर्मिते द्वारे शीघ्रं नागभयं भवेत् ॥ १० ॥

---

१. 'वदेत्' ख. पाठः.

मुख्ये यदि कृते द्वारे ब्रह्मण्यो भवति क्षणात् ।
फल्लाटे च कृते द्वारे वैशिष्ट्यं लभते नरः ॥ ११ ॥
निशाकरे कृते द्वारे यज्ञशीलो भविष्यति ।
अर्गले च कृते द्वारे जले(र्ण?न)मरणं भवेत् । १२ ॥
अदितौ निर्मिते द्वारे कुक्षिरोगं विनिर्दिशेत् ।
उदितौ स्थापिते द्वारे वनिताकूपनाशनम् ॥ १३ ॥
रुद्रे यदि कृते द्वारे वह्निना दह्यते गृहम् ।
पर्जन्ये चेन्धनं नश्येत् जयन्ते जयमाप्नुयात् ॥ १४ ॥
माहात्म्यं चैव माहेन्द्रे द्विद्वारे (तु) कृते वदेत् ।
अथ द्वे प्राङ्मुखे द्वारे कुर्याद् द्वे दक्षिणानने ॥ १५ ॥
द्वारे प्रत्यङ्मुखे द्वे च द्वे च कुर्यादुदङ्मुखे ।
माहेन्द्रे प्राङ्मुखं द्वारं जयन्ते च स्मृतं वरम् ॥ १६ ॥
गृहक्षते च गन्धर्वे द्वारं याम्यमुखं पृथक् ।
द्वारं प्रत्यङ्मुखं पुष्पदन्तसुग्रीवके तथा ॥ १७ ॥
फल्लाटे वाथ मुख्ये वा कुर्याद् द्वारमुदङ्मुखम् ।
गृहक्षते च माहेन्द्रे द्वारं ब्राह्मणपूजितम् ॥ १८ ॥
गृहक्षतपदे पुष्पदन्ते द्वारं नृपस्य तु ।
फल्लाटे पुष्पदन्ते च द्वारं वैश्यस्य पूजितम् ॥ १९ ॥
माहेन्द्रेऽपि च फल्लाटे द्वारं शूद्रजनस्य तु ।
जयन्ते वाथ गन्धर्वे दौवारिकपदे पुनः ॥ २० ॥

---

१. 'प' क. पाठः. २. 'द्वौ' ख. पाठः.

मुख्ये वा सर्ववर्णानां शुभदं द्वारमिष्यते ।
महाद्वारक्रमः प्रोक्त उपद्वाराणि सन्ति चेत् ॥ २१ ॥

भृशे पूष्णि च भृङ्गाख्ये दौवारे शोषनागयोः ।
उदितावपि पर्जन्ये विन्यसेद् युक्तितः पुनः ॥ २२ ॥

यत्र स्थलेऽष्टमो राशिस्तत्र द्वारं न विन्यसेत् ।
यत्रोन्नतं ततो द्वारं यत्र निम्नं ततो गृहम् ॥ २३ ॥

द्वारं यत्र च विहितं तद्दिगधीशाधिपं च तद्धाम ।
एकतलं वा द्वितलं द्वितले द्विमुखं च निर्मुखं वा स्यात् ॥

द्वारस्तम्भन्यासो जन्मनि तस्योदितं च शिल्पिवरैः ।
आजन्मान्तं निम्नं मार्गे द्वारस्तारतोऽथ सदृशमपि ॥ २५ ॥

अध्यिगुणीकृततारे योनिः स्वीया भवेद् यथा तस्य ।
एतन्मण्डपतारं किष्कुमितं वा भवेच्च मात्रमितम् ॥ २६ ॥

इति शिल्परत्ने द्वारविन्यासलक्षणं नाम
अष्टमोऽध्यायः ।

अथ नवमोऽध्यायः ।

अथ ग्रामादिषु देवालयनियममाह—

तीर्थान्ते तटिनीतटे जलनिधेस्तीरे सरित्सङ्गमे
शैलाग्रेऽद्रितटे वनोपवनयोरुद्यानदेशे तथा ।
सिद्धाद्यायतनेषु वा गुरुवरो ग्रामे पुरे पत्तने
वान्यत्रापि मनोरमे सुरसमिज्यायै क्षितिं कल्पयेत् ॥ १ ॥

प्राचि प्रतीचि च हरौ निजदिश्युमेशे
वायौ निसुम्भजिति तारकजित्युदीच्याम् ।

ग्रामादिकेषु निर्ऋतौ गणपार्ययोश्च
गृह्णातु भूमिमखिलेष्वपि मध्यतो वा ॥ २ ॥
परिघं तु त्रिदण्डादि यावद् द्वात्रिंशतिदण्डकम् ।
तदेव चाष्टदिशि च कर्तव्यं शिवमन्दिरम् ॥ ३ ॥
परिघाभ्यन्तरे वापि पैशाचिकपदे गुरुः ।
मानुषे तु पदे वाथ कर्तव्यं शिवमन्दिरम् ॥ ४ ॥
पैशाचिकपदे कुर्यादालयं तु पराङ्मुखम् ॥ ४½ ॥
मध्येऽजः स्वपदे धनेशतरणी प्रागीशमध्येषु मा
शर्वाणीरमयोर्यमेन्द्रदिशि गोशालेन्दुरक्षोग्निषु ।
काली दण्डधराशरेन्दुषु जनन्यो + विधौ भारती
स्याद्वा क्षेत्रप ईश्वरेन्द्रशशिषु ज्येष्ठानिलाब्धीशयोः ॥५½॥
सूर्ये सूर्यो भृशे विष्णुस्तथाब्धीशे + + + + ॥ ६ ॥
+ + + + + + + + सुग्रीवे शास्तुरालयम् ।
भृङ्गे जनन्यो ज्येष्ठायां वायौ चण्ड्यास्तु मुख्यके ॥ ७ ॥
कुबेरे च महाकाल्यां मातृणां च निशाकरे ।
अदितौ वास्तु चामुण्ड्याः शस्तमैशे शिवालयम् ॥ ८ ॥
निर्ऋतौ वा जयन्ते वा गोशाला च वनेऽथवा ।
देवतानां तु विन्यासमपरे जगुरन्यथा ॥ ९ ॥
तद्ग्रामपुरराष्ट्राणां स्यान्मध्ये ब्रह्मणो गृहम् ।
प्राच्यां वा पश्चिमे विष्णोर्ग्रामादीनां च सम्मुखम् ॥ १० ॥
पराङ्मुखं स्यादैशान्यां मानुषे शिवमन्दिरम् ।
स्वयंभूदैवतं चार्षं यत्र तत्रैव शोभनम् ॥ ११ ॥

प्राच्यामैशेऽथवा मध्ये गौर्याः सूर्यस्य च श्रियः।
मातृणां दक्षिणे धाम शास्तुः काल्याश्च नैर्ऋते॥ १२ ॥
षण्मुखस्य च वारुण्यां ज्येष्ठायास्तदनन्तरम्।
वायौ सौम्ये च दुर्गाया लोकेशानां स्वगोचरे ॥ १३ ॥
इन्द्रेशसौम्यमध्ये वा क्षेत्रपालनिवेशनम्।
गोशाला दक्षिणे प्राच्यामनुक्तानां तथैव च ॥ १४ ॥
मन्दिरं कारयेत् तत्र युक्त्या (सर्वं) महामतिः।
उग्राः पराङ्मुखाः शास्ता नृणां सौम्यास्तु संमुखाः ॥१५॥

ईशादिप्रेतेशपर्यन्तदिक्स्थाः
प्रासादा ग्रामादिकेषु ध्वजोत्थाः।
गोयोन्युत्थाः शेषदिक्संस्थिताः स्यु-
स्तत्स्थाप्यार्चा चेष्यते तत्सयोनिः ॥ १६ ॥

इति शिल्परत्ने देवालयस्थाननियमो नाम
नवमोऽध्यायः।

अथ दशमोऽध्यायः।

अथ विमानकरणे खातविधिः।

स्निग्धं चैव तथास्निग्धं द्विविधं भूमिलक्षणम्।
चिक्कणा शर्कराढ्या वाप्यशक्यखननक्रिया ॥ १ ॥
या सा स्निग्धा मही ख्याता तनुवालुकसंयुता।
पुरुषाञ्जलिमात्रे तु दृष्टा तोयसमन्विता ॥ २ ॥
अङ्गुलात् खननं यत्र सा स्निग्धाख्या मही स्मृता।
हस्तमात्रं खनेत् स्निग्धभुवमन्यत् तथाजलम् ॥ ३ ॥

खात्वा क्षितिं तां पुरुषप्रमाणं जलान्तमश्मावधिं वा सुलग्ने ।
पादोनमापूर्य विशुद्धवेद्यां रात्रौ यजेद् दिश्यथ वास्तुमैश्याम्॥
युगाश्रे तूक्तमाने तु मानसूत्रं विधाय तु ।
तदन्याकृतिगेहानां ततस्तत्संभवक्षमाम् ॥ ५ ॥
मात्वा विधाय सूत्राणि वेदाश्रं खातमाचरेत् ।
अथाधारशिलां न्यस्य गर्तेऽस्मिन् कल(शं) न्यसेत्॥ ६ ॥
पद्मानि कूर्मयुक्तानि योगनालं ततोपरि ।
पीठस्य तारार्धततां तदर्धविस्तारयुक्तां प्रकरोतु मन्त्री ।
वा पादपद्मस्य ततां तदर्धतुङ्गामथाधारशिलां सुलग्ने ॥ ७½ ॥
भाविप्रासादपीठादिमानेन परिकल्पयेत् ।
आधाराख्यशिलाकुम्भपद्मकूर्मादिमानकम् ॥ ८½ ॥
स्तम्भोच्चस्य षडंशविस्तृततदष्टांशाधिकोच्चो घटः
पद्मोऽष्टांशसमुच्छ्रयोच्छ्रयनवांशोनप्रथोऽष्टच्छदः ।
अष्टांशाययततद्विपांशरहितव्यासायतार्धोच्छ्रयः
कूर्मो नागयवाग्रतो द्विगुणमूला योगनालप्रथा ॥ ९½ ॥
आधा(रा?राख्य)शिलामध्ये निधिकुम्भं शिलाकृतम् ।
ताम्रजं वाथ विन्यस्य नानारत्नादिपूरितम् ॥ १०½ ॥
तदूर्ध्वे दृषदम्भोजं कर्णिकायां तथास्य तु ।
भाविदेवमुखं कूर्मं विन्यसेद् विधिना निशि ॥ ११½ ॥
तदूर्ध्वे रजताम्भोजगतं रजतकच्छपम् ।
तदूर्ध्वदेशे स्वर्णाब्जे स्वर्णकूर्मं निधापयेत् ॥ १२½ ॥
तत्पादद्दषदोर्मध्यसमायामं प्रनालकम् ।
कूर्मस्योपरि संस्थाप्य कारयेद् गर्तपूरणम् ॥ १३½ ॥

सशर्करैर्वालुकैश्च मृद्भिश्च दृषदादिभिः ।
दृढं प्रपूरयेच्छुद्धैर्जलैराप्लुत्य मुद्गरैः ॥ १४½ ॥
मुसलैर्बृहच्छिरस्कैस्तु निहत्य दृढतां नयेत् ।
गजसञ्चारणं तत्र बहुशः कारयेत् पुनः ॥ १५½ ॥
एवं दृढतरं कृत्वा समीकृत्य जलादिभिः ।
दिग्ज्ञानप्रक्रियादक्षः स तत्कर्म समारभेत् ॥ १६½ ॥

इति शिल्परत्ने खातविधिर्नाम
दशमोऽध्यायः ।

अथैकादशोऽध्यायः ।

अथ दिक्परिच्छेदः ।

अ(ब्जा?ब्धा)रादिसमीकृते क्षितितले संस्थाप्य शङ्कुं समं
तन्मूलाहितसूत्रसंभ्रमणतः संलिख्य वृत्तं भुवि ।
प्रत्यग् प्रागपि वृत्तवर्तिनि ततश्छायाग्रके प्राङ्मुखं
सूत्रं न्यस्य सुसाधयेद्धरिजलेशाशे ततश्चेतरे ॥ १ ॥
कृत्वा भूमितले समे करमितव्यासार्धवृत्तं च त-
न्मध्येऽर्काङ्गुलशङ्कुमत्र परिधिच्छायाग्रयोगेऽङ्कयेत् ।
पश्चाद् बिन्दुमनन्तरेऽपि दिवसे कृत्वा तयोः शङ्कुर-
त्र्यंशे प्राग्दिनजं प्रणीय दिशमिन्द्राब्धीशयोः साधयेत् ॥ २ ॥
तोयसिद्धवसुधावलयान्तन्यस्तलम्बककृतार्जवशङ्कोः ।
यत्र भा विशति मुञ्चति वृत्तं तौ दिशौ वरुणवासवयोः स्तः ॥
याति भानुरपमण्डलवृत्ते दक्षिणोत्तरदिशोरनुवेलम् ।
तेन सा दिगनृजुः प्रतिभाति स्याद्दृजुः पुनरपक्रममौर्व्या ॥ ४ ॥

छायानिर्गमनप्रवेशसमयार्कक्रान्तिजीवान्तरं
क्षुण्णं स्वश्रवणेन लम्बकहतं स्यादङ्गुलाद्यं फलम् ।
पश्चाद् बिन्दुमनेन रव्ययनतः संचालयेद् व्यत्ययात्
स्पष्टाः प्राच्यपरार्धयायनवशात् प्राग्बिन्दुमुत्सारयेत् ॥
गजदन्तादिभिर्वाथ खदिरादिभिरेव वा ।
अविकारवहिरल्पमतितिग्मातपेऽपि च ॥ ६ ॥
यथेष्टपरिधिः शङ्कुतुल्यमूलाग्रको भवेत् ।
शिलातले वा भूमौ वा समायां स्थापयेच्च तम् ॥ ७ ॥
शङ्कुमार्जवसंयुक्तं कल्पितद्वादशाङ्गुलम् ।
तदग्राद् भागपर्यन्तमानश्रुतिरिहोच्यते ॥ ८ ॥
सायनार्कभुजाजीवपरमक्रान्तितासिता ।
लम्बकाप्ताग्रजीवा स्याच्छायाकर्णहता हता ॥ ९ ॥
त्रिज्ययाग्राङ्गुलं याम्ये विषुवद्भायुतं भुजा ।
सौम्याथ सौम्ये (का)लेऽपि न्यूनमग्राङ्गुलं यदि ॥ १० ॥
शोधयेद् विषुवद्भायाः सौम्यो बाहुस्तदापि च ।
विषुवद्भां त्यजेत् तस्माद् रवावुत्तरगेऽधिकात् ॥ ११ ॥
याम्य एव तदा बाहुश्छायाकृतिभेदतः ।
मूलं कोटिः श्रुतिश्छाया त्रिभिरभ्यश्रं भवेदिदम् ॥ १२ ॥
भ्रामयित्वाथ तत् त्र्यश्रं यावच्छायानुगा श्रुतिः ।
कोट्या पूर्वापरे ज्ञेये बाहुना दक्षिणोत्तरे ॥ १३ ॥

---

१. 'गो' २. 'टिश्रु' ख. पाठः.

अथवाक्षज्योना यदा क्रान्तिः सौम्यत्वयागताम्(?)।
अक्षज्यया विभज्यास्तशङ्कुः स्यात् सममण्डले ॥ १४ ॥

अक्षज्याघ्नः परक्रान्त्या हृतः शङ्कुः स दोर्गुणः।
तच्चापमेव भानुः स्याच्चक्रार्धं वा तदूनितम् ॥ १५ ॥

एवं रवेः समानीय सममण्डलगं स्फुटम्।
यस्मिन् काले समायातीत्यवगम्य दिवाकरम् ॥ १६ ॥

सममण्डलमस्यैव छायापूर्वापरास्फुटाम् ॥ १६½ ॥

साक्षे शङ्कुमिनाङ्गुलं समतले कृत्वा पृथक्षाल(?)ज-
च्छायागारचितत्रिबिन्दुपरिवृत्त्योत्पाद्य मत्स्यद्वयम्।
तत्सौष्ठमसीरोत्थ + + + + + + + + + +

सूत्रं न्यस्य सुसाधयेद् यमधनेशाशे ततश्चेतरे[1] ॥ १७½।
एतेष्वेकेन मार्गेण ज्ञेयं पूर्वापरं दिशम्।
अधऊर्ध्वदिशौ ज्ञेयौ लम्बकेनैव नान्यथा ॥ १८½ ॥

सिद्धा प्राक्पश्चिमा दिग् या ब्राह्मी प्राचीति सा स्मृता।
प्रागङ्कं दक्षिणे नीत्वा या साप्यैन्द्रीति कथ्यते ॥ १९½॥

प्रागङ्कमुत्तरे किञ्चिन्नीत्वा सैशीति कथ्यते।
शिवालयादिकरणेष्वैशी प्राचीति केचन ॥ २०½ ॥

विप्राद्यावासकरणे स्यादैशीत्यपरे जगुः।
शङ्कुच्छायादिभिः सिद्धा सैव वा सर्ववस्तुषु ॥ २१ ½ ॥

---

१. 'ते' क. पाठः,

अथ चतुरश्रीकरणम् ।

प्रागग्रं सूत्रमुर्व्यामृजुतरमभिकल्प्यास्य मूलाग्रगाभ्यां
सूत्राभ्यां मत्स्ययुग्मं यमशशिहरितोः कल्पयित्वात्र सूत्रम् ।
कृत्वा दिक्ष्वङ्कयित्वा समामिह निहितैः सूत्रकैः कोणमत्स्यान्
कृत्वास्फाल्यैषु सूत्रं रचयतु चतुरश्रं पुरः क्षेत्रकल्पौ ॥ २२३ ॥

इति शिल्परत्ने दिक्परिच्छेदो नाम
एकादशोऽध्यायः ।

अथ द्वादशोऽध्यायः ।

अथ गर्भन्यासः ।

ग्रामादीनां च सर्वेषां गर्भन्यासोऽर्हति क्रमात् ।
स्थानीये च द्रोणमुखे खर्वटे प्रतिनागरे ॥ १ ॥
ग्रामे च निगमे खेटे महेन्द्रे च गृहक्षते ।
विष्णोः स्थाने शिवस्थाने स्कन्दस्थानेऽथवा पुनः ॥ २ ॥
स्थापयेद् ग्रामरक्षार्थं सर्वकामाभिवृद्धये ।
अनुक्तानां तु सर्वेषामजभागादिषु न्यसेत् ॥ ३ ॥
वापीकूपतटाकादौ तथा वा सेतुबन्धने ।
गर्भं तदुक्तभागे वा पूर्वायां दिशि वा तथा ॥ ४ ॥
पुरुषाञ्जलिमात्रे तु श्वभ्रे गर्भं निधापयेत् ।
ब्रह्मादीनां च देवानां देवीनां द्वारदक्षिणे ॥ ५ ॥
स्तम्भमूलेऽथवा योगमूले गर्भं निधापयेत् ।
होमस्तम्भे प्रतिस्तम्भे पादुकोर्ध्वे प्रतेरधः ॥ ६ ॥
ततोन्नतं च निम्नं च गर्भं सर्वविनाशकृत् ।
पुरुषाञ्जलिमात्रे तत खाते वाखिलधामसु ॥ ७ ॥

पादावशिष्टे खाते वा विन्यसेत् प्रथमेष्टकाम्।
तुलाभाराभिषेकादिमण्डपे वा तथा पुनः ॥ ८ ॥

पाषण्डाश्रमिणां वासे तथैव च महानसे।
जात्यन्तराणां सर्वेषां वासे नाट्यसभासु च ॥ ९ ॥

प्रासादे मण्डपे साले गोपुरे च तथैव च।
सदने परिवाराणां विन्यसेत् प्रथमेष्टकाम् ॥ १० ॥

स्वस्थाने गर्भविन्यासं तत्तच्चिह्नेन कारयेत् ॥ १०½ ॥

नागैर्भित्तितातिं विभज्य चतुरो बाह्ये विधायांशका-
नन्तस्त्रीनखिलेषु गोभिरजिते षड् द्वा(?)च षाण्मातुरे।
भूतैस्त्रीनपि चैककं वितनुयाद् गर्भं परांशे स्थितं
विप्रस्योपरि पादुकस्य भुवि राज्ञोऽधःक्रमादन्ययोः ॥ ११½ ॥

यद्यत्स्थाने तु गर्भः स्यात् तत्रस्थाः प्रथमेष्टकाः।
मर्मादीनि परित्यज्य वास्त्वङ्गे स्थापयेदिमाः ॥ १२½ ॥

वास्तुमर्मसु निक्षिप्ता यदि स्युः प्रथमेष्टकाः।
स्थाननाशो भवेत् कर्तुर्दुःखं मरणमेव वा ॥ १३½ ॥

सुमुहूर्ते सुनक्षत्रे विन्यसेत् प्रथमेष्टकाम्।
शैले देवादिनिलये शैल्यः स्युः प्रथमेष्टकाः ॥ १४½ ॥

इष्टकाभिस्तु कर्तव्या इष्टका इष्टकालये।
संमिश्रे तु शिलाभिस्तु तरुभिस्तरुमन्दिरे ॥ १५½ ॥

मार्तिक्यो वाथ सर्वेषां विमानानां शुभावहाः।
पुंसां पुमिष्टकाः शस्ताः स्त्री स्त्रीणामिति केचन ॥ १६½ ॥

पुमिष्टकाश्च सर्वेषां सर्वाभिप्रायसिद्धिदाः ।
करायतास्तदर्धांशविस्तृताष्टाङ्गुलोच्छ्रिताः ॥ १७½ ॥
सुपक्का लोहितरुचः खण्डस्फोटादिवर्जिताः ॥ १८ ॥
नवसंख्यास्तु वा पञ्च कार्याः स्युः प्रथमेष्टकाः ।
अङ्गुलैर्जगतीपङ्क्त्यनुष्टुब्भिश्च कृतायताः ॥ १९ ॥
क्रमात् तदर्धविस्तारा विस्तारार्धसमुच्छ्रयाः ।
उत्तमादिविमानानां निर्दिष्टाः प्रथमेष्टकाः ॥ २० ॥
वस्वङ्गुलं समारभ्य द्व्यङ्गुलविवर्धनात् ।
अष्टात्रिंशाङ्गुलं यावदायामं तु तथाविधम् ॥ २१ ॥
आयामार्धं विशालं तु विशालार्धं घनं तथा ।
नवाङ्गुलं समारभ्य द्व्यङ्गुलविवर्धनात् ॥ २२ ।
नवत्रिंशदङ्गुलान्तं दीर्घं तारादि पूर्ववत् ।
एकादिषोडशान्तानां भूमीनां क्रमशो भवेत् ॥ २३ ॥
अष्टाशामिहिरैस्त्रिधायतितदर्धव्यासपादोच्छ्रिता
यद्वार्काहियुगैर्मिता ततिवितत्युत्सेधवाल्लोऽङ्गुलैः(?)।
मार्तिक्यः पुटपाकलोहितरुचः शैल्योऽथवाष्टेष्टकाः
कर्तव्याश्चतुरस्रिताश्चतुरुपेता वा गृहौचित्यतः ॥ २४½ ॥
नवसंख्यामते पूर्वादीशान्तं मध्यतस्तथा ।
पञ्चपक्षे न्यसेत् पूर्वाद्युत्तरान्तं च मध्यतः ॥ २५½ ॥
प्रादक्षिण्यक्रमादेव पूर्वाग्रं चोत्तराग्रकम् ।
शैल्यो वा ऋजवः सर्वा निम्नोन्नतविवर्जिताः ॥ २६½ ॥

कृत्वा कोष्ठचतुष्टयं प्रणिहितस्तुर्यश्रमुर्वीतले
कोष्ठे वह्निदिगाश्रिते पवनके पूर्वाग्रसूत्रे लिखेत्।
सौम्याग्रे पिशिताशनेश्वरदिशि व्यासे च सूत्रे लिखेत्
कोष्ठेष्वेषु निधापयेच्च युगला द्वन्द्वास्थितोष्विष्टकाः॥ २८॥

अष्टौ चेत् प्रथमेष्टकाश्च विधिवत् संस्थापयेद् बुद्धिमान्
प्रादक्षिण्यविधानतः शतमखादीशान्तिमाशास्वपि।
निम्नं चोन्नतमभ्युदीक्ष्य च समं संस्थापयेत् ताः पुन-
र्निम्ने दुःखमथोन्नते च महतीं भीतिं विधत्ते नृपात्॥ २९॥

विन्यस्य चैवं पुनरिष्टकां च गन्धोदकैः संपरिपूर्य गर्तम्।
कृत्वा प्रसूनानि परीक्षयेच्च निक्षिप्य चावर्तमथाक्षतानि॥

तद् दक्षिणावर्तमतीव शस्तं वामं तु निन्द्यं खलु दुःखदत्वात्।
शाल्यादिभिः क्षेत्रजमृत्तिकाभिस्तन्मध्यगर्तं परिपूर्य रक्षेत्॥

अथ गर्भ—

कुर्यात्पात्रं ताम्रकल्पं समं च तद्विस्तारं चायतं चात्र कक्ष्ये।
अष्टाङ्गुलं चार्धसमुच्छ्रितं तत् पादोनमूर्ध्वे विहितोच्छ्रयं च॥
हस्तायतं पात्रमथोत्तमं स्यात् त्रैराशिकेनोच्छ्रयमत्र कल्प्यम्।
तथा पिधानस्य समुच्छ्रयं च करोतु मन्त्री विहितं क्रमेण॥

स्तम्भायामद्वादशांशोपपन्न-
व्यासं व्यासार्धोच्छ्रयं गर्भपात्रम्।
तुर्यश्रं तच्छुद्धशुल्वप्रकल्पं
स्वोत्सेधाङ्घ्र्यूनोच्छ्रयोर्ध्वच्छदाढ्यम्॥ ३४॥

ताम्रभाजनविस्तारं पञ्चधा परिकीर्तितम् ।
रत्निद्वादशपङ्क्त्यष्टचतुरङ्गुलमानतः ॥ ३५ ॥
उन्नतं तारतोर्ध्वं स्यात् तदर्धं वा त्रिपादकम् ।
पिधानस्योच्छ्रयं तद्वद् विस्तारसममायतम् ॥ ३६ ॥
अथ वामसमोत्सेधमुत्तमं त्विति केचन ।
पादहीनं मध्यमं स्यादधमं त्वर्धतुङ्गकम् ॥ ३७ ॥
विस्तारस्य चतुर्थांशोऽप्युच्छ्रयं कोष्ठभित्तिषु ।
त्रिभागैकं तु + + + पिधानोच्चमथापि वा ॥ ३८ ॥
त्रिचतुर्मात्रविस्ताराद् द्विद्व्यङ्गुलविवर्धनात् ।
पञ्चषड्विंशदङ्गुल्यन्तं स्यात् पात्रस्य विस्तृतिः ॥ ३९ ॥
समोच्चं वाष्टषट्पञ्चभागोनं वा समुच्छ्रयम् ।
गृहीतोच्चत्रिभागैकं कोष्ठमित्युच्छ्रयं भवेत् ॥ ४० ॥
तत्तद्भर्याङ्घ्रिविस्तारसमं वाष्टांशहीनकम् ।
त्रिपादं वा विशालं तद्वेलायाः प्राग्विवोच्छ्रयः ॥ ४१ ॥
तद्भित्तेस्तु घनं कुर्याद् यवैर्द्वित्रिचतुष्टयैः ।
अथ विस्तारतो भित्तेर्घनं विंशतिभागतः ॥ ४२ ॥
अम्बुराशिमृदा वाथ कुर्यात् तत्कोष्ठभित्तिकम् ।
येन यत् कर्म निष्पाद्यं तेन तद् गृहगर्भकम् ॥ ४३ ॥
तुर्यश्रं वाथ वृत्तं वा मण्डपाकृति वा पुनः ।
देवतालसमं गर्भपात्रं स्याद् बलिपीठके ॥ ४४ ॥
समं त्रिपादमर्धं वा तारं तद्वलमुच्छ्रयम् ।
पीठस्य मध्ये संस्थाप्यं तत्तत्स्थानेऽपि वा पुनः ॥ ४५ ॥

कृत्वा पात्रं तु रत्नादीन् निक्षिप्य विधिवत्तथा ।
यानि यस्य स्वचिह्नानि तानि तत्र समर्पयेत् ॥ ४६ ॥

एवं कृत्वा गर्भपात्रं विन्यसेदिष्टकाचिते ।
रक्षिते विधिवत् पूर्वं गर्ते शुद्धविलग्नके ॥ ४७ ॥

चतुरश्रीकृताकारा वृक्षपाषाणनिर्मिता ।
पात्रद्विगुणविस्तारा पञ्चाङ्गुलघनान्विता ॥ ४८ ॥

प्रतिमाफलका या सा स्थाप्या तद्भाजनोपरि ।
तदूर्ध्वे स्थापयेत् स्तम्भं संश्लिष्टचतुरिष्टकम् ॥ ४९ ॥

उग्रादीनां तु सर्वेषां तत्तत्स्थाने विशेषतः ।
गर्भमादौ विनिक्षिप्य बिम्बं तदुपरि न्यसेत् ॥ ५० ॥

शिलेष्टकाचिते खाते संरक्षेद् वापिकादिषु ॥ ५०½ ॥

अमरनरविमानद्वारयोगाङ्घ्रिमूले
विधिवदविकलाङ्गं गर्भमादौ निधाय ।
तदुपरि विधिनास्मिन् योगमङ्घ्रिं च पूर्वं
सकलविभवयुक्तं स्थापयेद् गर्भमूर्ध्नि ॥ ५१½ ॥

स्वस्य स्वग्रामकेरप्रभृतिनिजजनस्यापि संपत्प्रसूत्यै (?)
गर्भाधानमितीदृशात्मनि सुखं संस्मार्य कर्ता स्वयम् ।
कारून् कर्मकरान् विभाव्य कनकैः सन्तोष्य रात्रौ गुरुं
प्रासादं सुदृढं च तक्षकवरैरभ्युज्ज्वलं कारयेत् ॥ ५२½ ॥

इति शिल्परत्ने गर्भस्थापनं नाम

द्वादशोऽध्यायः ।

अथ त्रयोदशोऽध्यायः ।

अवास्तुकार्मणज्ञानम् ।

मर्मादीनि निषिद्धानि वास्तुकर्मण्यनेकधा ।
सन्ति संक्षेपतस्तानि द्विधा वक्ष्यामि सांप्रतम् ॥ १ ॥

नाड्यः स्युर्दश पूर्वसौम्यमुखगा वास्तौ स्थिताः कल्पिते-
ष्वेकाशीतिपदेषु कर्णनिहिते सूत्रे लिखेत् तद्व्रते ।
पश्चात् षट्त्रिपदस्थिता श्रुतिः + + पार्श्वस्थिता रज्जवो
मर्मादीनि विभज्य वच्मि बहुधा तन्नाडिका रज्जुभिः ॥ २ ॥

धर्मा यशोवती भद्रा शुभदा कामदा शुभा ।
चित्रा सौम्या सुधा गौरी नाड्यः प्रागानना दश ॥ ३ ॥

अमृता वारुणी शान्ता ह्लादिनी ब्रह्मवादिनी ।
मनोरमा रतिः कान्ता ज्वालिनीशोत्तरानना ॥ ४ ॥

दक्षिणादिक्रमाज्ज्ञेया तद्रज्जुयुतिषु क्रमात् ।
अष्टाभिः सङ्गतिर्यत्र नाडीरज्जुविमिश्रितैः ॥ ५ ॥

सूत्रैस्तत्र महामर्म ब्रह्मस्थानस्य कोणतः ।
प्रत्येकं दिक्षु षट्कानि त्रिकाणां सन्ति पार्श्वतः ॥ ६ ॥

नाडीद्वयसमायोगान्युपमर्माणि तानि तु ।
चतुर्विंशच्चतुष्काणि नाडीमर्माणि सन्ति च ॥ ७ ॥

रज्जुमर्माणि रज्जुभ्यां चतुष्कं नवकं भवेत् ।
कोणस्तम्भगमर्मान्तं त्रिकं बाह्ये विनिर्दिशेत् ॥ ८ ॥

षट्कं च मर्मसंभेदं कृतिं पण्णां वदन्ति हि ।
पञ्चकं मर्मसन्धिश्च द्वे द्वे दिक्षु चतुर्ष्वपि ॥ ९ ॥

मध्यस्थितं मर्मरज्जुभ्यां + दोषवर्जितम् ॥ ९३ ॥

स्थानान्येतानि वास्तोर्गृहकरणविधौ पीडयेन्नैव विद्वान्
पीडा स्यात् पीडितेषु क्षितिपतिविषयब्राह्मणानां पशूनाम्।
तत्कर्तुः शिल्पिनां वा सतनयवनिताभ्रातृसंबन्धिनां च
स्वस्थाः स्युस्तेन विद्धे पृथगथ विहितान् वच्मि दोषान् विभज्य॥

मूर्ध्नि वक्त्रे च कर्णे च हृदये मरणं भवेत्।
विद्धे चोरसि हृद्रोगं पादयोः कलहस्तथा ॥ ११½ ॥

ललाटे भ्रातृहानिः स्याद् वित्तहाङ्गुलिपृष्ठयोः।
ऊर्वोर्मृत्युस्तु बन्धूनां पत्नीनाशस्तु वा भवेत् ॥ १२½ ॥

गुह्ये तु सुतहानिः स्यादष्टके गर्भविच्युतिः।
षट्के च वृद्धिः शत्रूणां चतुष्के च गजक्षयः ॥ १३½ ॥

पञ्चके व्याधिरुद्दिष्टस्तस्करेभ्यस्त्रिके भयम्।
वर्जयेत् कुड्यमध्ये च स्तम्भमध्यादिषु त्विदम् ॥ १४½ ॥

उक्तानुक्तं च यत्किञ्चित् प्रमादाद् यदि संभवेत्।
एतानि दोषशान्त्यर्थं निधनेद्वास्तुकर्मणि ॥ १५½ ॥

सिंहमातङ्गमहिषकिटिकूर्मशिरांसि च।
शुद्धहाटककल्पितानि कर्तुः सौख्यविवृद्धये ॥ १६½ ॥

प्रकारान्तरं —

वक्ष्ये चतुष्पष्टिपदेषु मर्म कोणस्थसूत्रे विलिखेत् सिराख्ये।
पूर्वाग्रसौम्याग्रगताश्च वंशाः सिराख्ययोः पार्श्वगतानुवंशाः ॥
माहेन्द्रधर्मेशपदप्रविष्टा गृहक्षताब्धीशपदस्थिताश्च।
पुष्पादिदन्तेन्दुपदस्थिताश्च फल्गाटमित्राभिधकोष्ठसंस्थाः ॥

तिस्रो रेखाश्चतुर्दिक्षु बाह्यस्थाः सन्धयः स्मृताः ।
मर्माणि सूत्रसन्धीनि चोपमर्म पदास्थितम् ॥ १९½ ॥
मूर्ध्नि वक्त्रे च नाभौ च महामर्म स्तने मृतिः ।
अनुवंशद्वयस्यापि सन्धिर्लाङ्गलमुच्यते ॥ २०½ ॥
गवां नाशः शिरोवेधे वंशवेधे मृतिं वदेत् ।
प्रवासः सन्धिवेधे स्यादनुवंशे भयं भवेत् ॥ २१½ ॥
पदस्य गृहकृत्यंशं सूत्रं स्याद् वेदषष्टिके ।
एकाशीतिपदेऽर्कांशं + + वसंशकके पदे(?) ॥ २२½ ॥
प्राग्गुदक्सूत्रमानेन नीत्वाङ्घ्रिं भुजवंशयोः ।
अन्तरा स्थापयेद् गर्भं सस्वचिह्नं प्रयत्नतः ॥ २३½ ॥

इति शिल्परत्ने वास्तुमर्मविधानं नाम
त्रयोदशोऽध्यायः ।

अथ चतुर्दशोऽध्यायः ।

अथ प्रासादादिकरणे द्रव्यविधिः ।

शिलेष्टकासुधादारुमृत्स्नामृल्लोष्टलोहकाः ।
एते विमानकरणे दिव्यत्वेन निरूपिताः ॥ १ ॥

शिलालक्षणम् ।

चण्डालपुल्कसव्याधपुलिन्दाद्यैर्विदूषिताः ।
वल्मीकाहिश्मशानाढ्या निन्द्या भूरपि तच्छिला ॥ २ ॥
भूपरिग्रहणे पूर्वं निन्दिता याश्च भूमयः ।
तद्गताश्च शिलाः सम्यग्वर्जिता गृहकर्मणि ॥ ३ ॥

कोणशीर्षा शिला ज्ञाज्या भर्तुर्दुःखकरी यतः ।
अनिलानलभूयिष्ठां शिलां (लि)ङ्गादिषु त्यजेत् ॥ ४ ॥

वल्मीकचैत्यशवरोपितचत्वरस्था
क्षाराम्बुसिक्तशिखिसूर्यहता विदिक्स्था ।
रेखान्वितान्यविनियुक्तविवर्णरूक्षा
निन्द्या शिलात्र बहुवर्णसमन्विता च ॥ ५ ॥

काकश्येनवृकोष्ट्रवानरनिभा मार्जारगृध्रोपमाः
सर्पोलूकसृगालकीटसदृशाः कोलत्वभेकोपमाः ।
रेखास्तिर्यगवस्थिताश्च सकलाश्चान्याश्च दोषावहाः
सन्त्यज्य प्रतिगृह्य शोभनशिलां लिङ्गादिकं कारयेत् ॥

विच्छिन्नाभिर्वर्जनीया शिला स्याद्
रेखाभिः सा चान्विता सर्ववर्णैः ।
वक्रा स्थूला चातिसूक्ष्मा कृशा च
रेखा यस्या वर्जनीया हि सा च ॥ ७ ॥

शस्त्रासहा पेलवकर्दमाभा मृद्वी च बाला तरुपल्लवाभा ।
भुजङ्गनिर्मोकनिभातिरूक्षा वृद्धा शिला जर्जरसंस्थिता च ॥

नानावर्णा स्थूलरेखातिरूक्षा
धूम्राभा या स्थूलवर्णा शिला स्यात् ।
चण्डाली सा सर्वतो वर्जनीया
शस्ता भूयः मर्तयिष्ये (?) शिलाश्च ॥ ९ ॥

दुष्टेदेशसमुद्भवा + परिशिष्टा दुर्गृहाद्याश्रिता
वाना + न्यकरागतातिविपुला बाला च वृद्धा सती ।

दुर्लेखाक्षरगर्भमण्डलयुता रूक्षस्वरा जर्जरा
दुःस्पर्शापदिशं निवेशितशिरोदेशा विवर्ज्या शिला ॥ १०॥
सिद्धाद्याकरसम्भवा वसुमतीमग्ना स्ववर्णोचिता
स्निग्धा शस्त्रसहा गभीरनिनदा दिश्याहिताग्रा शिला ।
ग्राह्या बिम्बविधौ स्फुलिङ्गबहुला तस्याच्छिरोधोमुखा (?)
यत्काष्ठाभिमुखी समुत्थितवती स्थाप्या च तद्दिङ्मुखीम् ॥

पुण्योद्यानक्षेत्रतीर्थह्रदस्था
वृक्षच्छायाशीतला श्लिष्टकाया ।
स्निग्धा घण्टानिःस्वनाप्याज्यगन्धा
विस्तीर्णा स्याल्लिङ्गकार्ये प्रसिद्धा ॥ १२ ॥

श्वेता पङ्कजसन्निभा द्विजशिला तस्याः शशी देवता
राजा रक्तशिला कुलस्थसदृशा शक्रस्तु तद्देवता ।
पीता वैश्यशिला तथैव हरिता तस्या भगो देवता
कृष्णा शूद्रशिला च मुत्+सदृशा तत्राश्विनौ देवता ॥

चतुर्णामपि वर्णानामेता मुख्याः स्वकाः शिलाः ।
अलाभे सर्ववर्णानामासामेकतमा भवेत् ॥ १४ ॥

गुर्वी धीररवा स्फुलिङ्गबहुला न्यग्रोधबोधिच्छद-
प्रख्या बिम्ब(विधौ) विशालबहुला ग्राह्या शिला पौरुषी।
रम्भापत्रनिभा न चातिबहुला स्निग्धस्वना शीतला
स्त्रैणी पीठविधौ द्विलक्ष्मभिदुरा क्लैबी पदाब्जार्पणे ॥१५॥

पूर्वोत्तरशिरोयुक्ता घण्टानादस्फुलिङ्गवत् ।
छेदे सा पंशिला लिङ्गयोग्या वक्ता तदायता ॥ १६ ॥

चतुरश्रा च दीर्घाश्रा स्त्रीशिला पीठिकोचिता।
त्र्यश्रा तदायता पण्डा ज्ञेया पादशिलोचिता ॥ १७ ॥

नन्द्यावर्तवसुन्धराधरहयश्रीवत्सकूर्मोपमाः
शङ्खस्वस्तिकहरितगोवृषनिभाः शक्रेन्दुसूर्योपमाः।
छत्रस्रग्ध्वजलिङ्गतोरणमृगप्रासादपद्मोपमा
वज्राभा गरुडोपमाश्च शुभदा रेखाः कपर्दोपमाः ॥ १८ ॥

विप्रादीनां वर्णभेदाश्च रेखा
श्वेता रक्ता पीतकृष्णे प्रशस्ताः।
रेखा यस्यां देवराजायुधाभा
ग्राह्या सा स्यात् सर्ववर्णैः शिला स्यात् ॥ १९ ॥

अग्नेश्च बीजं पवनस्य बीजं भूयः स्वराण्यत्र नपुंसकानि।
एताः प्रशस्ताः शुभदाः समस्ता रेखास्तु लिङ्गेक्षतुल्यताया(?)

एवं परीक्ष्य च शिलां समवेक्ष्य शास्तां
प्रक्षाल्य तोयैर्बहुशः प्रयत्नात्।
गर्भाणि लेप्यविधिनापि च मण्डलानि
तज्ज्ञो गुरुर्ज्ञातुमथार्हतीह ॥ २१ ॥

तुल्यांशः क्षीरपिष्टैस्तु विषकासीसगैरिकैः।
दृषदालिप्य निःशेषमेकरात्रोषितं ततः ॥ २२ ॥
प्रक्षाल्य गर्भान् दोषांश्च मण्डलैस्तत्र रक्षयेत्।
मञ्जिष्ठाभे मण्डले दुर्दुरः स्यात्
पीते गोधा कापिले मूषिकाश्च।
कृष्णे सर्पः पाण्डरे चेति केचित्
कापोताभे गोलिको वृश्चिको वा ॥ २३ ॥

रक्ते तु कृकलासः स्यात् खद्योतो मधुसन्निभे ।
मिश्रे पिपीलिका गर्भः शस्त्राभे धूसरे दंशत् ॥ २४ ॥

गौरे तु विमला धूम्रे पतङ्गः सिकतायवा ।
नीलपीते भवेत् कूर्मो गर्भदोषान् वदाम्यतः ॥ २५ ॥

कपोतवर्णे गृहगौलिका स्यादागुणश्च (?) गर्भः कपिले प्रशस्तः ।
रक्ते प्रदिष्टः कृकलासगर्भः पाषाणगर्भो गुळसन्निभे च ॥ २६ ।

कुलीरगर्भो हरितालवर्णे स्याच्चम्पकाभे शवले कृमिश्च ।
गर्भस्य रूक्षे सिकतः प्रशस्तो वर्णे विचित्रे सति वृश्चिकश्च ॥

रक्ते विचित्रे शफरस्य गर्भः पीते विचित्रे पतगः प्रदिष्टः ।
गर्भः कुसुम्भप्रतिमे षडङ्घ्रिः भस्मोपमाने सुषिरं वदन्ति ॥

स्यान्मण्डले किंशुकपुष्पवर्णे वृत्रारिगोपश्च पिपीलिका वा ।
तत्रातसीपुष्पसमानवर्णे निर्पी(त)र्णे (?) सति माक्षिकाः स्युः ॥

छेदने दृश्यते यत्र मण्डलं तत्र निर्दिशेत् ।
मण्डलं यादृशं दृष्टं तादृशं गर्भमेव च ॥ ३० ॥

एवंविधैर्व्यापितलक्षणैश्च गर्भं विधायाविधिवत् परीक्ष्य ।
बाह्येऽप्यदृष्टे सति लक्षणेऽस्मिन् लेपं विदध्यात् प्रवदामि तत्तत् ॥

ब्रह्माणं चक्रपाणिं कुसुमशररिपुं वैष्णवं पेषयित्वा
क्षीरेणाज्येन सम्यक् समघृतमधुना लेपयेत् तं शिलां च
लिप्ता क्लिन्ना समस्ताद् भवति यदि शिला प्रोषिता चैकरात्रं
जानीयात् तत्र गर्भे फणिपतिरथवा वृश्चिको वाथ गोधा ॥

कासीतचोरौ गोक्षीरे पिष्टा चालिप्य या शिला।
त्रिरात्रमुषिता रक्ता स्याच्चेत् कूर्मोऽत्र निश्चयः॥ ३३॥

मांसीकुष्ठगयारात्रिं त्रिफलावारिदाम्बुभिः।
पिष्ट्वा तस्यार्द्रितं लिम्पेत् त्रिरात्राद् विकृतिर्यदि॥ ३४॥

गर्भं तु कालकूटाख्यं विषं तत्र विनिर्दिशेत्।
तस्य स्पर्शेन मृत्युः स्याद् यतोऽतस्तं न संस्पृशेत्॥ ३५॥

मांसीरोगहयारिवारिदजलैः सार्धं पलानां त्रयं
पिष्ट्वा वामविलोचनास्तनभुवा क्षीरेण तां लेपयेत्।
लिप्त्वा सा च शिला यदि त्रिदिवसैर्वर्णान्तरत्वं व्रजेत्
तत्र स्याद् विषमाशुनाशजनकं हस्तेन तं न स्पृशेत्॥ ३६॥

तोये भीतिं दर्दुरे संविधत्ते गोधा राज्ञो नाशनं गोक्षयं च।
कर्तुर्वेशं नाशयेन्नागगर्भो मारीं तस्मिन् संविधत्ते सदेशे॥ ३७॥

कर्तुर्मृतिं गर्भविनाशनं च स्त्रीणां विधत्ते सलिलाख्यगर्भः।
खद्योतगर्भस्तु भयं च वह्नौ द्वैविध्यमुग्रं गृहगोलिकश्चेत्॥

आखुर्भयं तस्करजं विधत्ते दुर्भिक्षमुग्रं कृकलासगर्भः।
नाशं च वृष्टेरुपलाख्यगर्भः सस्यप्रणाशं च कुलीरगर्भः॥

कुष्ठं विधत्ते कृमिरेव कर्तुश्चौर्यं च कुर्यात् सिकता समन्तात्।
शूलं विदध्यादथ वृश्चिकाख्यो द्रव्यस्य नाशं शफरो विधत्ते॥

स्थानस्य नाशं कुरुते पतङ्गो व्याधिं षडङ्घ्रिस्तु बहूंश्च रोगान्।
तद्वच्च कुर्यात् सुषिरो हि रोगं नाशं धनानामथ शक्रगोपः॥

चिन्तां विधत्ते च पिपीलिकश्चेत् कर्तुः प्रवासं त्वथ माक्षिकश्च ।
कूर्मश्च रोगान् भयमप्युदग्रं वृष्टेर्विनाशं कुरुते विषश्च ॥ ४२ ॥

एवं परीक्ष्य बहुधा विहायाशुभलक्षणाम् ।
शुभां यथेष्टमानेन छित्वा पृष्ठं मुखं तथा ॥ ४३ ॥
मूलं चाग्रं च विज्ञाय अङ्कयित्वा नयेच्च ताम् ॥ ४४ ॥

अथेष्टकाविधिः ।

चिक्कणा पाण्डराख्या च सलोणा च विगर्हिता ।
चतुर्थी ताम्रफुल्ला तु कर्मयोग्यमृदिष्यते ॥ ४५ ॥
तुषाङ्गारास्थिपाषाणशर्कराकाष्ठलोष्टकैः ।
वर्जिता सूक्ष्मसिकता ताम्रफुल्लेष्टकोचिता ॥ ४६ ॥
तां प्रक्षिप्यावटे मृत्स्नां जानुदघ्नं जलं क्षिपेत् ।
आलोड्य पद्भिः संक्षोभ्य मर्दयेत् तां पुनः पुनः ॥ ४७ ॥
ततः क्षीरागरैरीषत्त्वक्काथत्रिफलाम्बुभिः ।
मर्दयेन्मासमात्रं तु तत्कर्मकुशलैर्नरैः ॥ ४८ ॥
इष्टकाः कारयेत् सम्यग् द्वादशाङ्गुलकायताः ।
तदर्धविस्तृताः प्रायो व्यासरामांशकोन्नताः ॥ ४९ ॥
त्रिपादोनास्ततो वा स्युः पूर्वसौम्यदिगग्रकाः ।
अधः पृष्ठाश्चोर्ध्ववक्राः कुर्युस्ते शिल्पकोविदाः ॥ ५० ॥
मूलाग्रादीन्यङ्कयित्वा घर्मे ताः परिशोषयेत् ।
अथ शुष्के सुलग्नादौ चुल्लीकृत्यानुमारुतम् ॥ ५१ ॥
तत्रेष्टकाः सुसन्दध्यात् सान्तरं क्रमशश्चिताः ।
काष्ठैः पलालभाराद्यैराचिताः स्युर्निरन्तरम् ॥ ५२ ॥

बहिराच्छादयेत् सम्यङ् मृत्स्नया मृदु लेपयेत् ।
तन्मुखेष्वग्निमाधाय दशाहं पक्षमेव वा ॥ ५३ ॥
संस्कृत्य ज्वलने शान्ते समुद्धृत्येष्टकास्ततः ।
प्रक्षिप्य सलिले वर्षमष्टौ मासान् षडेव वा ॥ ५४ ॥
उद्धरेदिष्टकास्ताः स्युर्विमानादिक्रियोचिताः ।
स्थूलमूलेष्टका स्त्री स्यादग्रस्थूला नपुंसकाः ॥ ५५ ॥
सर्वत्र समविस्तारास्तुल्याः स्युः पुरुषेष्टकाः ।
अथवा यमरेखाः स्युर्ऋजवश्चेत् पुमानथ ॥ ५६ ॥
वक्राश्चेद् युग्मरेखाः सा स्त्रीलिङ्गाख्या प्रकीर्तिता ।
युग्मरेखास्त्वयुग्मं वा कर्णाभाश्चेन्नपुंसकाः ॥ ५७ ॥
ईषदुन्नतगं मूलं नतं वाग्रमुदाहृतम् ।

अथ सुधा ।

करालमुद्गीगुल्मासकल्कचिक्कणकाश्च याः ॥ ५८ ॥
चूर्णोपयुक्ताः पञ्चैते सुधाप्रकृतयो मताः ।
अभयाक्षर्षाजमात्राः शर्कराः सार्धचूर्णिताः ॥ ५९ ॥
ताः स्युः करालका मुद्गतुल्या याः क्षुद्रशर्कराः ।
सैव मुद्गीति कथ्यन्ते शिल्पशास्त्रविशारदैः ॥ ६० ॥
सार्धत्रिपादत्रिगुणकिञ्जल्कसिकतान्वितम् ।
चूर्णं तु शर्कराशुक्त्योर्यद् गुल्मासं तदुच्यते ॥ ६१ ॥
करालमुद्गयोः पूर्वोक्तमानेन सिकतान्वितम् ।
चणकस्य च चूर्णस्य यत् पिष्टं कल्कमिष्यते ॥ ६२ ॥

चिक्कणं केवलं काथं बद्धोदकमिति द्विधा ।
निश्छिद्रमिष्टमानेन क्षेत्रे त्विष्टकयाचिते ॥ ६३ ॥
पूर्वोक्तानां तु पञ्चानां विधातव्यं पृथक् पृथक् ।
तत्र तत्र तदुक्तेन द्रवेण परिमर्दयेत् ॥ ६४ ॥
केवलेनाम्भसा पूर्वं पूर्वोक्तांस्त्रीन् प्रमर्दयेत् ।
क्षीरद्रुमामलाक्षाणां कदम्बाभययोरपि ॥ ६५ ॥
त्वग्जलैस्त्रिफलातोयं माषजूषं च तत्समम् ।
संयम्य शर्कराशुक्त्योश्चूर्णं तत्काथवारिणि ॥ ६६ ॥
खुरसंघट्टनं कृत्वा स्रावयित्वाथ वाससा ।
चिक्कणं कल्पयेत् तेन बद्धोदमथ चोच्यते ॥ ६७ ॥
दधिदुग्धं माषजूषैर्गुलाज्यकदलीफलैः ।
नालिकेराम्रफलयोर्जलैश्चैतत् प्रकल्पितम् ॥ ६८ ॥
बद्धोदकं भवेत् तच्च समभागं नियोजयेत् ।
लब्धचूर्णशतांशं तु क्षौद्रमंशद्वयं भवेत् ॥ ६९ ॥
आज्यं तु कदलीपक्वं नालिकेराम्बुमाषयुक् ।
क्षीराङ्गत्वक्कषायं च क्षीरं दधि ततो गुलम् ॥ ७० ॥
पिच्छिलं त्रिफलाम्भश्च त्र्यंशादिकमिदं क्रमात् ।
अंशवृद्ध्या समायोज्य पूतपक्वाम्बुशक्तितः ॥ ७१ ॥
एकीकृत्य करालं च प्रक्षिपेद् दृढवेष्टितम् ।
अतीत्यैकदिनं पश्चादथैव घनतां भवेत् ॥ ७२ ॥
नालिकेरस्य शाखाभिर्दण्डैः संताडयेन्मुहुः ।
[illegible] ॥ ७३ ॥

युक्तं सङ्घट्टितं युक्त्या सुधा भवति शोभना ।
पूर्वं द्व्यंशं करालं मधुकृतकदलीनालिकेरान्वुमाप-
व्यूषं वाक्षाकषायस्तनजलधिगुलञ्चैकलाम्भांसि चैवम् ।
वृद्धाम्व्यंशैकमेण स्फुटशशिधवलं चूर्णयुक्तं शतांशं
पिष्टं सर्वं यथावद् भवति परसुधावज्जलेवस्तथैव ॥ ७४ ॥
चतुस्त्रिद्वयमासान्तमुष्टिका युक्तिमर्दिता ।
श्रेष्ठमध्योत्तमा ज्ञेया सुधा सौधादिबन्धिनी ॥ ७५ ॥

अथ दारु ।

वर्ज्यास्तु तरवः पूर्वं वक्ष्यन्ते ये सकोटराः ।
सवल्लिका लताश्लिष्टाः कीटजुष्टाः सकण्टकाः ॥ ७६ ॥
सत(त)पुष्पफलाढ्या वा नृदेवाग्निनाश्च ये ।
बहुपक्षिमृगैर्जुष्टाश्चैत्यमार्गदलस्थानजाः ॥ ७७ ॥
वक्राः शुष्काश्च ये भग्नाः सर्पभूतादिसंश्रयाः ।
सनीराः क्षीरवृक्षाश्च वायुवह्निविदूषिताः ॥ ७८ ॥
दन्तिदन्ताहताश्चैव विद्युत्पातनिपीडिताः ।
देवालयसमुद्भूता नदीसङ्गमसम्भवाः ॥ ७९ ॥
तटाककूपमध्यस्था एते वर्ज्याः सुखार्थिभिः ।
पलाशाः कुटजा लोध्रा बिल्वपीलुशिरीषकाः ॥ ८० ॥
श्लेष्मातककदम्बाश्च कोविदाराः सकिंशुकाः ।
पथ्याक्षामलकाः पार्थः सुमिस्रवरणा (?) अपि ॥ ८१ ॥

---

१. 'चु' ख. पाठः.

अम्बष्ठाः सप्तपर्णाश्च कारस्करविकङ्कटाः ।
न्यग्रोधोदुम्बराश्वत्थप्लक्षशाल्मलितिन्दुकाः ॥ ८२ ॥

नन्द्यावर्तश्च बदराः करवीराः कपित्थकाः ।
सर्पमारारिमेदाश्च पुत्रंजीवाः सदुण्डुकाः ॥ ८३ ॥

तिन्त्रिणीपाटलाशोककर्पूरागरुरञ्जनाः ।
अर्काश्च वर्जनीयाः स्युर्देवमानुषधामसु ॥ ८४ ॥

असारशाखिनः सर्वान् वर्जयेद् गृहकर्मणि ।
ऋजवः सारवन्तश्च दृढाश्च चिरजीविनः ॥ ८५ ॥

वर्षवातातपसहा जलस्थलभवाश्च ये ।
तत्तद्देशोचिताः शस्ता ग्राह्याः स्युः शुभधामसु ॥ ८६ ॥
ये पूर्वं वर्जिता वृक्षास्ते सर्वे देवतालये ।
शुभाय स्युर्विशेषेण मानुषाणामनर्थदाः ॥ ८७ ॥

प्रायशः क्षीरतरवो न मानुषगृहोचिताः ।
देवधामसु ते योग्याः सर्वेषां लिङ्गुपाः शुभाः ॥ ८८ ॥

शाकासनमधूकं च सालं सर्जं सचन्दनम् ।
पनसं देवदारुं च शंसन्ति गृहकर्मणि ॥ ८९ ॥

एकजात्या द्विजात्या वा त्रिजात्या वा महीरुहा ।
कारयेन्मन्दिरं राजा श्रियमिच्छन् महीयसीम् ॥ ९० ॥

अपत्रा निर्व्रणाः सर्वे ग्रहीतव्या महीरुहाः ।
पुण्याद्रिवनतीर्थस्था दर्शनीया मनोहराः ॥ ९१ ॥

सर्वसम्पत्समृद्ध्यर्थं भवेयुस्ते न संशयः ॥ ९२ ॥

खदिरः सालो मधुकः सवकस्तथैव शिंशपश्चैव।
तथार्जुनाकर्णौ(?)किरीणी च पद्मचन्दनौ वृक्षौ॥ ९३॥
विशिखो धन्वनः पिण्डी सिंहो राजादनः शमी।
तलकं च द्रुमाश्चैते स्तम्भे वृक्षाः समीरिताः॥ ९४॥
निम्बासनशिरीषाश्च शाखाकालं च कर्चलः।
तिमिसो लिकुचश्चैते + + + + + + + + + ॥ ९५॥
होमाश्चैतेऽखिले योग्या भेद्याश्छेद्याश्च भूरुहाः।
वृत्ताकारश्च मूलाग्राद् बहुशाखो दृढान्वितः॥ ९६॥
पुंवृक्षः स्यात् तरोः स्त्रीत्वं मूलस्थूलकृशाग्रता।
मूलाग्रयोः कृशाल्पत्वं मध्ये स्थौल्यं च षण्डता॥ ९७॥
मुहूर्तगर्भस्तम्भादीन् पुंवृक्षेणैव कारयेत्।
शेषकर्मसु सर्वेषु स्त्रीवृक्षश्चैव शस्यते॥ ९८॥
एवमन्विष्य तत्कर्म योग्यवृक्षं सलक्षणम्।
लब्ध्वा दद्याद् बलिं विद्वान् विधिवच्छेत्तुमारभेत्॥ ९९॥
अपक्रामन्तु भूतानि देवताश्च सगुह्यकाः।
युष्मभ्यं च बलिर्भूयात् तं मे दिशत पादपम्॥ १००॥
शिवमस्तु महीपुत्रास्तुभ्यं देवाः सगुह्यकाः।
कर्मैतत् साधयिष्यामि क्रियतां वासपर्ययः॥ १०१॥
एवमुक्त्वा नमस्कृत्य पादपेभ्यो नमोऽस्त्विति।
दुग्धं तैलघृतैः सम्यक् संमार्ज्य परशोर्मुखम्॥ १०२॥
सोपक्रामतु तं छेत्तुं यथाकामं वनस्पतिम्।
किञ्चिन्मात्रं तरोर्मूलं त्यक्त्वा छिन्द्या(त् त)दूर्ध्वतः॥ १०३॥

छेदे क्षीरस्रवे लग्ध्यै जलस्रावरतु सौख्यकृत् ।
रुधिरस्रावो विनाशाय कर्तुरिछन्द्यान्न तं तरुम् ॥ १०४ ॥

सिंहेभवृषभा शकलं तस्य निपते भूमौ पूर्वापरायतम्(?) ।
शुभमूर्ध्वमुखं छेत्तुं पूर्वाग्रमतिशोभनम् ॥ १०५ ॥

सवल्कलं विशेषेण सर्ववृद्धिप्रदं विदुः ।
अधोमुखं दक्षिणोत्तरायतं तं विवल्कलम् ॥ १०६ ॥

सर्वनाशकरं दक्षिणाग्रं चेत्तु विशेषतः ।
तदन्यथा निपतितं सर्वं मध्यममेव हि ॥ १०७ ॥

सिंहमातङ्गवृषध्वनात्(?) पतने तु शुभावहाः ।
हसिताक्रोशरुदितकूजितान्यशुभान्यतः ॥ १०८ ॥

तं वृक्षं वर्जयित्वान्यं गृहीत्वा शुभलक्षणम् ।
इन्द्रेशार्थदादिक्पातमुखा (वृक्षाः) सुशोभनाः ॥ १०९ ॥

अन्यथापतितस्त्याज्यो वृक्षः सः सर्वगर्हितः ।
वृक्षान्तरादौ सङ्गोऽपि विघ्नक्लेशकरोऽशुभः ॥ ११० ॥

पाते विहाय तच्छङ्कुं यस्य मूलेन गच्छति ।
सोऽपि निन्द्यो विघ्नकारी छिन्ना भिन्नास्तथैव च ॥ १११ ॥

शुभच्छेदाग्रपतनदारुमूलाग्रयोः समम् ।
इष्टप्रमाणतश्छित्वा तुर्यश्रं वाथ तक्षयेत् ॥ ११२ ॥

स्तम्भमुद्दिश्य + + + शुक्लेनाच्छाद्य वाससा ।
शकटादौ समारोप्य यथोद्देशं समाहरेत् ॥ ११३ ॥

देवद्विजनरेन्द्राणां विशां च शकटैर्गजैः।
दार्वाहरणनिष्टं स्यादन्येषां नृभिराहरेत्॥ ११४॥

प्रवेश्य शस्तढोरण शिल्पशालास्थले ततः।
वालुकासञ्चये दारुं शाययेत् पूर्वमस्तकम्॥ ११५॥

न परावर्तनं कुर्यादष्टपञ्चत्रिमासतः।
पश्चादिष्टप्रमाणेन भित्त्वा ककचकोटिना॥ ११६॥

अन्तर्मुखं वहिःपृष्ठं प्रकल्प्याग्राङ्कमुन्नयेत्।
मूले चाग्रे तथा कृत्वा त्रान्तरमुन्नयेत्(?)॥ ११७॥

मूले चाग्रे तथा कृत्वा तक्षणादि समाचरेत्।

अथ मृन्मा।

इष्टकालोष्टकरणप्रोक्ता (चो)न्मर्दिता मुहुः॥ ११८॥

मृन्मा सा पूजिता तज्ज्ञैः सर्वकर्मसुखप्रदा।

अथ मृल्लोष्टकरणम्।

इष्टकोक्तमृदा तद्वन्मृल्लोष्टकरणं स्मृतम्॥ ११९॥

लोष्टानि कल्पयेत् सम्यक् तेषां लक्षणमुच्यते।
नीम्रलोष्टं तूर्ध्वलोष्टं तुर्यश्रं क्रूरलोष्टकम्॥ १२०॥

द्व्यश्रलोष्टं कीललोष्टं कृशरथूलाग्रलोष्टके।
गर्तकोणं कोणलोष्टं पुटलोष्टं तथैव च॥ १२१॥

लोष्टान्येकादशैतेषामायामादिकमुच्यते।
नीम्रपट्टयास्तु विस्तारचतुरङ्गुलसंयुतम्॥ १२२॥

आयामं नीम्रलोष्टस्य कीर्तितं लोष्टवेदिभिः।
विस्तारं द्व्यङ्गुलं कार्यं बहलं तारपाटतः॥ १२३॥

तदर्धमग्रबाहल्यं सर्वेषां पर्ववच्छिरः ।
स्वस्वा(ग्रब)हलैस्तुल्यं पर्योच्चं बहलं तथा ॥ १२४ ॥
आयाममूर्ध्वलोष्टस्य द्वादशाङ्गुलमिष्यते ।
तत्त्रिभागैकविस्तारं पञ्चवं बहलं विदुः ॥ १२५ ॥
अस्य मूलाग्रयोर्भेदं पर्व + चापि विद्यते ।
पुटाख्यगर्तकोणानां बहलं नीप्रलोष्टवत् ॥ १२६ ॥
आयामं वसुमात्रं स्याद् विस्तारमथ कथ्यते ।
युगाङ्गुलं पुटामूलं तदग्रं सार्धमात्रकम् ॥ १२७ ॥
मूलं तु गर्तकोटीनां सार्धमात्रमुदाहृतम् ।
चतुरङ्गुलमग्रं स्याद् व्यासमेवं प्रकीर्तितम् ॥ १२८ ॥
अष्टाङ्गुलं कोणमूलमग्रं सार्धाङ्गुलं विदुः ।
कूर(ङ्य ? द्य)श्रकतुर्यश्रेष्वायामं वसुमात्रकम् ॥ १२९ ॥
विस्तारं द्व्यङ्गुलं प्रोक्तं बहलं त्रियवं मतम् ।
नीप्रादीनां तु पञ्चानां भेदाः कीलादिकं त्रयम् ॥१३०॥
स्वस्वतारार्धविस्तारं कीललोष्टमुदाहृतम् ।
तत्तत्तारार्धताराग्रं कृशाग्रमिति कीर्तितम् ॥ १३१ ॥
तत्तत्तारार्धमूलं यत् स्थूलाग्रं तदुदाहृतम् ।
अथ दारुमयं लोष्टमुक्तलक्षणसंयुतम् ॥ १३२ ॥
कृतमेकाङ्गुलघनं सर्वेषां साधनं तु तत् ।
आमूलाग्रं विधातव्यं सूत्रं कूरस्य मध्यमे ॥ १३३ ॥
मूलात् तारार्धकं नीत्वा तिर्यक् सूत्रं समालिखेत् ।

कर्णयुग्मं तद्बहिष्टं कूरे लाञ्छ्यं तु पार्श्वयोः।
व्यश्रव्यासेऽब्धिसम्भक्ते त्रीणि सूत्राणि पातयेत् ॥ १३५॥
मूलात् ताराङ्किकं नीत्वा तिर्यक्सूत्रं च पातयेत्।
तिर्यङ्मूलाग्रयोगेन पार्श्वस्याग्रयुतं लिखेत् ॥ १३६ ॥
कर्णं तदग्रादारभ्य तिर्यङ्मध्ययुतायुतम्।
कर्णसूत्रं बहिर्भागं सर्वं व्यश्रे लजेदतः॥ १३७ ॥
एवं कृत्वा साधनानि मृत्स्नां संपाद्य बुद्धिमान्।
भस्मनोद्धूलितं कृत्वा फलकामपि साधनम् ॥ १३८ ॥
मृत्स्नां प्रसारयेत् तस्यां यथोक्तं बहलं पुनः।
लोष्टायामततां तत्र यथालाभाय तां पुनः ॥ १३९ ॥
सन्ताड्य च समीकृत्य तस्यां विन्यस्य साधनम्।
तिर्यक् तदग्रे कृत्वा च परितः शस्त्रधारया ॥ १४० ॥
छिन्द्यात् पार्श्वं च मूलं च सर्वत्रैवं विधिः स्मृतः।
ईषच्छुष्कां तु चोद्धृत्य पश्चात् सन्ताडयेत् स्वयम्॥ १४१॥
ऊर्ध्वलोष्टं कोणलोष्टमन्तर्वक्रं तु कारयेत्।
गर्तकोणं बहिर्भागवक्रं वाथ विवक्रकम् ॥ १४२ ॥
कोणपारावतं कुर्यात् स्तूप्याच्छादनकानि च।
कालपाकेन शुष्काणां तेषां दाहं च कारयेत्॥ १४३ ॥
अविद्धेक्षं मुलमादौ चुल्लीं कृत्वेष्टकोक्तवत्।
अथवान्यप्रकारेण तेषां दाहं च कारयेत्॥ १४४ ॥
अविद्धेक्षं मुलमादौ चुल्लीं कृत्वेष्टकोक्तवत्।
अथवान्यप्रकारेण लोष्टदाहो विधीयते। १४५ ॥

शुक्लचिह्नादिशाखामिरारतीर्यं सुमुहूर्तके ।
इन्धनानि च विन्यस्य पलालानि च विन्यसेत् ॥१४६॥
तस्मिन् लोष्टानि विन्यस्य पलालैश्छादयेत् पुनः ।
पलालाभावकैः पश्चाद् व्रीह्याभावैस्तुषैस्तथा ॥ १४७ ॥
आच्छाद्याग्निरथासिञ्चेच्छाखाः प्रज्वालयेत् पुनः ।
उद्धृत्य ज्वलने शान्ते जले क्षिप्त्वोद्धरेत् क्रमात् ॥ १४८ ॥

अथ लोहाः ।

कीलशूलादिनिर्माणे लोहः कृष्णः प्रशस्यते ।
सुवर्णं रजतं ताम्रं पूजितं लोष्टकर्मणि ॥ १४९ ॥
कांस्यपित्तलकादीनि मध्यमानीरितानि हि ।
स्तूप्याच्छादनके सर्वमिष्टं कृष्णविवर्जितम् ॥ १५० ॥
वर्तीमुकुलपुष्पादिकरणे निखिलाः शुभाः ।
बिम्बपीठादिकरणे शस्तं वक्ष्यामि तद्विधौ ॥ १५१ ॥

इति शिल्परत्ने शिलादार्वादिसाधनलक्षणं नाम
चतुर्दशोऽध्यायः ।

अथ पञ्चदशोऽध्यायः ।

अधिष्ठानादिलक्षणम् ।

अन्यत्र कूपादिभ्योऽथ बहिर्योनिः प्रकीर्तितः ।
गृहाणां भित्तिमध्ये तु शालानां तु तथा भवेत् ॥ १ ॥
प्रासादानां तु बाह्ये तु मध्ये वा शयनासने ।
पादबाह्ये पादमध्ये सभामण्डपयोर्मितिः ॥ २ ॥

अन्तर्मध्ये च सालानां बाह्ये वा मानसूत्रकम्।
भित्त्यन्तर(स्य) मानेन मानयेत् सर्वधामसु ॥ ३ ॥
तथा बाह्येन मानेन भित्तिमध्येन वा पुनः।
भित्तिमध्यं द्विजातीनां न(रे)न्द्राणां तथैव च ॥ ४ ॥
विशामपि च शूद्राणामन्तर्भागमिति स्मृतम्।
बहिर्भागं तु देवानां मानसूत्रं बुधैरिदम् ॥ ५ ॥
मानसूत्रात् तु बाह्ये तु कूटकोष्ठादिनीप्रकम्।
एतद् विन्याससूत्राख्यं ह्योमाबाह्यगतं पुनः ॥ ६ ॥
अवसानाभिधं सूत्रमेवं सूत्रत्रयं स्मृतम्।
सभामण्डपशालानां भित्तिमध्यावसानकम् ॥ ७ ॥
भित्तिमध्याङ्घ्रिबाह्ये तन्मध्ये वाभ्यन्तरेऽपि वा।
भित्तिबाह्यगताङ्घ्रेस्तु बाह्य वाभ्यन्तरेऽपि वा ॥ ८ ॥
तदङ्घ्रिमध्यावधि वा मानसूत्रमुदाहृतम्।
भित्तिव्यासे तु भान्वंशे बाह्ये धात्वंशकं व्रजेत् ॥ ९ ॥
अभ्यन्तरे युगांशं तु तच्छेषं विस्तृतं भवेत्।
भित्तिमध्यगपादस्य पादस्थानेन संशयम्(?) ॥ १० ॥

नाहेऽष्टघ्ने हृतेऽर्कघ्निघनातिथियुगैः सप्तभिः शेष आयो
भान्यत्रावाप्तिरायुस्तिथिदिवसपती लोकनिघ्नेऽथ नागैः।
योनिः स्याच्छैलयुग्मैर्व्ययं उदधिहते (गोर्कतो?) भागराशी
तस्मिन्नृक्षघ्न(आयुर्दशताभिरधं?) नवघ्ने विप्रमुख्योऽब्धिभिः स्यात्

आयाधिक्यं व्ययतः संपाद्यं सर्वथान्यथापत्तिः।
नक्षत्रादिशुभत्वं ज्योतिश्शास्त्रादिभिः सुविज्ञेयम् ॥ १२

जन्म सम्पद् विपत् क्षेमः प्रत्यरः साधको वधः ।
मैत्रं परममैत्रं च जन्मेत्याद्यं पुनः पुनः ॥ १३ ॥

कर्तुर्जन्मर्क्षमारभ्य गणयित्वा विचिन्तयेत् ।
सम्पत्साधकमैत्राणि क्षेमं परममैत्रकम् ॥ १४ ॥

जन्माख्यं च शुभानि स्युरशुभानीतराणि तु ।
जन्माष्टमं विनाशाय ऋक्षं तदपि वर्जयेत् ॥ १५ ॥

गण्डान्तप्रमुखान् दोषानपि सर्वान् विवर्जयेत् ।
बालत्वं कौमारं यौवनमथ वार्धकं च निधनं च ॥ १६ ॥

पञ्च वयांस्येष्वन्त्यं नेष्टं शिष्टानि वास्तुनीष्टानि ।
मध्यमे बाल्यवार्धक्ये मरणं त्वधमाधमम् ॥ १७ ॥

अनुत्तमे तु कौमारयौवने वेति केचन ।
नन्दा भद्रा जया रिक्ता पूर्णेति तिथयः क्रमात् ॥ १८ ॥

तत्र रिक्ता विवर्ज्या स्यात् पूर्णा गेहेषु पूजिता ।
करणेषु स्थिरा निन्द्या विष्टिरत्र तथैव च ॥ १९ ॥

पापवारोदयास्त्याज्याः शुभवारोदयाः शुभाः ।

वारजानि करणानि गर्दभव्याघ्रविष्टिगजसूकराः क्रमात् ।
(सू?रम)र्यते मृगपतिः पशुस्तथा तत्र विष्टिरहितानि सन्तु वै ॥

एवमिन्द्रविधुवह्निराक्षसश्राद्धदेववृषवायुगा क्रमात् ।
योगिनी भवति सूर्यवारतो निन्दिता (हि) प्रतिमाप्रतिग्रहे ॥

ध्वजधूमसिंहकुक्कुरवृषखरगजवायसाः क्रमेण स्युः ।
प्रागादियोनयोऽष्टौ तेष्वयुजः संपदे युजो विपदे ॥ २२ ॥

ध्वजेऽर्थलाभः कलहश्च धूमे सिंहे जयः श्वान अनन्तरोगः ।
वृषे तु लाभः खर आन्तदुःखं गजे सुखं वायस एव निष्फलः ॥

पश्चिमाशाननः श्लाघ्यो ध्वजः सर्वमुखोऽथवा ।
उत्तराभिमुखः सिंहो वृषः प्राचीमुखः शुभः ॥ २४ ॥

दक्षिणाभिमुखो हस्ती समस्ते वास्तु(कर्मणि) ॥ २५ ॥

मूर्ध्नि ध्वजो घ्राणपुटे च धूमो
ह्यास्ये हरिः श्रोत्रदृशोः श्वसंज्ञः ।
स्कन्धे वृषः पाणियुगे खरः स्याद्
गजश्च हृद्यङ्घ्रियुगे च काकः ॥ २६ ॥

तस्करो भुक्तिशक्ती च धनं राजाभिधं पुनः ।
षण्डं चैव विपच्चैव ततस्तु चलसंज्ञकम् ॥ २७॥

समृद्धिरिति विख्यातान्यंशकानि नव क्रमात् ।
तस्कराख्यं विपत् षण्डं निन्दितं वास्तुपाठकैः ॥ २८ ॥

पापक्षेत्राणि निन्द्यानि लग्नान्यन्यानि संत्यजेत् ।
लग्नाष्टमं दुष्टयोगान् सकलान् परिवर्जयेत् ॥ २९ ॥

यत्र पूर्णशतायुः स्याद् वर्जयेत् तन्न संशयः ।
ध्वजे वृषे च वैश्यः स्याद् विप्रः सिंहे गजे तथा ॥ ३० ॥

धूमे च गर्दभे राजा वृषलः शुनि वायसे ।

अथान्यथा —

अष्टाहते रन्ध्रहतेऽथ शेषस्त्वायोऽथवात्रापि तिथिस्तु तिथ्या ।

अथ काश्यपपक्षः ।

हर्म्यविस्तारहस्तं तु गुणर्द्धं वसुभिर्हरेत् ।
शेषो ध्वजादियोनिः स्याद् वृद्धं तं वसुभिर्भजेत् ॥ ३२ ॥
ऋक्षैर्ऋक्षं नवर्द्धं तं परिणाहं भजेदगैः ।
शेषः सूर्यादिवारः स्यात् तिथिस्त्रिंशद्विभाजिते ॥ ३३ ॥
शेषो हारफलं तत्र पञ्चधा विभजेदिदम् ।
बाल्यादीनि वयांस्यत्र व्ययो भानुविभाजिते ॥ ३४ ॥
व्यासायामकरारामवृद्धं तं विंशता हरेत् ।
तिथयस्तु तथा शेषास्तुङ्गकेऽथाष्टवृद्धिते ॥ ३५ ॥
नाडिभिस्तूनिते शेष आय इत्युच्यते बुधैः ।
तुङ्गं तु नवभिर्हत्वा प्राग्वद् वै नाडिभिर्हरेत् ॥ ३६ ॥
शेषं व्ययमिति ख्यातं सर्वप्रासादवास्तुषु ।
अथवा व्यासमानेन दीर्घमानं निहत्य तु ॥ ३७ ॥
भक्ते + भिः शेष आयः प्रोक्तो नामभिरष्टभिः ॥ ३८ ॥

अत्रायशब्देन योनिरुच्यते ।

एवं परीक्ष्य बहुधा शुभमानं तु संग्रहेत् ।

अथ ग्रहस्फुटानयनप्रकारः ।

गृहपरिणाहेऽर्कघ्ने भूताकाशाम्बुराशीभिर्विभजेत् ।
पुनरप्यर्कैर्हत्वा हत्वा राशिं रवेर्विधार्यैवम् ॥ ३९ ॥
त्रिंशद्धिरत्वथ षष्ट्या हत्वा भागाः कलादिकाः कल्प्याः ।
शीतांशोर्नेत्रकौ (वि)निहतोन्दृष्टिभिः शुक्रं कार्यम् ॥ ४० ॥

गुणयेदेकाम्बुधिभिः खाङ्केन्दुकरैर्हरेत् कुजस्य तथा।
सौम्यादीनां गुणनं नैव स्याद्धारकाः क्रमादेते॥ ४१॥

खाकाशाम्बुधिभूताः शरशून्ययुगास्तथैव खाश्विभवाः।
युगलमहीधरर्तुघ्नाः खखाङ्गकाः शिल्पशास्त्रनिर्दिष्टाः॥ ४२॥

एत एव कटपयादिभिः —

रम्योऽर्कस्य गुणः स्यान्मुनिभघ्नो हारको ज्ञेयः।
वारश्चन्द्रस्य गुणो भवति विभाजको भवेत् पादः॥ ४३॥

कस्त्वं गुणकारकः स्यान्नीचपरो भूमिजे हारः।
सोमसुतादीनां को गुणकारो भवति सर्वेषाम्॥ ४४॥

सौम्ये नानावाणी हारो जीवस्य मानाभः।
आत्रेयोच्चस्य तथा भवति शनैश्चरस्य रसाळः॥ ४५॥

राहोरानर्तः स्यादानीतव्या ग्रहा एवम्।
विस्तारायतमानैरितीरितं शिल्पशास्त्रज्ञैः॥ ४६॥

प्रकारान्तरेण —

खण्डेन गुणयेद् भानोर्मानवेन विभाजयेत्॥ ४७॥

वृत्तेन गुणयेदिन्दोः कुजेन च विभाजयेत्।
गुणः कुजस्य वृन्ताको नीवाराङ्गो विभाजकः॥ ४८॥

किंगुणः सोमपुत्रस्य मन्त्रनिष्ठो विभाजकः।
जीवस्य गुणयेद् दानैः शङ्करोऽयं विभाजकः॥ ४९॥

भार्गवस्य गुणः शम्भुः मन्त्रनिष्ठो विभाजकः।
मन्दस्य गुणयेत् प्राज्ञैर्धीरसेन विभाजयेत्॥ ५०॥

गुणकारो धनं राहोर्मन्त्रनिष्ठो विभाजकः ।
इत्येतैर्गुणहारस्तु त्रिघ्नाहाष्टमांशतः ॥ ५१ ॥

सूर्यादिराहुपर्यन्तग्रहाः कार्या गृहादिषु ।
ग्रहाणां गोचरादीनि तथा यो(गा)दिकानि च ॥ ५२ ॥

होराशास्त्रोक्तमार्गेण सम्यक् सञ्चिन्त्य बुद्धिमान् ।
दोषान् सर्वान् परित्यज्य गुणैर्युक्तान् परिग्रहेत् ॥ ५३ ॥

इति शिल्परत्ने आयादिलक्षणं नाम
पञ्चदशोऽध्यायः ।

अथ षोडशोऽध्यायः ।

अथ प्रासादलक्षणम् ।

देवादीनां नराणां च येषु रम्यतया चिरम् ।
मनांसि च प्रसीदन्ति प्रासादास्तेन कीर्तिताः ॥ १ ॥
नानामानविधानत्वाद् विमानं शास्त्रतः कृतम् ।
पादोनत्रिकरादिपञ्चदशहस्ताशाङ्गुलान्तोत्तरे-
ष्वष्टाष्टाङ्गुलवृद्धितोऽन्तरभवद्योनिप्रभेदेष्वथ ।
प्रत्यक्प्राग्वदनक्रमेण विहितेष्वल्पेषु वान्येषु वा
प्रासादेषु विशिष्टजातिषु निजेष्टं कारयेत् कारुभिः ॥ २ ॥
प्रासादांश्च कराङ्गुलेन शुचिहस्तादेवमष्टाङ्गुलै-
र्वृद्ध्या सौम्ययमाननाः कतम एव स्युर्मृगादे भजाः(?) ।
तेष्वेकं दशमात्रकोनतिथिहस्तान्तोश्च(?) वा कारयेत्
प्रोक्तं किष्कमितं (वीतिह?) चरहस्तेषहयेद बुद्धिमान् ॥

धान्नो व्यासे शक्करीद्वन्द्वभक्ते
मित्रेन्द्वेध्मांशैः समस्तांशतश्च।
विस्तृत्या संयुक्तया पादकादि-
स्तूप्यग्रान्तोऽप्युच्छ्रयं स्याच्चतुर्धा ॥ ४ ॥
अथवाल्पकनिष्ठानां व्यासे सप्तविभाजिते ॥ ५ ॥
षडंशाधिकमुच्चं स्यान्मध्यानां पञ्चकाधिकम्।
त्र्यंशाधिकं चोत्तमानां प्रासादानामिहोन्नतिः ॥ ६ ॥

अथ शान्तिकादितुङ्गनियमः।

तत्रादित्यतलं श्रेष्ठं शतहस्तोच्छ्रितं भवेत्।
हस्तसप्ततिविस्तारं (सप्त?)त्रिभागाधिकमुच्छ्रयम् ॥ ७ ॥
तच्छान्तिकं देवविमानमुत्तममध्यर्धतुङ्गं त्वथ पौष्टिकाख्यम्।
पादोनयुग्मं विजयस्य तुङ्गं + + + + + + + + + + + + ॥८॥
विस्तारतो द्विगुणि(तुङ्ग?)तोन्नतमद्भुताख्यं
विस्तारतुल्यमुदयं यदि सार्वकामिकम्।
तारत्रिपादमुदयं पुनराभिचारं
तत्त स्मृतं त्वशुभकर्मणि चाभिचारे ॥ ९ ॥

अथ महाप्रासादतुङ्गनियमः।

तत्रादित्यतलं श्रेष्ठं शतहस्तोच्छ्रितं भवेत्।
हस्तसप्ततिविस्तारं मुख्यजात्यापि च क्रमात् ॥ १० ॥
त्रिषष्टिहस्ततारं च त्रिनवत्युन्नतं तु यत्।
उत्तमेन तु मानेन स्यादेकादशभूमिकम् ॥ ११ ॥
तथा चतुरशीत्युच्चं सप्तपञ्चाशता ततम्।
दशभौमं स्मृतं धाम श्रेष्ठमानेन शोभनम् ॥ १२ ॥

पञ्चसप्ततितुङ्गं यदेकपञ्चाशता ततम् ।
नवभौमं तु तन्मुख्यं यथायुक्ति नियोजितम् ॥ १३ ॥
उच्चं षडधिकं षष्टया चत्वारिंशच्च पञ्च च ।
कराणां विस्तृतं धाम भवेदष्टतलं शुभम् ॥ १४ ॥
सप्तपञ्चाशदुत्तुङ्गं त्रिंशता च (श)तेन च ।
कराणां विस्तृतं धाम सप्तभौमं प्रकीर्तितम् ॥ १५ ॥
त्रयस्त्रिंशत्करं व्यासं चत्वारिंशत्करैरपि ।
नन्दहस्तैश्च यत् तुङ्गं षट्तलं तत् प्रकीर्तितम् ॥ १६ ॥
कराणां सप्तविंशत्या चत्वारिंशत्करैरपि ।
सैकैर्यद् विस्तृतं तुङ्गं पञ्चभौमं तु तद् भवेत् ॥ १७ ॥
त्रिंशता चैकविंशत्या तुङ्गे व्यासे चतुस्तलम् ।
प्रकृत्या चातिशकर्या त्रिभौमं तुङ्गविस्तृतौ ॥ १८ ॥
एवं त्रितलमारभ्य यावद्वादशभूमिकम् ।
उत्तमानां प्रतितलं ह्रासयेद् द्विकरं क्रमात् ॥ १९ ॥
मध्यमानि विमानानि भवन्तीह दश क्रमात् ।
तद्वन्मध्यविमानानां ह्रासनं द्विकरं पृथक् ॥ २० ॥
कनिष्ठानि विमानानि भवन्त्याजगतीतलात् ।
अथवा युग्महस्तैस्तु विकारकरतः क्रमात् ॥ २१ ॥
सप्तत्यन्तं विमानानि जात्यादीनि भवन्ति हि ।
तान्यपि त्रितलादीनि भवन्त्यर्कतलान्तकम् ॥ २२ ॥
अत्यष्टिहस्तादारभ्य त्रिषष्टिकरात् तथा ।
छन्दानि पञ्चभौमादि भवन्त्यर्कतलान्तकम् ॥ २३ ॥

अत्यष्टिहस्तादारभ्य त्रिषष्टिकरात् ततः ।
छन्दांसि पञ्च भौमादि भवन्त्यार्कतलादिह ॥ २४ ॥

द्विद्विहस्तविवृद्धानां कनिष्ठाद्यष्टकत्रयम् ।
त्रयोदशकरव्यासात् पञ्चपञ्चाशदन्तकम् ॥ २५ ॥

द्विहस्तवर्धनात् प्राग्वद् विकल्पान्येकविंशतिः ।
एकादशकरात् सप्तपञ्चाशत्क(क)रान्तकम् ॥ २६ ॥

द्विहस्तवर्धनात् प्राग्वदूनविंशतिसंख्यया ।
चतुर्भौमादार्कभौममाभासाख्यानि तानि वै ॥ २७ ॥

विस्तारस्तम्भतो बाह्ये जन्मस्तूप्यन्तमुन्नतम् ।
केचिदाशिखरान्तं तु प्रवदन्ति समुन्नतम् ॥ २८ ॥

अथवा —

प्रासादास्त्रितलादिभानुतलनिष्ठा जातयः स्थाणुसू-
र्याद्यैरोजसमैः करैः परिमिताश्चासप्ततेर्वर्धिताः ।
[illegible]ढागदयो द्व्यधममध्यश्रेष्ठकल्पत्या पृथग्
[illegible]शगुणांशकाधिकसमुत्सेधाश्च ते प्रायशः ॥२९॥

विश्वेन्द्राधिपुं पट्पष्ट्यसमसमकरैरब्धिभौमादयः स्यु-
श्छन्दा हस्तैर्नवाशादिभिरिपुरसपञ्चाशदन्तैर्विकल्पाः ।
पञ्चक्ष्माद्याश्च सर्वे प्रतितलमृतुभिन्ना विवस्वत्तलान्ता
रुद्राद्येकोनतान्तावधिभिरुदधिभूम्याद्यथाभाससंज्ञाः ॥

आभासेऽत्र चतुस्तलादिशिवभूम्यन्तं पृथग् वेदभे-
दाढ्यं द्वादशमन्तिमं द्व्यधममध्यादिक्रमात् षड्भिदम् ।
पट्टिर्जातिगृहे भिदाः करवशाच्छन्दे षडूनास्ततः
षट्कोनाश्च विकल्पधामनि तथाभासे दशोनास्ततः ॥

अथाल्पप्रसादः ।

युग्मायुग्मकरैः पङ्क्तिनवहस्तादितः क्रमात् ।
अष्टसप्तकरैः श्रेष्ठा कनि तु + + + + + ॥ ३२ ॥
चतुस्त्रिद्वितलानि स्युः क्षुद्राख्यानि यथाक्रमम् ।
अथवा त्रिचतुर्हस्तव्यासात् क्षुद्रेषु धामसु ॥ ३३ ॥
एकभौमं द्विभौमं च यथायुक्ति नियोजयेत् ।
पङ्क्तिहस्ततते नन्दकरव्यासमिहोत्तमम् ॥ ३४ ॥
भवेदेकतलं हस्तैर्मध्यं वस्वृषिसं(ख्य?)मितैः ।
कनिष्ठमृतुबाणैः स्यादित्थमेकतलत्रयम् ॥ ३५ ॥
त्र्याद्याशाकरपश्चिमं शशितलं बाणादिमार्तण्डदोः-
पर्यन्तं द्वितलं हयादिनृपहस्तान्तं त्रिभूम्यन्वितम् ।
कुर्याद् धाम निजोचितोच्छ्रययुतं प्रोक्तोच्छ्रयेष्वेषतो
युक्त्या पाददलत्रिपादकरसंयोगक्षयौ च क्वचित् ॥ ३६ ॥
हस्तच्छेदं तु वृद्ध्या वा हान्या वा पूर्णमाचरेत्
अथवा सर्वजात्यानां विमानानां समासतः ॥ ३७ ॥
स्वव्यासद्विगुणादुच्चमष्टां(शं) वाधिकं भवेत् ।
अथवाल्पकनिष्ठानां व्यासे सप्तविभाजिते ॥ ३८ ॥
षडंशादिकमुच्चं स्यान्मध्यानां पञ्चकाधिकम् ।
विमानं शतहस्तोच्चकांधि + न कलौ स्मृतम् ॥ ३९ ॥
महावातादिपीडाभिः पीड्यते यद्यतोऽधिकम् ।

अथ नागरादिविधिः ।

नागरं द्राविडं चैव वेसरं चेति तत् त्रिधा ॥ ४० ॥

प्रासादः सर्वदेवेषु सन्देश(?)मधुनोच्यते ।
सात्त्विकं नागरं तत् स्याद् राजसं द्राविडं स्मृतम् ॥
तामसं वेसरं चेति त्रयं ब्रह्मादिदैवतम् ।
त्रियुगं तत त्रिवर्णं च त्रिचक्रं च क्रमात् स्मृतम् ॥ ४२॥
नागरस्य स्मृतो देशो हिमवद्विन्ध्यमध्यगः ।
द्राविडस्योचितो देशो द्राविडः स्यान्न चान्यथा ॥ ४३ ॥
आगरत्यविन्ध्यमध्यस्थो देशो वेसरसम्मतः ।
सर्वाणि सर्वदेशेषु भवन्तीत्यपि केचन ॥ ४४ ॥

अन्यथा —

हिमाद्रिकन्ययोरन्तर्गतो देश उदाहृतः ।
सोऽपि देशस्त्रिधा भिन्नस्तत्तद्देशभवैर्गुणैः ॥ ४५ ॥
यथैव देहिनां देहं वातपित्तकफात्मकम् ।
तथैवेदं जगत् सर्वं विज्ञेयं त्रिगुणात्मकम् ॥ ४६ ॥
हिमवद्विन्ध्ययोर्मध्यं सात्त्विकं भूतलं स्मृतम् ।
विन्ध्यशैलादिकृष्णान्तं राजसं परिकीर्तितम् ॥ ४७ ॥
पुनः कृष्णादिकन्यान्तं तामसं भूतलं भवेत् ।
नागरं सात्त्विके देशे राजसे द्राविडं भवेत् ॥ ४८ ॥
वेसरं तामसे देशे क्रमेण परिकीर्तिताः ।
विष्णुर्वेधाः शिवः साक्षात् क्रमात् तद्धामदेवताः ॥ ४९ ॥
नागरं भूसुरो जात्या वेसरं वैश्य उच्यते ।
द्राविडं तु नृपो ज्ञेय आकृतिः कथ्यतेऽधुना ॥ ५० ॥

मूलादाशिखरं युगाश्रचितं गेहं स्मृतं नागरं
मूलादाशिखरक्रियं पदुगाश्रोद्भेदितं द्राविडम् ।
मूलाद् वा गलतोऽथवा परिलसद्वृत्तात्मकं वेसरं
तेष्वेकं पृथगात्मलक्ष्म सुविदध्यादात्मनः सम्मतम् ॥ ५१ ॥

जन्मादिस्तूपिपर्यन्तं युगाश्रं नागरं भवेत् ।
वस्वश्रं शीर्षकं कर्णं द्राविडं भवनं विदुः ॥ ५२ ॥

वृत्तकर्णशिरोपेतं वेसरं हर्म्यमीरितम् ।
कूटकोष्ठादिहीनानां हर्म्याणां कथितं त्विदम् ॥ ५३ ॥

नानाधिष्ठानसंयुक्तं तलं प्रत्यङ्घ्रिभेदवत् ।
सर्वत्र वृत्तपादं वा वेसरे भवने कुरु ॥ ५४ ॥

कूटकोष्ठादिनिष्क्रान्तमृजुसूत्रे तु सम्मितम् ।
उन्नतोपानकोपेताः कूटकोष्ठा यथाक्रमम् ॥ ५५ ॥

एकाकारं तलं स्तम्भं पत्रतोरणसंयुतम् ।
क्षुद्रकोष्ठसमायुक्तं महानास्यवकाशके ॥ ५६ ॥

वेदिकाजालकोपेतं कूटं वेदाश्रशीर्षकम् ।
एकानेकतलं वापि सालिन्दं वा व्यालिन्दकम् ॥ ५७ ॥

वेदाश्रं शीर्षकं कण्ठं शालाकारमथापि वा ।
नागरं भवनं ख्यातं तद्देशेषु प्रकल्पयेत् ॥ ५८ ॥

प्राग्वत् कूटादिनिष्क्रान्तं कारयेद् वाथवा पुनः ।
मानसूत्राद् बहिः कूटनीप्रं कूटात् तु कोष्ठकम् ॥ ५९ ॥

मध्ये कोष्ठं सभद्रं वा विभद्रं वा नियोजितम् ।
पञ्जरं मानसूत्रे वा कूटनिष्क्रान्तसादृशम् ॥ ६० ॥

उन्नता शालकोपाना सौष्ठिकौ च यथाक्रमम् ।
उन्नतं स्वान्तरं मञ्चमन्तन्(?) प्रस्तरहीनकम् ॥ ६१ ॥
चतुरष्टाश्रवृत्ताभं कूटं कुर्यात् तले तले ।
ना(सा)मसूरकस्तम्भतोरणैश्च समन्वितम् ॥ ६२ ॥
वृत्ताद्यस्फुटिकैर्हस्तितुण्डैः कुम्भलतादिभिः ।
हारान्तरेषु मध्योर्ध्वं क्षुद्रकोष्ठयुतं तु वा ॥ ६३ ॥
तत्रैव हस्तितुण्डं वा भद्रनास्यल्पनासि वा ।
निरन्तरं सान्तरं वा ह्येकानेक(त)लं तु वा ॥ ६४ ॥
शिरसो वर्तनं कर्णं वृत्तं वाष्टाश्रमेव वा ।
इत्येतैर्लक्षणैर्युक्तं विमानं द्राविडं भवेत् ॥ ६५ ॥
तदेव चरणाकारावेकाकारेण कल्पयेत् ।
हारान्तरे विशेषेण स्युर्वृत्तस्फुटिकादयः ॥ ६६ ॥
समानौ कूटकोष्ठौ द्वौ सान्तरप्रस्तरान्वितौ ।
हीनौ वान्तरमञ्चौ तौ नीप्रं वा समसूत्रकौ ॥ ६७ ॥
स्तम्भान्तरेषु कर्तव्यं भद्रं वा भद्रपञ्जरम् ।
कपोतपञ्जराढ्यं वा सान्तरप्रस्तरान्वितम् ॥ ६८ ॥
अन्या वान्तरमञ्चौ तौ नीप्रं च समसूत्रकौ ।
हारान्तरेषु कर्तव्यं सर्वेषां कर्णकूटकम् ॥ ६९ ॥
सर्वेषां कर्णकूटानां शीर्षकं तु युगाश्रकम् ।
वस्वश्र(क)शिरोपेतं वर्तुलं वा शिरोगलम् ॥ ७० ॥
वस्वश्रं वा शिरःकर्णं युगाश्रं वा प्रकल्पयेत् ।
एवं वा द्राविडं स्यातं होमादाकुन्तलं ततः ॥ ७१ ॥

वस्वश्रं वा षडश्रं वा तदपि द्राविडं स्मृतम् ।
एवं त्रिविधनीला तु प्रोच्यते द्राविडालयम् ॥ ७२ ॥

वेसरे कूटकोष्ठानि नीप्रं स्यान्मानसूत्रगम् ।
वृत्ताकारशिरोपेतं कर्णकूटं प्रकल्पयेत् ॥ ७३ ॥

वृत्तं गजपृष्ठाकारं वाह्यवृत्ताभ्रमेव वा ।
वृत्तग्रीवशिरोपेतं यथेष्टशिखरेण वा ॥ ७४ ॥

सालिन्द्रं वा सभद्रं वाप्येकैकतलं तु वा ।
समाश्रमायताश्रं वा वृत्तं वृत्तायतं तु वा ॥ ७५ ॥

व्यश्रवृत्तं तु वा हर्म्यं कूटकोष्ठादिसंयुतम् ।
उन्नतोपानकोपेतौ कूटकोष्ठौ यथाक्रमम् ॥ ७६ ॥

समौ तु कूटकोष्ठौ तु बहलं तत्समं तु वा ।
वेसरं भवनं ख्यातमेवं वा तत्त्रयं भवेत् ॥ ७७ ॥

बिम्बं च पीठिकां चैव प्रासादं चैकजातिकम् ।
करोतु सर्वसम्पत्त्यै नृपराष्ट्रजनस्य तु ॥ ७८ ॥

विपरीतं विपत्त्यर्थं राजराष्ट्रभयङ्करम् ।
नागरे सकलं शान्तं वेसरे यानमूर्तिकम् ॥ ७९ ॥

भेदीरं च नृत्तं च द्राविडे भवने न्यसेत् ।
अन्यथा चेद् विपत्त्यै च कर्तुर्भर्तुस्तथैव च ॥ ८० ॥

अथ प्रासादनियमः ।

ब्रह्मविष्णुशिवानां चाप्युत्तमं चक्रवर्तिनाम् ।
शस्तं द्वादशभौमं स्याज्जान्येषां तद् विधीयते ॥ ८१ ॥

त्रयस्त्रिंशत्सुराणां च यक्षनागेन्द्रवेधसाम् ।
एकादशतलं शस्तं दिक्तलं शशिसूर्ययोः ॥ ८२ ॥

महाराजाधिराजानां विमानं नवभूमिकम् ।
अष्टभौमं तु गन्धर्वसिद्धविद्याधरोचितम् ॥ ८३ ॥

सप्तभौमं द्विजेन्द्राणां नृपाणां च समृद्धिदम् ।
षड्भौमं मण्डलेन्द्राणां युवराजेषु भूमिकम् ॥ ८४ ॥

सामन्तानां चतुर्भौमं पुरेशानां च शस्यते ।
श्रीमतां वैश्यशूद्राणां सेनेशानां त्रिभौमिकम् ॥ ८५ ॥

द्वितलं चैकभौमं च सर्वदेवनरोचितम् ।
हीनानां नाधिकोक्तं स्यादिति प्राह पराशरः ॥ ८६ ॥

अथ महाप्रासादभेदाः ।

भूतेशब्रह्मविष्णूनां मुख्यं मुख्यास्तु विंशतिः ।
नलिनं च प्रलीनं च स्वस्तिकं च चतुर्मुखम् ॥ ८७ ॥

ततः स्यात् सर्वतोभद्रं हरितपृष्ठं समुज्ज्वलम् ।
श्रीछन्दं वृत्तभद्रं च श्रीकान्तं श्रीप्रतिष्ठितम् ॥ ८८ ॥

शिवभद्रं शिवच्छन्दमष्टाङ्गं पर्वताकृति ।
विष्णुच्छन्दं च सौभद्रं छन्दे कैलासरुद्रके ॥ ८९ ॥

ततो ललितभद्राख्यं विमानं चेति विंशतिः ।
जातीतराणि द्वात्रिंशदथ सर्वदिवौकसाम् ॥ ९० ॥

मेरुर्मन्दरकैलासौ जयाङ्गविमलाकृति ।
कुम्भाख्यं विमलाङ्गं च वृषच्छन्दं सुदर्शनम् ॥ ९१ ॥

हसच्छन्दं पद्मकान्तं गरुडच्छन्दमेव च ।
भोगिच्छन्दं पद्मभद्रं ततः कैलासकान्तकम् ॥ ९२ ॥
भद्रशिखं रुद्रकान्तं योगभद्रं च मङ्गलम् ।
विन्ध्यच्छन्दं मेरुकूटं महेन्द्रं चित्रकूटकम् ॥ ९३ ॥
श्रीमण्डनं च सौमुख्यं नीलं निषधसंज्ञकम् ।
ततो ललितकान्ताख्यं विजयश्रीकरं तथा ॥ ९४ ॥
श्रीविशालं च कथितं तथैव जयमङ्गलम् ।
जातीतराणि द्वात्रिंशद्विमानानीरितानि तु ॥ ९५ ॥
अथ जातिविमानानि द्वादशैव द्विजन्मनाम् ।
नागभोगाह्वयच्छन्दे कुड्यावर्तं त्रिकूटकम् ॥ ९६ ॥
श्रीवर्धनं पद्मगृहं प्रेक्षागृहं मुखं तथा ।
अत्यन्तभानुचन्द्राणां क्रान्तानि क्रतुवर्धनम् ॥ ९७ ॥
वृत्तं च द्वादशैतानि विमानानि द्विजन्मनाम् ।
राज्ञां संकृतिसञ्ज्ञानि कथितानि मुनीश्वरैः ॥ ९८ ॥
चतुष्कूटं मन्त्रपूतमावन्त्यं माहिषं तथा ।
तत्र कान्तं कर्णभद्रं विजयाङ्गं विशालकम् ॥ ९९ ॥
विशालभद्रं गणिकाविशालं कर्णशालकम् ।
पद्मासनं चेन्द्रकान्तं स्यात् सर्वललितं ततः ॥ १०० ॥
योगप्रत्ययकान्ताख्ये ततश्चोत्पलपत्रकम् ।
महाराजाह्वयच्छन्दं महागृहमतः परम् ॥ १०१ ॥
पृथिवीविजयं चाथ भवेन्नन्दिविशालकम् ।
सर्वाङ्गदर्शनं चापिच्छायागृहमतः परम् ॥ १०२ ॥

रतिवर्धनमित्येवं चतुर्विंशतिकं स्मृतम् ।
तेषामेव विमानानां तथाष्टौ वैश्यशूद्रयोः ॥ १०३ ॥

विशालालयसंज्ञं च चतुष्फाटिकमेव च ।
तुरङ्गवदनं तद्वद् गणिकापिण्डिकं तथा ॥ १०४ ॥

श्येनच्छन्दं चोत्पलाग्रं ततः कुक्कुटपुच्छकम् ।
इत्यष्टौ जातिहर्म्याणि वासार्थं वैश्यशूद्रयोः ॥ १०५ ॥

एतेषां तु विमानानां भेदाः संस्थानभेदतः ।
शिखरस्य तु भेदेन सर्वेषां भेदमुद्दिशेत् ॥ १०६ ॥

यथार्हं तु यथाशोभं सर्वगन्यत् समं स्मृतम् ।
एभिरेवाप्यलङ्कारैः स्यात् कनिष्ठाल्पकेष्वपि ॥ १०७ ॥

नामान्यपि च तान्याहुस्तत्तन्मण्डनभेदतः ।

अथ पद्मप्रासादः ।

पद्मगेहस्य वैशेष्यं शिवच्छन्दं चन्द्रकान्तकम् ॥ १०८ ॥

ललितकान्ताभिधानं च कुड्यावर्तं चतुष्टयम् ।
एवं शिवस्य विषये वैष्णवे प्रवदाम्यतः ॥ १०९ ॥

अम्भोजालयवैशेष्यं श्रीकान्तं श्रीकरं ततः ।
विष्णुच्छन्दाभिधानं च तथैवोत्पलपत्रकम् ॥ ११० ॥

अम्भोजचरणाख्यं च तथा कौमारमन्दिरे ।
वृत्तभद्रं गोत्रकान्तं विघ्नेशे जयमङ्गलम् ॥ १११ ॥

शास्तुर्धाम्नि द्विकूटाख्यमार्यायास्त्रितयं विदुः ।
सौभद्रं च विशालं स्यात् प्रेक्षागृहमतः परम् ॥ ११२ ॥

एते पञ्चदश प्रोक्ता वृत्ताकाराः सुरालयाः'।
अथो गृहलुपाकूटा अधःपद्मसमायुताः ॥ ११३ ॥
तेषां पृथक् पृथक् सन्ति भूषणादीन्यनेकधा।

अथ प्रासादभेदः।

प्रासादं पुरुषं मत्वा पूजयेन्मन्त्रवित्तमः ॥ ११४ ॥
कायश्चाप्यनुकायश्च प्रासादाङ्गं द्विधा स्मृतम्।
अधिष्ठानं तथा स्तम्भो भित्तिः कुम्भश्च मण्डिका॥ ११५ ॥
पोतिका स्याद् भारतुला जयन्तय इति क्रमात्।
अनुमार्गाश्च कायः स्यादनुकायोऽथ कथ्यते॥ ११६॥
उत्तरं वाजनश्रेणी वलिकं कर्णपट्टिका।
सन्धिद्वारकवाटानि योगः प्रच्छादनानि च ॥ ११७ ॥
कुम्भवल्ली तोरणानि मुष्टिबन्धाष्टमङ्गलम्।
मृणालिका दण्डिका च नीप्रभाराश्च नासिकाः॥ ११८॥
पट्टिका वलभिर्बन्धवेदिका जालकानि च।
कर्णकूटं तथाकूटनीडं कोष्ठादयोऽपि च ॥ ११९ ॥
ऊर्ध्वप्रच्छादविन्यासस्सुधालोष्टेष्टकादयः।
अनुकायाभिधानानि सामान्येन भवन्ति हि॥ १२० ॥

अथवा —

प्रपदं पादुकं विद्याच्छिखा स्तूपीति कथ्यते।
लोहकीलकपत्रादि सर्वं दन्तनखादिकम् ॥ १२१ ॥
सुधा शुक्लं त्विष्टकौघमस्थि मज्जा च पीतरुक्।
मेदः श्यामरुचिरतद्वद् रक्तं रक्तरुचिरतथा ॥ १२२ ॥

मांसं मेचकवर्णं स्याच्चर्म नीलं न संशयः।
त्वक् कृष्णवर्णमित्याहुः प्रासादे सप्तधातवः ॥ १२३ ॥

इति शिल्परत्ने प्रासादलक्षणं नाम
षोडशोऽध्यायः।

अथ सप्तदशोऽध्यायः।

अथ पादाधिष्ठानविभागः।

अधिष्ठानोच्छ्रयं पूर्वं हस्तमानेन वर्ण्यते।
प्रासादस्तु निजैरङ्गैरधितिष्ठति यं सदा ॥ १ ॥
दृढं शिलादिघटितं तदधिष्ठानसंज्ञितम्।
तैतिलानां चतुर्हस्तं त्रिहस्तार्धं द्विजन्मनाम् ॥ २ ॥
राज्ञां त्रिहस्तं सार्धद्विहस्तं चेत् + व राजकम्।
द्विहस्तमेव वणिजां शूद्रस्यैककरं स्मृतम् ॥ ३ ॥
एवं जातिवशाद् भूमिवशादत्रैव कथ्यते।
चतुष्करात् तु षण्मात्रहीनेनार्कतलात् क्रमात् ॥ ४ ॥
त्रितलस्योत्तमस्येष्टं पादेनोनद्विहस्तकम्।
क्षुद्राणामुदयं नीत्वा विधातव्यं विचक्षणैः ॥ ५ ॥
मसूरकोन्नतं पञ्चहस्ते द्वात्रिंशदङ्गुलम्।
त्रिंशदङ्गुलमुच्चं वा तस्यैव च पुनस्तथा ॥ ६ ॥
षडादीनां तु पञ्चानामेकत्रिंशतिमात्रकम्।
एकादशोऽथ द्वात्रिंशद द्विद्यङ्गुलविवर्धनात ॥ ७ ॥

अष्टत्रिंशतिमात्रोच्चं चतुर्दशविशालिनः ।
नवत्रिंशतिमात्रोच्चं चतुर्दशपरस्य च ॥ ८ ॥
त्रिचतुर्हस्तयोर्धाम्नोर्हस्तमेवेति निश्चितम् ।
इत्येवं क्षुद्रहर्म्याणामधिष्ठानोच्छ्रयक्रमः ॥ ९ ॥
आत्तोत्सेधांशमानेनाप्यधिष्ठानोच्छ्रयं विदुः ।
कैश्चित् तेन प्रकारेण विधातव्यं विचक्षणैः ॥ १० ॥
तत्तत्पादोदयार्धेन तुल्यमानं करोति तम् ।
गेहे त्रिदोर्वर्गभवे द्विदोर्मितान्
स्तम्भांस्ततोऽङ्ग्यङ्गुलवर्धितान् क्रमात् ।
चतुष्कराद्युत्तरवर्गजेष्टकान्
करोत्वधिष्ठानमतोऽर्धसम्मितम् ॥ ११ ॥
अङ्गाद्यैरुदयोत्तरान्तरगतोन्मानं विभज्य क्रमात्
संख्यानैः शिवपश्चिमैर्निगदिते स्तम्भोच्छ्रये स्वेच्छया ।
अंशं योजयतु क्वचित् त्यजतु वा मासूरके स्वोच्छ्रयं
भङ्क्त्वाङ्गादिनवान्तिमैर्विरहयेद् द्वारं यथोक्तोच्छ्रयात् ॥
अथाष्टहस्तात् पादोच्चद्वादशक्ष्मात्क्रमात् पुनः ।
तत्तद्वितस्तिहीनेन त्रिकरं च त्रिभूमिके ॥ १२ ॥
आत्ताधिष्ठानतुङ्गस्य द्विगुणं पादतुङ्गकम् ।
द्विगुणान्नाधिकोत्सेधः स्तम्भः प्रोक्तः स्वयम्भुवा ॥ १४ ॥

अथ सामान्यविधिः ।

उत्तरोपानयोर्मध्यं पादमानमिति स्मृतम् ।
त्रिकराद्यङ्गुलीषट्कं वर्धमानं ततस्ततः ॥ १५ ॥

यथाशोभं यथायोग्यं पादमानं करोतु वा।
विस्तारेण समं पादमानमित्युच्यते बुधैः ॥ १६ ॥

विस्तारस्य चतुर्थांशयुतं वा वियुतं तु वा।
षट्सप्ताष्टाङ्कभागेन युतं वा हीनमेव वा ॥ १७ ॥

भक्तेऽस्मिन् पादमाने त्रिचतुरिपुपडंशैरधिष्ठानमंशै-
नाष्टाभिः सप्तभिर्वा विकृतिविदलिते विश्वभक्ते चतुर्भिः।
धृत्यंशे पञ्चभिर्वा तिथियुगलहते वाष्टिभिः सप्तभक्ते
द्वाभ्यां वार्कद्वयांशे मुनिभिरपि दशांशैस्त्रयस्त्रिंशदंशे ॥

सप्ताष्टनवभिर्भक्ते तस्मिन्नाद्यङ्गमंशतः।
पञ्चांशैर्वाथ कर्तव्यमतिधृत्यंशिते तथा ॥ २० ॥

द्वादशांशे तु पञ्चांश चतुर्विंशांशिते तथा।
एवं बहुविधं प्रोक्तं मासूरस्य समुन्नतम् ॥ २१ ॥

अथ तलान्तरपा + + + + + + + + + ॥ २२ ॥

स्तम्भे प्राथमिकेऽनलादिशिवनिष्टैरंशितैंऽशैः क्रमा-
न्नेत्राग्नित्रिगुणेषुशैलशरनागाङ्कोन्मितैः सम्मितौ।
ग्रीवोक्ता नवधा ततोऽपि तलकृतौ पूर्वपूर्वाङ्घ्रितः
प्रोन्नेया च तदुन्नतिः प्रतितलं स्यात् प्रस्तरप्रक्रिया ॥ २३ ॥

रुद्रांशे सुषिरा दशांशवसवो वेदत्रिसप्तेन्द्रिया
दिक्सप्तत्रितयद्वयं तु विधिवत् पञ्चाग्निभागोन्मितम्।
पञ्चाशासुषिरे समुज्ज्वलतराः स्तम्भार्धतोऽपि क्रमा-
न्मूलस्तम्भसमुन्नतेस्तु नवधा ग्रीवा विमानाश्रया ॥ २४ ॥

अथोपपीठोन्नतिः ।

अधिष्ठानस्य चाधस्तादुपपीठं प्रयोजितम् ।
रक्षार्थमुन्नतार्थं वा शोभार्थं च प्रकल्पयेत् ॥ २५ ॥

आयङ्गतुङ्गपञ्चांशत्रिगुणं वोपपीठकम् ।
अधिष्ठानत्रिगुणं वा स्यादुपपीठसमुच्छ्रयः ॥ २६ ॥

मासूरोच्चे विभक्ते शिखिविशिखकरैः क्ष्मेक्षणेन्द्वंशतोऽर्धा-
शोर्ध्वं पादांशवृद्ध्या द्विगुणितचरमं योजयेद् वोपपीठम् ।
दिग्भक्तेंऽशैः शशाङ्कादिभिरिपुचरसैरेकसार्धद्विलोकै-
र्दण्डैर्वा निर्गतं चारचयतु विलसत्खाङ्गभङ्ग्याभिरामम् ॥

जगतेर्नीप्रतुल्यं वा धामस्तत्पादुकस्य वा ।
तन्नीप्रमुपपीठस्य पादबाह्यं प्रकल्पयेत् ॥ २८ ॥

अधिष्ठानपादुकात्तस्य विधिः सर्वोपपीठके ।
अथवा दण्डमारभ्य नवदण्डावसानकम् ॥ २९ ॥

सभादीनां विशेषेण कथ्यतेऽस्य विनिर्गमः ।
अथाभ्यन्तरपादेन भवेत् तदुपपीठकम् ॥ ३० ॥

अष्टभागकभागं वा सप्तभागैकभागिकम् ।
षड्भागैकांशकं वाथ निर्गतिः पूर्वमुक्तवत् ॥ ३१ ॥

अथाभ्यन्तरपादः । अथ पद्मम् ।

इष्टाधिष्ठानोच्छ्रयं संविभज्य संख्याभिः श्रुत्यादिनन्दान्तिमाभिः
कुर्यादेकांशेन तूपानडन्ते पद्मं धामोत्सेधतोऽदोऽधिऽकं स्यात् ॥

पद्मस्य तुङ्गे षड्भक्ते भागमूलेऽस्य पीठिका ।
अधश्छदं त्रिभागेन द्विभागेनोर्ध्वगच्छदम् ॥ ३३ ॥

अथ सप्तांशिते तस्मिन् पीठमंशेन पङ्कजम्।
त्रिभिर्भागेन तत्कर्णं द्वाभ्यामूर्ध्वच्छदं विदुः॥ ३४॥

पद्मोत्तुङ्गे षड्भिरंशैर्विभक्ते भागेन स्यात् पीठिका लोकभागैः।
पद्मोत्सेधो द्व्यंशतः कर्णिकोच्चं युग्मैरोजैर्वाछदैर्भूषितं हि॥

इति शिल्परत्ने पादाधिष्ठानानुन्नतिनिर्णयं नाम
सप्तदशोऽध्यायः।

अथाष्टादशोऽध्यायः।

अथोपपीठावयवः।

अर्कांशे तूपपीठोच्चे तूपानद् द्व्यंशमंशतः।
पद्मं क्षेपणमर्धांशं ग्रीवा पद्मांशतो भवेत्॥ १॥
अर्धेन कम्पं तस्योर्ध्वगाब्जमंशेन शिष्टतः।
सकम्पमूर्ध्वपदं चेदष्टाङ्गमुपपीठकम्॥ २॥
षडङ्गं वा विधातव्यमूर्ध्वाधः पद्मकौ विना।
वेदिभद्रमिदं प्रोक्तं सर्वहर्म्येषितं द्विधा॥ ३॥
अच्छिद्रैरिच्छवभागै(?)र्भानुभागांशकांशकैः।
रामांशांशकभागैस्तु द्वाभ्यामंशेन योजयेत्॥ ४॥
जन्मतो वा(ज)नान्तं यत् तुङ्गे त्रिनवभाजिते।
पादुकं पङ्कजं कम्पं कर्णमुत्तरमम्बुजम्॥ ५॥
कपोतालिङ्गकर्णांश्च प्रतिं वाजनमित्यपि।
प्रतिभद्राह्वयं ह्येतत् सर्वालङ्कारसंयुतम्॥ ६॥

प्रकृत्यंशे तदुत्सेधे भागाभ्यां जन्म चाम्बुजम् ।
गलमर्धेन भागेन पद्मद्वयंशं तु वाजनम् ॥ ७ ॥

अर्धेनाब्जं तथा कम्पमष्टकर्णांशमुत्तरम् ।
अर्धेनाब्जं तु गोपानं त्रिभिः स्यात् कम्पमर्धतः ॥ ८ ॥

सुभद्रकमिदं नाम्ना कथितं ह्युपपीठकम् ।
सिंहेभमकरव्यालभूतभद्राद्यलङ्कृतम् ॥ ९ ॥

प्रतिवक्त्रं झषास्यं स्याद् बालेनारूढमस्तकम् ।
देवद्विजनरेन्द्राणां मकरास्यं प्रतेर्मुखम् ॥ १० ॥

स्वस्तिकं वाथ देवानामर्धेन्दुर्वैश्यशूद्रयोः ।
द्विभागं पादुकोत्सेधाद् द्विभागं पङ्कजादयम् ॥ ११ ॥

कम्पमेकेन कर्तव्यमेकेनान्तरिकं भवेत् ।
द्विभागं प्रतितुङ्गं तु तथैवैकेन वाजनम् ॥ १२ ॥

अष्टाङ्गलतुङ्गं तु पद्मकेन + कारयेत् ।
अब्जमेकेन कर्तव्यं कपोतोच्चं गुणांशकम् ॥ १३ ॥

एकेनालिङ्गपट्टं स्यादन्तरी चैकभागिनी ।
प्रतितुङ्गद्विभागं तु वाजनं चैकभागिकम् ॥ १४ ॥

सन्तविंशद्विभक्ते(?) तु नाम्ना तत् प्रतिसुन्दरम् ।
उपानं तु द्विभागं स्याद् रामांशं पद्ममुच्यते ॥ १५ ॥

एकांशं कन्धरं विद्यादंशाभ्यां पद्ममुच्यते ।
द्विभागं पट्टमानं स्यादध्यर्धं पद्ममानकम् ॥ १६ ॥

कम्पमर्धेन कर्तव्यं सप्तभागं गलं तथा।
कम्पमर्धेन कर्तव्यमम्बुजं सार्धभागिकम् ॥ १७ ॥
महाभट्टिद्विभागेन पद्ममध्यर्धभागतः।
कम्पमर्धेन कर्तव्यं पञ्चविंशतिभाजिते ॥ १८ ॥
कल्याणकारणं नाम्ना सर्वधामसु पूजितम्।
अथवा मञ्चकाद्यङ्गैर्भूषयेद् वोपपीठकम् ॥ १९ ॥
अङ्गनिष्क्रान्तवेशान्यप्यधिष्ठान(क)वद् (भवेत्)।
अधिष्ठानं चोपपीठं मृदा चेष्टकयापि वा ॥ २० ॥
शिलाभिर्वा विधातव्यं दारुणा वा यथाबलम् ॥ २०½ ॥

इति शिल्परत्ने उपपीठलक्षणं नाम
अष्टादशोऽध्यायः।

अथ एकोनविंशोऽध्यायः।

अथाधिष्ठानम्।

अधिष्ठानं मयः प्राह चतुर्दशविधं पृथक्।
पराशरोऽपि द्विविधं त्रिविधं च परे जगुः ॥ १ ॥
मञ्चकान्यधमान्याहुः पादबन्धाभिधानि वै।
मध्यमान्युत्तमानि स्युः प्रतिबन्धान्यसंशयः ॥ २ ॥
उपानं जगतीकुम्भं कन्धरं प्रस्तरं तथा।
पञ्चवर्गमिति ख्यातमाद्यङ्गानां विशेषतः ॥ ३ ॥
कुमुदेन विना कार्यं यत् तन्मञ्चकमुच्यते।
पादबन्धतलानां तु वस्वश्रं कुमुदं भवेत् ॥ ४ ॥

सर्वेषां प्रतिबन्धानां कुमुदं वृत्तमुच्यते ।

अत्र पूर्वं मञ्चकानि —

मञ्चकस्योच्छ्रयं कुर्यान्नवभागं विचक्षणः ॥ ५ ॥

द्विभागं पादुकं तत्र सप्तांशं कुट्टिमं भवेत् ।
द्वादशांशकृतोत्सेधे द्विभागं पादुकं विदुः । ६ ॥

सप्तांशं कुट्टिमोत्सेधं रामांशं प्रतिरुच्यते ।
प्रतिमञ्चकनामैतन्नृणां साधारणं विदुः ॥ ७ ॥

पञ्चभागकृतोत्सेधेऽप्येकांशं पादुकोन्नतम् ।
द्विभागैर्जगतीं तस्य कर्णमंशेन कारयेत् ॥ ८ ॥

प्रतेरुच्छ्रयमेकेन नाम्ना तद् गलमञ्चकम् ।
सूर्यांशककृतोत्सेधे द्व्यंशं तत्पादुकं भवेत् ॥ ९ ॥

षडंशं कुट्टिमं विद्याद् गलं द्व्यंशं तु कारयेत् ।
द्व्यंशं तत्प्रस्तरं विद्याद् गलमञ्चकमीरितम् ॥ १० ॥

कुर्वीत स्फुटमिह जन्मकुट्टिमं (तत्)
तत्पट्टं गलमथ पट्टिकां प्रतिं च ।
नेत्राङ्गक्षितिनयनेन्दुनेत्रभागै-
र्मासूरैर्वलरिपुभाजिते क्रमोऽयम् ॥ ११ ॥

जन्म त्रिभागं वसुभिश्च जङ्घा तत्पट्टिकांशेन गलं द्विभागम् ।
तदूर्ध्वपट्टं रजनीकरांशं प्रतिर्गुणांशैर्गलमञ्चकाख्यम् ॥ १२ ॥

नवभागकृतोत्सेधे शिवांशं पादुकोन्नतम् ।
जङ्घाकर्णौ + त्रिभागैर्गलमञ्चे प्रतिं दृशाम् ॥ १३ ॥

एकत्रिद्विद्विभागैः स्युर्गलमञ्चेऽष्टभाजिते ।
उपानजगतीकर्णप्रस्तराणि यथाक्रमम् ॥ १४ ॥

अष्टादशांशे त्रिभि(र?रेव) पादुकं
जङ्घाष्टाभिः पट्टमिलांशतो गलम् ।
द्वाभ्यां तदूर्ध्वगतमंशत एव पट्टं (?)
कर्णत्रिभागैर्गलमञ्चकाभिधे ॥ १५ ॥

अधिष्ठाने त्रिधा भक्ते पादुकं कुट्टिमं प्रतिम् ।
कुर्यादेकांशतः पद्माकारमेतैः करोतु वा ॥ १६ ॥

आद्यङ्गं दशधा कृत्वा कुर्यात् पादुकमंशतः ।
जङ्घामानं त्रिभिर्भागैः पट्टमानमलांशकम् ॥ १७ ॥

द्विभागतो गलोत्सेधमेकाङ्गं पट्टिकोदयम् ।
द्वाभ्यां प्रस्तरमानं तु गलमञ्चविशेषकम् ॥ १८ ॥

अथ पादबन्धानि ।

अधिष्ठानोच्छ्राये द्वेधा भक्तेष्वंशेन कुट्टिमम् ।
अंशेन कुमुदोत्सेधमष्टधा विभजेत् परम् ॥ १९ ॥

पट्टिकांशेन कम्पांशकर्णांशौ तूर्ध्वकम्पकम् ।
अंशेनाथ त्रिभिर्भागैर्वाजनं परिकल्पयेत् ॥ २० ॥

पादबन्धमिदं ज्ञेयं मुख्यजात्याद्यदूषितम् ।
सप्तांशैर्जगती षड्भिः कुमुदं चैकमम्बुजम् ॥ २१ ॥

पट्टं च कम्पं चैकैकं कर्णौंऽशावब्जमंशतः ।
द्वौ वाजनं चाब्जमेकमंशाभ्यामूर्ध्वपट्टिकाम् ॥ २२ ॥

पादबन्धमधिष्ठानमिदं साकृतिभेदितम् ।
अष्टसप्त (श)शिरामभागिकै-
श्चन्द्रलोकशशिभागकैः क्रमात् ।
वप्रकं कुमुदकम्प(क)न्धराः
कम्पवाजन(क)पट्टिकाः क्रमात् ॥ २३ ॥

पादबन्धमुदितं तदुच्छ्रये भास्करद्विगुणितांशिते तले ।
देवविप्रनृपवैश्यशूद्रकेष्वेवमुक्तमृषिभिः पुरातनैः ॥ २४ ॥

आत्ताधिष्ठानकोत्सेधे पञ्चविंशतिभाजिते ।
शिवांशपादुकं कुर्याज्जगतीं वसुभागतः ॥ २५ ॥

धात्वंशैः कुमुदोच्चं तु व्योमांशं कम्पमानकम् ।
अनलांशं गलोत्तुङ्गं शशयंशं चोर्ध्वकम्पकम् ॥ २६ ॥
महाभद्रं गुणांशैस्तु तदूर्ध्वेऽशेन कम्पकम् ।
पादबन्धमिदं ख्यातमुपानरहितं तु वा ॥ २७ ॥

अधिष्ठानस्य चोत्सेधेऽप्येकोनविंशदंशिते ।
उपानं चैकभागेन साब्जकम्पं षडंशकम् ॥ २८ ॥

षडंशं जगतेरुच्चमेकांशं गलमानकम् ।
कर्णमेकेन कर्तव्यमेकेनाब्जं तु कारयेत् ॥ २९ ॥

कुमुदोच्चं गुणांशेन पद्ममेकेन कारयेत् ।
कम्पमेकेन कर्तव्यं कर्णोच्चं तु द्विभागतः ॥ ३० ॥

एकांशं कम्पतुङ्गं तु तत्समं तु दलोदयः ।
महाभद्रं द्विभागेन दलमेकांशमानतः ॥ ३१ ॥

कम्पमेकेन कर्तव्यमष्टाश्रं कुमुदाकृति ।
अम्भोजकेसरं नाम्ना पादबन्धविशेषकम् ॥ ३२ ॥

त्रिसप्तांशे तलोत्सेधे पादुकं भूमिभागतः ।
षट्पञ्चांशौ क्रमात् कार्यौ वप्रकुम्भौ तथांशतः ॥ ३३ ॥

कम्पं गुणांशकं कर्णमूर्ध्वकम्पं शिवांशकम् ।
पद्ममंशेनाग्निभागैः कपोतं पादबन्धकम् ॥ ३४ ॥

श्रीकान्तमिति विख्यातं सर्वजात्यर्हकं भवेत् ।
अधिष्ठानस्य चोत्सेधे पञ्चविंशतिभाजिते ॥ ३५ ॥

शिवांशं पादुकोत्सेधं जगती वसुभागतः ।
धात्वंशं कुमुदोत्सेधं व्योमांशं कम्पमानकम् । ३६ ॥

अनलांशं गलोत्तुङ्गं शशयं(शं) चोर्ध्वकम्पकम् ।
महापट्टिर्गुणांशैस्तु तदूर्ध्वं कम्पमंशतः । ३७ ॥

पादबन्धमिदं ख्यातमुपानरहितं तु वा ॥ ३८ ॥

वास्त्वाधारसमुच्छ्राये प्रकृतिभक्ते वा त्रिभिः पादुकं
छन्दोभिर्जगतीं रसैः कुमुदकं चैकेन तत्पट्टिकाम् ।
भागाभ्यां गलपादकान् विरचयेदर्धांशतः पट्टिकां
क्षुद्रां सार्धधरांशकेन महतीं स्वांशोच्छ्रसद्वाजनाम् ॥ ३९ ॥
द्वादशांशे तलोत्सेधे वेदांशैर्जगतीं विदुः ।
कुमुदं तत्समं कम्पमंशं सार्धेन वाजनम् ॥ ४० ॥

प्रतिवाजनमर्धांशमंशतः प्रस्तरोच्छ्रयम् ।
पादबन्धमिदं सर्वदेवमानवयोग्यकम् ॥ ४१ ॥

इध्माहत्रेभिरुपानमतो धरित्रीं(?)
भागै रसैः कुमुदकं प्रकरोतु तुङ्गे।
एकेन पट्टमथ कन्धरमीक्षणेन
तद्वत् प्रतिं पुनरिदं खलु पादबन्धम् ॥ ४२ ॥

तुङ्गे षड्विंशदंशे तु गुणांशं पादुकोन्नतम्।
द्विभागं दलमानं तु कम्पोच्चं शशिभागतः ॥ ४३ ॥

षडंशं तु जगत्युच्चं चतुर्भागं घटोदयम्।
कम्पमेकेन कर्तव्यं कर्णोच्चं तु द्विभागिकम् ॥ ४४ ॥

ऊर्ध्वकम्पमथैकांशं गलभागं द्विभागतः।
वाजनं चैकभागेन सार्धांशं कमलोदयम् ॥ ४५ ॥

कम्पमर्धेन कर्तव्यं श्रेणीबन्धमिदं भवेत्।

अष्टसप्तशशियुग्मभागकैश्चन्द्रयुग्मशशिभागकैः क्रमात्।
वप्रकं कुमुदकम्पकन्धराः कम्पवाजनमथोर्ध्वकम्पकम् ॥ ४६ ॥

पादबन्धमुदितं तदुच्छ्रये रुद्रयुग्म(क)विभाजिते तले ॥ ४७ ॥
द्व्येकैकांशैः [illegible]रांशैर्युगश(शधर)दृक्चन्द्रभूम्यश्विनीभि-
र्भागैनोपानकाब्जं तदुपरि (च) तथा कम्पवप्रे च कुम्भे।
पद्मं पट्टं च कर्णं तदुपरि + गतं कम्पमब्जं च पट्टी-
पट्टं तद्वप्रबन्धं द्विसहितकृतिना भाजिते पादबन्धे ॥ ४८ ॥

त्रिसप्तांशे तलोत्सेधे कृतेंऽशेनैव पादुकम्।
अम्बुजं सार्धभागेन कम्पमर्धांशमुच्यते ॥ ४९ ॥

सप्तांशं जगतेरुच्चं रसांशं कुमुदोदयः।
आलिङ्गमेकभागेन गलमग्न्यंशकं विदुः ॥ ५० ॥

ऊर्ध्ववाजनमेकांशं महापट्टिर्गुणांशतः।
तदूर्ध्वकम्पमेकांशं पादबन्धमिदं विदुः ॥ ५१ ॥
षड्विंशद्विभजेदुच्चमुपानं चैकभागतः।
द्विभागेन दलं कुर्यात् कम्पमेकेन कारयेत् ॥ ५२ ॥
षडंशं जगतेरुच्चमेकांशं दलमानकम्।
कर्णमेकेन कर्तव्यमेकेनाब्जं तु कारयेत् ॥ ५३ ॥
कुमुदोच्चं गुणांशेन पद्ममेकेन कारयेत्।
कम्पमंशेन कर्तव्यं कर्णोच्चं तु द्विभागतः ॥ ५४ ॥
एकांशं कम्पतुङ्गं तु तत्समं तु दलोदयम्।
महापट्टिर्द्विभागेन दलमेकांशमानतः ॥ ५५ ॥
कम्पमेकेन कर्तव्यमष्टाश्रं कुमुदान्वितम्।
अम्भोजकेसराख्यातं पादबन्धविशेषकम् ॥ ५६ ॥

अथ प्रतिबन्धानि।

चन्द्रदृक्शशिशिवांशकै रसैर्धातुभिश्च समभागिकैः क्रमात्।
वाजनं प्रतिमुखत्रिकश्रुतौ कर्णवृत्तकुमुदे च वप्रकम् ॥ ५७ ॥
षड्त्रिभागसमभागिके तले नागयक्षसदृशं मुखद्वयम्।
देवविप्रनृपमन्दिरेषु तद् योग्यकं ह्युरगबन्धकं भवेत् ॥ ५८ ॥
तुङ्गे षड्विंशदंशे खुरमथ जगतीं कैरवं कम्पकर्णं
कम्पं पद्मं कपोतं तदुपरि + तथा निम्नदन्तादिवक्त्रम्।
कम्पं भागेन षड्भिः शरशशिगुणचन्द्रैकवेदांशकांशै-
र्द्वाभ्यामेकेन कुर्यादमरनरपतेर्मन्दिरे मञ्चबन्धम् ॥ ५९ ॥
आत्ताधिष्ठानतुङ्गे तु चतुर्विंशतिभाजिते।
स्यादष्टभागैर्जगती सप्तांशैः कुमुदं भवेत् ॥ ६० ॥

पद्मं च पट्टिका कम्पश्चैकैकांशैर्गलः करैः ।
भागेनैवोर्ध्वकम्पं स्यात् त्रिभिर्भागैश्च वाजनम् ॥ ६१ ॥

वप्रबन्धमिदं प्रोक्तं विप्रजात्यर्हकं भवेत् ।
अधिष्ठानस्य चोत्सेधे षड्विंशतिविभाजिते ॥ ६२ ॥

उपानकैकभगेन जगत्युच्चं रसांशकम् ।
कुमुदं पञ्चभागेन कम्पमेकेन कारयेत् ॥ ६३ ॥

गुणांशं गलमानं तु कम्पमेकेन कारयेत् ।
पद्ममेकेन कर्तव्यं कपोतोच्चं गुणांशतः ॥ ६४ ॥

आलिङ्गमेकभागेन तत्समं त्वन्तरी भवेत् ।
प्रतिदुङ्गं द्विभागेन शिवांशं वाजनोदयम् ॥ ६५ ॥

प्रतिबन्धस्य भेदं तत् पद्मबन्धमुदाहृतम् ।
नक्षत्रैः पादुकोच्चं रचयतु जगतीं पङ्क्तिमातङ्गसंख्यैः
सप्तत्या कैरवोच्चं त्रितयसहितया कर्णमद्रिद्व्यांशैः ।
कम्पोत्सेधं समिद्भिः पुनरपि मनुभिः कन्धरं पट्टिकोच्चं
त्रिध्माशैः कुट्टिमोच्चे शतयुगयुतपञ्चाशदंशैर्विभक्ते ॥ ६६ ॥

शमानतः —

आलिङ्गमेकभागेन तत्समं त्वन्तरी भवेत् ॥ ६७ ॥

प्रतेरुच्चत्रिभागेन वाजनं चैकभागतः ।
अब्जबन्धमिदं नाम्ना भेदं तत्प्रतिबन्धके ॥ ६८ ॥

उपानराहितं सर्वं यथोक्तं प्रकरोतु वा ।
चतुर्विंशतिभागेन तलोत्सेधे विभाजिते ॥ ६९ ॥

उपानं त्वेकभागेन द्विभागं तु दलोदयम्।
तदूर्ध्वकम्पमेकांशं जगत्युच्चं शरांशकम् ॥ ७० ॥
वेदांशं कुमुदोत्सेधं पद्ममंशेन कल्पयेत्।
कर्णमेकांशमित्युक्तमूर्ध्वपद्मं शिवांशकम् ॥ ७१ ॥
वाजनोच्चं द्विभागेन भूम्यंशं पद्मतुङ्गकम्।
आलिङ्गमेकभागेन तत्समं कन्धरं भवेत् ॥ ७२ ॥
प्रतिमानं द्विभागं स्याद् वाजनं त्वेकभागतः।
स्कन्दकान्तमिदं नाम्ना प्रतिबन्धस्य भेदकम् ॥ ७३ ॥

मासूरे मिहिरद्वयांशि(नि) ततोंऽशैः पादुकं पावकै-
रष्टाभिर्जगतीं स्वरैः कुमुदकं शेषे दशांशोंऽशकैः।
त्रिद्व्यग्न्यश्विमितैर्गलं विरचयेत् कम्पं गलं पट्टिकां
प्रत्युद्यन्मकरास्यकादिरुचिरां सिंहादिभिश्चोज्ज्वलाम्॥
मासूरेंऽशैर्दिनेशांशिनि सति जगतीकैरवे श्रुत्युपायै-
स्तच्छिष्टैः पट्टिकामन्तरिमपि रचयेद् वाजनं च प्रतिं च।
प्रत्युत्पन्नक्रमाख्ये क्रम इति कथितः सर्वदेवालयेषु
संपूज्यो मानवानामपि गृहकरणेष्वेष आद्यङ्गमुख्यः॥
अधिष्ठानस्य चोत्सेधे षड्विंशतिविभाजिते।
उपानं त्वेकभागेन जगत्युच्चं रसांशकम् ॥ ७६ ॥
कुमुदं पञ्चभागेन कम्पमेकेन कारयेत्।
गुणांशं गलमानं तु कम्पमेकेन कल्पयेत् ॥ ७७ ॥
पद्ममेकेन कर्तव्यं कपोतोच्चं गुणांशकम्।
आलिङ्गमेकभागेनाप्यन्तरीं तु शिवांशतः ॥ ७८ ॥

प्रतितुङ्गं द्विभागेन शिवांशं वाजनोदयम् ।
प्रतिबन्धविशेषोऽयं मयबन्ध इति स्मृतः ॥ ७९ ॥

त्रिषडंशकृतोत्सेधे जङ्घे सार्धांशकं खुरम् ।
कम्पमर्धांशकं प्रोक्तं भूतांशैः पङ्कजोदयम् ॥ ८० ॥

तुङ्गे षड्विंशदंशे खुरमथ जगतीकैरवं कम्पकर्णे
कम्पं पद्मं कपोतं तदुपरि + पथा निम्नमन्तादिवक्रम् ।
कम्पं भागेन षड्भिः शरशशिगुणचन्द्रैकबन्धांशकांशे
द्वाभ्यामेकेन कुर्यादमरवरपतेर्मन्दिरे मञ्चबन्धम् ॥ ८१ ॥

अधिष्ठानस्य चोत्सेधे त्रयोविंशतिभाजिते ।
उपानमेकं द्वाभ्यां तु पद्ममेकेन (कल्पयेत्) ॥ ८२ ॥

कर्णं द्विभागमंशेन कम्पमेकेन कम्पकम् ।
द्व्यंशेन पट्टिकां विद्यात् कम्पमेकेन कल्पयेत् ॥ ८३ ॥

पद्ममेकेन कर्णं तु एकांशेनैव कल्पयेत् ।
एकांशेनाम्बुजं कुर्याद् गुणांशं कुमुदोदयम् ॥ ८४ ॥

पद्ममेकेन कर्तव्यमालिङ्गं त्वेकभागया ।
त्रिभट्टिमिन्दुभागेन द्विभागं प्रतिमानकम् ॥ ८५ ॥

वाजनं त्वेकभागेन कल्पयेत् तु यथाक्रमम् ।
प्रतिबन्धविशेषः स्यात् त्रिकर्णं तत् प्रकीर्तयेत् ॥ ८६ ॥

द्वाविंशद्भाजितोत्सेधे पादाभ्यां पादुकं शरैः ।
जगतीं कुमुदं वेदैः पट्टमंशेन कारयेत् ॥ ८७ ॥

एकेन कर्णमंशाभ्यां सवलभ्युत्तरं त्रिभिः।
कपोतं चतुरंशेन श्रीबन्धे प्रस्तरोच्छ्रयम् ॥ ८८ ॥
अष्टादशकृतोत्सेधे पूर्वोक्तक्रममाचरेत्।
नाम्ना कपोतबन्धं तत् प्रस्तरेण विना कृतम् ॥ ८९ ॥
तुङ्गेऽप्येकोनविंशांशे द्वाभ्यां पादुकमाशुगैः।
जगतीं च चतुर्भागैः कुमुदं षट्टमंशतः ॥ ९० ॥
अंशाभ्यां कर्णमर्धांशेनोत्तरं वलभिं भुवा।
सार्धाग्निभिः कपोतोच्चं कुर्यात् कलशबन्धके ॥ ९१ ॥
त्रयोविंशत्कृतोत्सेधे सार्धद्व्यंशेन पादुकम्।
वेदैर्वप्रं कैरवं तु त्रिभिरेकेन तद्वलम् ॥ ९२ ॥
भूम्यंशेनोत्तरं सार्धभागेन वलभिं तथा।
कपोतं गुणभागेन प्रस्तरं चतुरंशकैः ॥ ९३ ॥
नागबन्धमिदं नाम्ना कारयेत् सर्वधामसु।
पादबन्धेऽपि दृश्यन्ते (?) श्रीबन्धादिचतुष्टयम् ॥ ९४ ॥
अथ क्षुद्रसभादीनामाद्यङ्गोच्चे त्रिभाजिते।
पीठमंशेन पद्मं च कर्णिकामंशतोंऽशतः ॥ ९५ ॥
अथवा भित्तिवत् कुर्यादुपानाद्यङ्गवर्जितम्।
सप्ताष्टनवभिर्भक्ते मासुरोच्चेंऽशतः खुरम् ॥ ९६ ॥
क्रमाद् वेदशशाङ्कादिभागैः कर्णसमुन्नतिः।
वलभ्युत्तरमंशेन प्रस्तरोच्चं तु तत्समम् ॥ ९७ ॥
कपोतं वा प्रतिस्थाने कुर्यादेतेऽपि मञ्चकाः।

अथ कुमुदकरणम्।

कुमुदोच्चे षडंशे तु पादबन्धतले पुनः ॥ ९८ ॥

अधःपट्टं तदेकांशं मध्यपट्टं त्रिभागतः ।
ऊर्ध्वपट्टं तथा द्वाभ्यामेवं वाष्टाश्रमाचरेत् ॥ ९९ ॥
यथा तुल्यत्वमश्राणां तथा वा कारयेत् पुनः ।
संपूर्णगर्भिणीक्रोडतुल्यं स्यात् प्रतिबन्धके ॥ १०० ॥
सिंहव्यालगजेन्द्रादिमृगैर्नानारसान्वितैः ।
भूषयेत् प्रस्तरं भूतैर्वलाभिं च विभूषयेत् ॥ १०१ ॥
यत्र प्रासादकरणं तले तत्र समीकृते ।
होमां विन्यस्य परितस्तत्तद्द्रव्यैर्यथोदितैः ॥ १०२ ॥
भित्तिपादस्य विष्कम्भं द्विगुणं त्रिगुणं तु वा ।
होमानीप्रमिति ख्यातं तद्वा(ह्व)ल्यं तदर्धतः ॥ १०३ ॥
मानसूत्राद् बहिर्नीप्रं द्वित्रिदण्डमथापि वा ।
होमानीप्रं पुनः प्रोक्तमुपपीठं गलात् तु वा ॥ १०४ ॥
अधिष्ठानजगत्या वा पादुकाद् वा विमानके ।
होमोर्ध्वेऽब्जे प्रकर्तव्ये तत्पीठाद्धोमनिष्क्रमः ॥ १०५ ॥
पद्मस्य वेशरस्योच्चं समं पादोनमेव वा ।
तदूर्ध्वे वापि चाद्यङ्गं होमोर्ध्वं वोपपीठकम् ॥ १०६ ॥
तदूर्ध्वेऽब्जमधिष्ठानं वा करोतु यथारुचि ।

अथ समभूकरणसाधनावनतलक्षणम् ।

अथ कुर्यादवनतं पट्टिकाभिस्त्रिभिः पुनः ॥ १०७ ॥
साङ्गुलीकरमानाभिरत्र्यश्रं सम्बन्ध्य निश्चलम् ।
वापीं कुर्याज्जलैः पूर्णां तस्यां शङ्कुद्वयं न्यसेत् ॥ १०८ ॥

तोयोर्ध्वगततुङ्गं तु तयोर्मूध्नोः पदद्वयम्।
निधाय त्र्यश्रकस्यैतदूर्ध्वाश्रावद्धलम्बकम् ॥ १०९ ॥
तिर्यक्पट्ट्याश्च लम्बेन सङ्गदेशेऽङ्कमालिखेत्।
एवं कृत्वा ह्यवनतं तेन निम्नादि नीयताम् ॥ ११० ॥
अङ्कात् सूत्रगतिर्यत्र तन्निम्नं चान्यदुन्नतम्।
पट्टिकाङ्के सलम्बस्य संयोगे समभूतलम् ॥ १११ ॥

अथ गृहारम्भः।

गृहाणां करणे शास्ते मुहूर्ते स्थपतिः स्वयम्।
नीत्वाथ वाससी श्लक्ष्णे नवीने परिधाय च ॥ ११२ ॥
उत्तरीयानुलेपादिभूषणैश्च विभूषितः।
सम्पूज्याथ गणेशानं विप्रेभ्यो दीयतां वसु ॥ ११३ ॥
मुहूर्तदक्षिणां कृत्वा वाससाच्छाद्य पादुकम्।
आयङ्गार्यं तु तं तक्ष्णाप्याशीर्वादैर्द्विजेरितैः ॥ ११४ ॥
सहितं प्राङ्मुखः स्थित्वा विन्यसेत् तत्र पादुकम्।
जन्मादिस्तूपिपर्यन्तं वृद्ध्या निश्चित्य मन्दिरम् ॥ ११५ ॥

अथ पत्रमानादिकम्।

यावत्स्वायोच्चमानं गमयतु जगतीं बाह्यतो मानसूत्रात्
तत्तुल्यं कैरवं चोच्छ्रयसमचरणेनोर्ध्वपादांशकं च।
शिष्टं तत्पट्टिकाब्जादिकमपि गमयेन्मानसूत्रात् समन्तात्
तत्तच्छोभानुरूपं गमयतु जगतीसूत्रतः पादुकं च ॥
अम्बुजानां तु सर्वेषां निर्गमं तूच्चसंमितम्।
वेत्राणामपि सर्वेषां चतुर्भागैकनिर्गमम् ॥ ११७ ॥

तत्समं वा त्रिपादं वा महावाजनानिर्गमम् ।
निर्गमं मानसूत्रात् तु स्वोत्सेधचरणं तु वा ॥ ११८ ॥
तत्समं पादहीनं वाप्यर्धं सर्वेषु वस्तुषु ।
निर्गमं मानसूत्राद् वा तत्तत्स्थानात् तु वा पुनः ॥११९॥

पक्षान्तरम् —

पत्रमानमिति प्रोक्तमुत्तराज्जन्मनिष्क्रमम् ।
समन्तः (?) परितः कुर्याद् दिग्विदिक्ष्वङ्गुलाष्टकम् ॥ १२० ॥
ततः संवर्धयित्वाष्टमात्रं तस्माद् यथारुचि ।
अङ्गुलीषोडशयुतं द्विकरान्तं पुनः पुनः ॥ १२१ ॥
प्रायेण नृणां भवने पत्रमानमुदाहृतम् ।

अथालङ्कारः ।

प्रस्तरे वा गले वाथ कपोते वा विशेषतः ॥ १२२ ॥
पादान्तरेषु युग्मैर्वाप्ययुग्मैर्व्यालैः (?) पराङ्मुखैः ।
वलभ्या भूतहंसैस्तु भूषयेच्चाखिलेष्वपि ॥ १२३ ॥
प्रत्युत्सेधसमं वाथ त्रिपादं वार्धमेव वा ।
प्रतेरग्रं प्रकर्तव्यं पूर्ववत् पार्श्वयोर्द्वयोः ॥ १२४ ॥

अथ मुष्टिबन्धम् ।

पादान्तरेषु कर्तव्यं त्रिपट्टं गलसीमनि ।
मूलपादसमं व्यासं त्रिपट्टं पादमूलगम् ॥ १२५ ॥
पादान्तरगतं सर्वं त्रिपादं दण्डविस्तृतम् ।
पादबाह्यसमं वेशं नीप्रं प्रतिसमं भवेत् ॥ १२६ ॥

युग्मं वायुग्मसंख्यं वा सिंहव्यालादिभूषितम्।

अथ कूटकोष्ठादिष्वधिष्ठाननियमः।

प्रासादे प्रतिबन्धश्चेत् कूटकोष्ठादिकेष्वपि ॥ १२७ ॥
प्रतिबन्ध एव कर्तव्यः पादबन्धे तथैव च।
स्वजातिसङ्करं नैव दोषायान्यदनर्थकृत् ॥ १२८ ॥
द्वारार्थं वा स्थलार्थं वा जलमार्गार्थमेव वा।
जन्मादिपञ्चवर्गेषु तत्तदङ्गावसानके ॥ १२९ ॥
छेदनं नैव दोषाय पादबन्धतलेऽखिले।
प्रतेश्छेदं न कर्तव्यं प्रतिबन्धकुले (?) कदाचन ॥ १३० ॥
जन्मच्छेदं न कर्तव्यं यत्रकुत्रापि सर्वतः।
विपदामास्पदं ह्येतत् तस्मात् तन्नैव कारयेत् ॥ १३१ ॥

इति शिल्परत्ने अधिष्ठानलक्षणं नाम
एकोनविंशोऽध्यायः।

अथ विंशोऽध्यायः।

अथ नाललक्षणम्।

प्रत्यन्ते वा गलान्ते रचयतु तदुदङ्मध्यसूत्रेऽम्बुमार्गं
सोमेशानान्तरोद्यद्दसुनवदशभागादिकं वा व्यतीत्य।
मासूरोत्सेधमात्रं चरणविरहितं वार्धवृद्धं प्रणालं
निर्यातं वाह्यतोऽन्तर्विनिहितमधिकुड्यं तदर्धांशमात्रम् ॥ १ ॥
स्वायामाग्न्यंशकादिप्रविततनिजमूलां ++शादिविस्ती-
र्णाग्रं विस्तारतुल्यं त्रिपददलघनं त्र्यंशकल्पाम्बुमार्गम्।

व्यात्तव्यालास्यमध्यप्रसृमरनिजमूलोज्ज्वलं गोमुखं त-
न्मुक्तादामादिवल्लीवलयपरिगतं शुण्डुभिर्मण्डितं च ॥ २ ॥

अथवान्यप्रकारेण नाललक्षणमुच्यते —

प्रतिबन्धे प्रतेरन्ते तदन्ते पट्टिकान्तके।
गलान्ते कुमुदान्ते वा वप्रान्ते पादुकान्तके ॥ ३ ॥

छिद्रं कुर्यादधश्चोर्ध्वं नालं तस्मिन् सुयोजयेत्।
जान्वङ्गुलं समारभ्य गुणाङ्गुलविवर्धनात् ॥ ४ ॥

चतुर्विंशाङ्गुलान्तं तु नालायामं हि पञ्चधा।
भित्तिबाह्यगतं तत्तत्स्यार्धं गर्भगेहके ॥ ५ ॥

वेशयित्वाथवा भित्तेरभ्यन्तरसमं तु वा।
वस्वङ्गुलं समारभ्य द्विद्व्यङ्गुलविवर्धनात् ॥ ६ ॥

कलाङ्गुलावसानं तु विस्तारं पञ्चधा क्रमात्।
तन्मूलतारपञ्चांशे त्र्यंशं स्यादग्रविस्तृतम् ॥ ७ ॥

तद्विस्तारसमं वाथ त्रिपादं वा दलं घनम्।
विस्तारस्य त्रिभागैकं छिद्रे तारं नतं तथा ॥ ८ ॥

नालमध्ये तु कर्तव्यं निम्नोन्नतविवर्जितम्।
मूलादग्रनतं किञ्चिन्मूलं सिंहास्यबन्धितम् ॥ ९ ॥

गजोष्ठसदृशालंब्य (?) यथासुन्दरमग्रकम्।
व्यालेभसिंहभूताद्यैर्वृतं नालं करोतु वा ॥ १० ॥

जगत्यङ्गुलमारभ्य द्विद्व्यङ्गुलविवर्धनात्।
आसंकृत्यङ्गुलं नालस्यायामं पञ्चधा स्मृतम् ॥ ११ ॥

मयोऽष्टाङ्गुलमारभ्य द्विद्व्यङ्गुलविवर्धनात्।
नालं षोडशमात्रान्तं पञ्चधेति जगाद ह ॥ १२ ॥
त्रिचतुष्पञ्चषण्मात्रं तारं तस्य समं घनम्।
तारात् पञ्चत्रिभागं स्यादग्रं नालस्य वा पुनः ॥ १३ ॥
नालं पुंशिलया कार्यं नालस्य वरुणोऽधिपः।
अथवा पीठनालेन समायामादिसंयुतम् ॥ १४ ॥
शुण्डुभिश्चित्रवल्ल्यादिभूषणैश्च विभूषितम्।
एवं तले तले कार्यं गोमुखं प्रस्तरान्तरे ॥ १५ ॥
दक्षिणोदङ्मुखेष्वत्र विमानेषु महामतिः।
प्रणालं प्राङ्मुखं कुर्यात् पूर्वसूत्रेऽथवा पुनः ॥ १६ ॥

इति शिल्परत्ने नाललक्षणं नाम
विंशोऽध्यायः।

अथ एकविंशोऽध्यायः।

अथ भित्तिः।

चित्वेत्यधिष्ठानमिहानुरूपं समं तलीकृत्य शिलाप्रतानैः।
विभज्य गर्भान्तरबाह्यभित्तिं तन्मध्यनाडीं रचयेद् यथार्हम् ॥

वल्ल्यादितिथ्यधिकौजविभागभक्ते
व्यासे गृहस्य नयनाद्युरगान्तिमांशैः।
पञ्चांशतश्च वसुभागयुतेऽर्धतश्च
गर्भालयस्य वितर्तिं नवधोदितेति ॥ २ ॥

बाह्या गृहव्यासगजांशतः स्याद् भित्तिः परा गर्भगजांशतश्च।
नाडी समन्तादुभयान्तराले सम्मेल्य वा भित्तियुगं गृहेऽल्प ॥

विस्तारेऽल्पगृहे क्वचिद् विशिखभक्ते (वा ?)ऽन्तःपदे पीठिकां
पङ्क्त्या गर्भगृहं करोतु परितः पङ्क्त्या च भित्तिं घनाम् ।
तस्मिन् नन्दविभाजिते सति विधायैवं ततो वीथिकां
भित्तिं चोभयपङ्क्तितो विरचयेद् द्वारं च कोष्ठेऽग्रतः ॥ ४ ॥

प्रासादस्य त्रिभागैकं सप्तभागानलांशकम् ।
विशेषाद् गर्भगेहस्य विस्तारं प्राह काश्यपः ॥ ५ ॥

भित्तिस्तम्भस्य तारो यस्तेन द्वित्रिचतुर्गुणम् ।
पञ्चषड्गुणकं वाथ भित्तिविष्कम्भमिष्यते ॥ ६ ॥

क्वचित् तद्भारबहलतुल्यं भित्तेर्विशालकम् ।
अष्टाङ्गुलं समारभ्य द्व्यङ्गुलविवर्धनात् ॥ ७ ॥

यावद् द्विहस्तकं तावत् कुर्याद् वा भित्तिविस्तृतम् ।
स्वस्योत्सेधशतांशैकहीनं कुड्याग्रविस्तृतम् ॥ ८ ॥

स्तम्भवद् वा बहिर्भागमन्तर्भागं समं भवेत् ।
तत् कुड्यं पञ्चधा प्रोक्तं तत्तद्द्रव्यविशेषतः ॥ ९ ॥

शिलामयं चेष्टकं च जालकामयमित्यपि ।
फलकामयमप्येतन्मृन्मयं च परं पुनः ॥ १० ॥

यथार्हव्यासतुङ्गं च कुड्यं शैलं शिलामयम् ।
तथैवेष्टकया कार्यं कुड्यं स्यादिष्टकामयम् ॥ ११ ॥

नानाजालकनिष्पाद्यं कुड्यं यज्जालकामयम् ।
यथार्हस्तम्भविन्यासं शस्तदारुमयक्रियम् ॥ १२ ॥

फलकाभिश्चितं मध्ये कुड्यं स्यात् फलकामयम् ।
सार्धाङ्गुलं समारभ्य यवैकैकविवर्धनात् ॥ १३ ॥

फलकाया घनं प्रोक्तं त्र्यङ्गुलान्तं मनीषिभिः।
मृत्तिकाभिः प्रशस्ताभिः कषायसलिलादिभिः ॥ १४ ॥
मर्दिताभिश्च रचितं यत् कुड्यं तत् तु मृन्मयम्।
कुड्यव्यासत्रिवेदांशबहलां वाग्रपङ्कजाम् ॥ १५ ॥
पट्टिकां चतुरश्रां वा कुड्योपरि नियोजयेत्।
प्रत्युत्तरान्तर्विरचय्य भित्तिं ततः समन्तात् सुदृढैः शिलाद्यैः।
तां भूषयेद् वेदिकयाङ्घ्रिमूले तदूर्ध्वतश्चोज्ज्वलपञ्जराद्यैः ॥
यद्भूमिमन्त्रविम्बस्य प्रतिष्ठापि निरूपिता।
तद्भूम्यन्तं घनं कुर्यादिति शास्त्रविदो विदुः ॥ १७ ॥
प्रत्युत्सेधेन पादायतिवसुमुनिषड्भागतोत्स्यर्धकेन(?)
द्वित्रिघ्नेनाङ्घ्रितारेण च भवति समोऽत्युच्छ्रयो वेदिकायाः।
उत्सेधे द्व्यंशितेऽधोवधिगुणरशनान्तर्यथाष्टाद्रिषड्भा-
गेऽशैः कम्पाब्जकम्पाः शशिकरशशिभिः शेषतोऽधोगलं च ॥
अध्यर्धदण्डमानं तु कन्यसा वेदिका मता।
पादोनकलिदण्डं तु वेदिका मध्यमा स्मृता ॥ १९ ॥
त्रिदण्डं वेदिकातुङ्गं श्रेष्ठमित्याह काश्यपः ॥ २० ॥
(प)ङ्क्त्या प्रत्युत्तरान्तर्गतचरणमितिं भोगिभिर्भागतोऽधो-
वेदिं वेदैश्च पादानलरचितवलभ्युत्तरं भागतोऽथ।
यावत् स्वोत्सेधनीप्रप्रसरवलभिभिः स्वार्हनीप्रं कपोतं
गेहं + सप्तमेनोज्ज्वल + + गृहंपिण्डिं करोत्वष्टमेन ॥
ऊर्ध्वभूमौ पादतुङ्गे सप्तभागविभाजिते।
एकांशं खण्डहर्म्याणां वेदिकोभयमीरितम् ॥ २२ ॥

त्रिचतुष्पट्कभागैर्वा गलोत्सेधे विभाजिते ।
गलमूलगवेद्युच्चसंशं श्रेष्ठान्तराधमम् ॥ २३ ॥

कर्णमाने तु तन्मूले कम्पमेकेन कल्पयेत् ।
शेषं कर्णोदयं प्रोक्तं तत्कम्परहितं तु वा ॥ २४ ॥

पुष्पखण्डा चित्रखण्डा शैवला चित्रशैवला ।
इति नाम्ना भवेद् वेदी तत्तद्भूषणभेदतः ॥ २५ ॥

कम्पनिद्राकम्पयुता पुष्पवत्खण्डमण्डिता ।
मूले पादान्विता या सा पुष्पखण्डेति कथ्यते ॥ २६ ॥

सैव निद्राकम्पपट्टपद्मपद्मविचित्रिता ।
पादपादान्तरे चित्रा चित्रखण्डाभिधीयते ॥ २७ ॥

स्तम्भकम्पाब्जपट्टाढ्या पट्टे शैवलचित्रिता ।
ऊर्ध्वाधः पद्मपत्राढ्या पादे पादान्तरेऽपि च ॥ २८ ॥

नरनारीपत्रचित्रा शैवलाख्या हि वेदिका ।
सैवाधरोर्ध्वाम्बुजयोः वेत्रयुग्ममनोरमा ॥ २९ ॥

प्राग्वद् विचित्रवेषा स्यात् सा वेदी चित्रशैवला ।
अध्यर्धांशं तु वा पद्मनाद्यं ह्यंशमथापि वा ॥ ३० ॥

चित्रशैवलविख्यातवेदिकाया विशेषतः ।
पुष्पखण्डा चित्रखण्डा नृणां देवादिके स्मृते ॥ ३१ ॥

वेदीचतुष्कं स्तभादौ देवागारेषु सम्मतम् ।
अथवा क्षुद्रहर्म्याणां वेदिकोत्सेधमानतः ॥ ३२ ॥

षड्भक्ते षट्टमंशेन कर्णं द्वाभ्यां प्रकल्पयेत् ।
ऊर्ध्ववाजनमेकांशेनाब्जमंशेन कारयेत् ॥ ३३ ॥

तदूर्ध्वपट्टमेकेन कर्णं चरणभूषितम्।
सर्वासां वेदिकानां तु गलमङ्घ्रिविभूषितम्॥ ३४॥
मध्यस्तम्भसमं व्यासं नीप्रकं वेदिकाङ्घ्रिणः।
गर्भभित्तित्रिभागैकमङ्घ्रेर्वेद्यङ्घ्रिवेशनम्॥ ३५॥
चतुर्भागैकभागं वा पञ्चभागैकमेव वा।
अथवान्यप्रकारेण भवेद् वेद्यास्तु निर्गमः॥ ३६॥
कुड्यपाद्वाह्यमानं तु पार्श्वयोः प्रस्तरान्तकम्।
तेन षट्सप्तरन्ध्राष्टदशभागैर्विभाजिते॥ ३७॥
एकांशरहितं शेषं वेदिकायास्तु निर्गमः।
सर्वत्र प्रस्तरस्योर्ध्वे वेदिका स्याद् यथार्हकम्॥ ३८॥
जालार्थं वेदिका नैव छिन्द्यादन्यत्र तोरणात्।
द्वारार्थं वा यथोद्देशं वेद्याश्छेदो न दुष्यति॥ ३९॥
प्रस्तरोत्तरयोर्मध्यं झषालस्तम्भमीड्यते।
उपानोत्तरयोर्मध्यं निध + स्तम्भमुच्यते॥ ४०॥
प्रासादः सकलोऽङ्घ्रितोरणचतुर्द्वारान्वितो मण्डितः
स्तम्भाभ्यन्तरजालपञ्जरयुतो वा पञ्चहस्तादितः।
युक्तो मूलतले विदि + + + + + + + + + + +
+ + + + + + + + + + +

अथवा चरणायामे षट्सप्ताष्टनवांशिते ।
पङ्क्तिरुद्रार्कभागैर्वा भक्ते भागाङ्घ्रिविस्तरे ॥ ४४ ॥
स्तम्भमूलविशालं स्यादेवं सकलभूमिषु ।
तस्मादग्रविशालं तु कारयेत् पूर्वमुक्तवत् ॥ ४५ ॥
कुड्यस्तम्भाग्रविपुलं यत् तद्दण्डमिति स्मृतम् ।
तेन मेयानि सर्वाणि विमानांशानि सर्वशः ॥ ४६ ॥

प्रत्युत्तरान्तर्गतचरणसमुन्मानकेष्टंकादिभि(?)

स्तेष्वेकांशात्तमूलप्रतातितदुरगांशादिहीनाग्रतानान् ।
दारुस्तम्भांस्तदर्हे विहिततातिदलाग्न्यब्धिभागोनतानान्
कुड्यस्तम्भांश्च कुड्ये रचयतु चरणाग्रप्रतानोऽत्र दण्डः ॥
स्तम्भोत्तरादिकाङ्गानां द्रव्यं दारूपलेष्टकाः ।
स्तम्भान्तरं द्विहस्तादि भवेत् पञ्चकरान्ततः ॥ ४८ ॥
स्तम्भयोरन्तरं हस्ताद्धीनं नैव समाचरेत् ।
+ + + + यशः कुर्याच्चतुर्हस्तावसानकम् ॥ ४९ ॥
षडङ्गुलप्रवृद्ध्या तु नव भेदाः प्रकीर्तिताः ।
गृहीतांशवशाद् वापि यथायुक्त्या प्रयोजयेत ॥ ५० ॥

प्रासादः सकलोऽङ्घ्रितोरणचतुर्द्वारान्वितो मण्डित-
स्तम्भाभ्यन्तरजालपञ्जरयुतो वा पञ्चहस्तादितः ।
युक्तो मूलतले विदिक्स्थितचतुष्कूटैः परं तत्परः
शालः कूटकनासिकादिविलसज्जालोज्ज्वलत्पञ्जरम् ॥
स्तम्भाः कोणचतुष्कमध्यविनिवेश्याः स्युः प्रतेरूर्ध्वतः
सामान्येन समान्तराः सुरविमानेपूदिता द्वादश ।

एके विंशतिरीशदोःप्रभृतिकेष्वेतेषु ते नैकधा
चोक्ताः स्वाकृतिभूषणक्रमवशादेष्वर्चयेच्चोत्तरम् ॥ ५२ ॥

युग्मं वा(स्यादयुग्मं वा)पादं देवालयादिषु ।
युग्ममेव नृणां शस्तमयुग्मं नैव कारयेत् ॥ ५३ ॥

मूले चाग्रे च पादानां तत्तद्विस्तारभागतः ।
चतुष्पञ्चांशतो वाथ शिखा स्यादुचितायता ॥ ५४ ॥

तदर्धं वा त्रिभागोनं चतुर्भागोनमेव वा ।
कुड्यस्तम्भविशालः स्यात् तदर्धं वास्य निष्क्रमः ॥ ५५ ॥

विस्तारस्य त्रिपादं वा चतुर्भागैकमेव वा ।
अष्टाश्रवृत्तवेदाश्रेष्वथ साधारणं तु वा ॥ ५६ ॥

नामान्येतेष्वनेकानि भवन्त्याकारभूषणैः ।
कार्याः स्युश्चरणा युगाष्टनृपकोणाः सर्वतो वर्तुला
विस्तारत्रिगुणोपरित्रिगुणविस्तारोन्मिताष्टाश्रकाः ।
मूलोद्भावितकर्णसूत्रचतुरश्रोर्ध्वांशवृत्ताः पुनः
शुण्डूद्भेदविचित्रवृत्तिरुचिरा वारब्धगेहोचिताः ॥ ५७ ॥

मूलादग्रं युगाग्रं तु कु(म्भ)मण्ड्यादिसंयुतम् ।
ब्रह्मकान्तमिति ख्यातं वस्वश्रो विष्णुकान्तकः ॥ ५८ ॥

षडश्र इन्द्रकान्तः स्यात् सोऽयं वा स्कन्दकान्तकः ।
द्वादशाश्रो भानुकान्तश्चन्द्रकान्तः कलाश्रकः ॥ ५९ ॥

वर्तुलश्चेदीशकान्तः अथवा स्वस्य दीर्घतः ।
आद्यत्रिभागो वेदाश्रो वृत्तिस्त्वग्रत्रिभागतः ॥ ६० ॥

तयोर्मध्ये तु वस्वश्रः स भवेद् रुद्रकान्तकः ।
मूले पद्मासनश्चाथ चक्रवाकैरलङ्कृतः ॥ ६१ ॥
सभद्रमध्यभागस्तु भद्रकान्तो विमण्डितः ।
व्यालेभभूतसिंहैस्तु मूले यः परिमण्डितः ॥ ६२ ॥
इष्टका(न्तः) तथैवोर्ध्वं तत्तत्कान्ताह्वयो भवेत् ।
वृत्त एव स्वदीर्घेण शुण्डुभेदेन संयुतः ॥ ६३ ॥
शुण्डुपादः पिण्डिपादः स चेन्मुक्ताविचित्रितः ।
मूले वेदाश्रकश्चोर्ध्वं षोडशाश्राद्यलङ्कृतः ॥ ६४ ॥
स्यान्मूलचतुरश्राख्यं पद्मं पद्मासनं स्मृतम् ।
मूलाग्रयोस्तु वेदाश्रो मध्येऽष्टाश्राद्यलङ्कृतः ॥ ६५ ॥
वज्रकान्तस्तु विज्ञेयो भक्तास्तम्भः समौक्तिकः ।
यद्रत्नचित्रितस्तम्भस्तत्तद्रत्नाभिधो भवेत् ॥ ६६ ॥
मूले पद्मासनो मध्ये षोडशाश्रैरलङ्कृतः ।
ऊर्ध्वाश्रचतुरश्रोऽङ्घ्रिश्चित्रखण्डाह्वयः स्मृतः ॥ ६७ ॥
स एवाष्टाश्रको मध्ये श्रीबन्धः पट्टबन्धवान् ।
विष्कम्भकर्णमानेन स्तम्भाग्रे चतुरश्रकम् ॥ ६८ ॥
तदधस्त्वर्धदण्डेनाप्यब्जमष्टाश्रसंयुतम् ।
दण्डमानेन तस्याधो वस्वश्रं परिकल्पयेत् ॥ ६९ ॥
तदधः पूर्ववत्पद्मं तस्याधो दण्डमानकम् ।
चतुरश्रसमायुक्तं तदधः पद्ममुक्तवत् ॥ ७० ॥
मूलेऽवशेषं वेदाश्रं चित्रखण्डाह्वयस्य च ।
मध्ये कलाश्रः पट्टेन बन्धः श्रीवत्ससंज्ञकः ॥ ७१ ॥

पट्टक्षेपणसंज्ञः स्याच्चतुरश्रत्रिपट्टवान्।
मूलाग्रयोस्तु विपुलो मध्ये रामांशतः कृशः ॥ ७२ ॥
वृत्तिश्चेद् दण्डपादाख्यो मूलशोलूखलासनः (?)।
मूलव्यासे तु सप्तांशे स्तम्भानामथवा पुनः ॥ ७३ ॥
द्व्यंशोनो मध्यभागः स्यादेकांशोनोऽग्रविस्तरः।
इत्युक्ता निखिलाः स्तम्भाः कुम्भमण्ड्यादिभूषणैः ॥ ७४ ॥
संयुक्ता वा वियुक्ता वा भवन्त्यखिलवेश्मसु।
ओमां कुर्वीत दण्डद्वयततचरणोच्चां घटं दण्डयुग्म-
व्यासं साङ्घ्र्यादिदण्डोच्छ्रयमुदधिततां दण्डतोऽङ्घ्रयूनदीर्घाम्
मण्डीं दण्डप्रथाङ्घ्र्यंशकरहितघनं वीरकाण्डं त्रिसार्धे-
पूदन्वद्दण्डदीर्घौ चरणततदधोच्छ्रयां पोतिकां च ॥ ७५ ॥
कुम्भाः स्युः पादविष्कम्भाच्चतुर्थांशाधिकोन्नताः।
सार्धा वा सत्रिपादा वा द्विगुणा वा भवन्ति हि ॥ ७६ ॥
श्रीकरं चन्द्रकान्तं च सौमुख्यं प्रियदर्शनम्।
इति कुम्भाश्चतुर्धा स्युर्वृत्तानां श्रीकरो भवेत् ॥ ७७ ॥
पादानां वसुकोणानां कुम्भः स्यात् प्रियदर्शनः।
अथवा दण्डमानेन कुर्यादेवं घटोन्नतम् ॥ ७८ ॥
घटोच्छ्रये नवांशे धृग् भागेन परिकल्पयेत्।
चतुर्भिः कुम्भ एव स्यात् कर्णोऽशेनांशतो मुखम् ॥ ७९ ॥
भागेन पद्ममेकेन पीठिकोर्ध्वादधोगतम्।
स्तम्भाग्रकर्णमानेन यो व्यासः समविस्तृतः ॥ ८० ॥

---

१. 'द' ख. पाठः.

तस्य कर्णेन सदृशं कुम्भविस्तारमेव वा ।
स्तम्भव्याससमं प्रोक्तं तारं धृक्कर्णयोः स्मृतम् ॥ ८१ ॥
तदधो लशुनमूलं तत्तुङ्गं दण्डमानतः ।
स्वाष्टांशाधिकविस्तारं तस्याधः पङ्कजं पुनः ॥ ८२ ॥
पादतारसमं तारमर्धदण्डमथापि वा ।
त्रिपादं वाब्जकस्योच्चं तस्याधः कल्पयेत् पुनः ॥ ८३ ॥
मालास्थानं तदुत्सेधं दण्डार्धं दण्डमेव वा ।
तस्याधो दण्डमानेन मुक्तादामविभूषणम् ॥ ८४ ॥
एतेषां स्तम्भविस्तारतुल्यं व्याससमुदाहृतम् ।
दण्डं वा सार्धदण्डं वा मूले पद्मासनोदयम् ॥ ८५ ॥
द्विगुणं तस्य विस्तारं पद्माकारं तु कारयेत् ।
तत्पद्मासनतुङ्गे तु चरणाना षडंशिते ॥ ८६ ॥
ऊर्ध्वपट्टं तदेकांशमूर्ध्वपद्मं तथांशतः ।
कर्णमर्धेन कर्तव्यमधःपद्मं द्विभागिकम् ॥ ८७ ॥
तदधःपट्टमेकांशमधस्तादर्धमम्बुजम् ।
स्तम्भानां कुम्भतश्चोर्ध्वं सर्वेषां फलका भवेत् ॥ ८८ ॥
त्रिदण्डं फलकाव्यासं कन्यसं सार्धलोकतः ।
चतुर्दण्डविशालं तु मण्ड्याश्चोत्तममुच्यते ॥ ८९ ॥
अथवा फलकाव्यासः कुम्भकर्णसमो भवेत् ।
सर्वेषां फलकानां तु तुङ्गं पादोनदण्डतः ॥ ९० ॥
स्तम्भाग्रतुल्यं मण्डयुच्चं पञ्चभागोनमेव वा ।
पञ्चभागं त्रिभागं वा यथायोग्यं करोतु च ॥ ९१ ॥

तदुत्सेधं त्रिधा भङ्क्त्वा भागेनोत्सन्धिरूर्ध्वतः।
तदधो वेत्रमेकांशं तस्याधोऽम्बुजमंशतः ॥ ९२ ॥

अथवा फलकातुङ्गे पञ्चभागविभाजिते।
सार्धेन फलकातुङ्गं तत्समो वेत्रनिर्गमः ॥ ९३ ॥

द्वाभ्यामब्जं प्रकर्तव्यं तदाकरोऽधुनोच्यते।
नागपत्रसमाकारमावेत्रादब्जपद्मवत् ॥ ९४ ॥

अथ नागफणाकारमब्जं कुर्यान्मनोहरम्।
विपरीतं विरूपं च वर्ज्यं तदशुभं यतः ॥ ९५ ॥

मण्ड्यूर्ध्वे वीरकाण्डः स्यात् तत्तुङ्गं फलकोक्तवत्।
अग्रपादविशालं तु विशालं तद्युगाश्रकम्(?) ॥ ९६ ॥

तदूर्ध्वे पोतिकां कुर्यान्नानाभेदविचित्रिताम्।
मूलपादसमव्यासा पोतिका चर उत्तमा(?) ॥ ९७ ॥

पादमध्यविशालेन समव्यासा च मध्यमा।
अग्रपादविशालस्य समा कन्यसबोधिका ॥ ९८ ॥

विस्तारसदृशोत्सेधा पञ्चदण्डायतान्विता।
उत्तमा बोधिका ख्याता तारत्रिद्व्यंशकोन्नता ॥ ९९ ॥

चतुर्दण्डायतोपेता मध्यमा सा प्रकीर्तिता।
विस्तारार्धसमुत्सेधा गुणदण्डायतान्विता ॥ १०० ॥

कन्यसा बोधिका ख्याता तारे वाथाशुगांशिते।
एकोनमुच्चं मध्याया नीचायास्त्र्यंशमुन्नतम् ॥ १०१ ॥

बोधिकोच्चे त्रिभागे तु भूम्यंशेनोर्ध्वपट्टिका।
मध्येऽशेन तरङ्गः स्याच्छताद्यैर्भूषितं तु वा ॥ १०२ ॥

तदधस्त्वेकभागेन मुष्टिबन्धं तु कारयेत् ।
त्रिभागे बोधिकोत्सेधे साधांशेनाग्रपट्टिका ॥ १०३ ॥
तदर्धार्धेन तदधः क्षेपच्छायान्वितं भवेत् ।
तदुच्चार्धात् त्रिभागानामंशाभ्यां वात्र कल्पयेत् ॥ १०४ ॥
सप्तभ्यासार्धात् त्रिपादात् कुर्याद् वा तास्वग्रमण्डनम् ।
दण्डं त्रिपादमर्धं वा छायामानं तदग्रयोः ॥ १०५ ॥
ऊर्ध्वस्थपट्टिकाधस्थाच्छायाकारं प्रकल्पयेत् ।
अधस्थाद् बोधिकायां तु स्वाकारं प्रवदाम्यहम् ॥ १०६ ॥
मुष्टिबन्धं त्रिभागैकं विस्तारादर्धमेव वा ।
पार्श्वयोरुभयोः शेषं छायाकारं भवेदिह ॥ १०७ ॥
समुद्रक्षेपणं मध्यपट्टं पत्राद्य(म?)लङ्कृतम् ।
पार्श्वयोस्तु तरङ्गाः स्युः समाश्चान्यो(न्य)हीनकाः ॥ १०८ ॥
तरङ्गाश्चात्र वेदर्तुवस्वाशादित्यसंख्यकाः ।
बहवोऽपि समाश्चैके तुल्या उभयपार्श्वयोः ॥ १०९ ॥
सागरे वीचिकाकाराः पट्टिकाश्छन्नमध्यमाः ।
पार्श्वयोर्मुष्टिबन्धाग्रं व्यालरूपादिकल्पितम् ॥ ११० ॥
महार्णवी च पत्री च चित्री चेति त्रिधैव सा ।
भूतेभमकरव्यालरत्नबन्धविचित्रिता ॥ १११ ॥
वल्लीचित्राग्रपट्टा च सा ख्याता चित्रपोतिका ।
केवलं पत्रवल्लीभिर्विचित्रा पत्रपोतिका ॥ ११२ ॥
तरङ्गमात्रचित्रा या पोतिका स्यान्महार्णवी ।
बोधीमूलाग्रयोः कार्यावग्रौ कीलसमन्वितौ ॥ ११३ ॥

वोधिकारार्धकं वाथ त्रिपादं वाग्रनीग्रकम्।
तन्नीग्रसदृशं तारमम्भोजाकारकल्पितम् ॥ ११४ ॥
अग्रमध्यगतं कीलं तत्त्रिभागविशालकम्।
अम्भोजमुकुलाकारं कीलपृष्ठं प्रकल्पयेत् ॥ ११५ ॥
वोधिकाखण्डमण्डीनि कुम्भं लशुनमूलकम्।
अम्भोजमालां चानानि(?) पादपीठं पुनः क्रमात्॥ ११६ ॥
क्रमेण योजयेदग्रात् सर्वस्तम्भेषु बुद्धिमान्।
तत्र वोधिकया हीनं कारयेद् वापि पीठकम् ॥ ११७ ॥
दारुपाद इति प्रोक्तं तद्विस्तारसमं तु वा।
अध्यर्धं द्विगुणं वाथ विस्तारं त्विष्टकाङ्घ्रिषु॥ ११८॥
पादे शिलामये चैव कारयेत् सर्ववेश्मसु।
मित्रपादं न कुर्वीत मानुषाणां गृहे पुनः ॥ ११९॥
देवागारे न दोषाय मित्रपादा भवन्ति हि।
अथवा क्षुद्रहर्म्याणामन्यथा चरणाः स्मृताः ॥ १२० ॥
मूलतारेण तन्मूलत्रिगुणा वाथ सार्धकम्।
चतुर्गुणं च कुर्याद्वा चतुरश्रं तथाग्रतः ॥ १२१ ॥
मूलतारसमं मध्यं तयोरष्टाश्रमाचरेत्।
अष्टाश्रमध्ये तत्तारं तुल्यं वेदाश्रखण्डकम् ॥ १२२ ॥
मध्यखण्डं विना वात्र मानुषाणां निकेतने ॥ १२३ ॥

इति शिल्परत्ने भित्तिवेदिकास्तम्भलक्षणं नाम
एकविंशोऽध्यायः।

अथ द्वाविंशोऽध्यायः ।

अथ द्वाराणि ।

गर्भागारप्रताने शिववसुदिनकृच्छैलतिथ्यांशितेंऽशै-
र्बिम्बद्वारोच्छ्रयः स्याद् गिरिशरतुरगाम्नायमातङ्गसंख्यैः ।
उत्सेधेऽत्रैकविंशत्यतिधृतितिथिविश्वाङ्कभक्ते प्रकल्पे
व्यासो दिङ्नन्दशैलोर्म्युदधिपरिमितांशैः क्रमात् कल्पनीयः॥

व्यासे गर्भनिकेतनस्य दहनेषुद्वारनेत्रांशिते
लिङ्गद्वारसमुच्छ्रयं वितनुयाद् द्वित्रीषुचन्द्रांशकैः ।
तस्मिन् द्वारसमुच्छ्रयेऽथ नयनात्यष्टीशशैलांशिते
तद्विस्तारमिलामहोरगशराग्न्यंशैः क्रमात् कल्पयेत् ॥

कुर्यात् सर्वसुरेषु शैलवसुनन्दाशांशितेऽङ्घ्र्युच्छ्रये
द्वारोत्सेधमिहैकभागरहितं विस्तीर्णमात्मार्धतः ।
योगौ स्तम्भसमाधिपाददलविस्तीर्णौ स्फुरद्वाजनौ
विस्तारार्धघनौ भुजङ्गमपतङ्गाढ्यौ च मूलाग्रयोः॥ ३ ॥

अथवा पादतुङ्गस्य दशांशाष्टांशकं तु वा ।
एकद्वित्रिचतुष्पञ्चषट्सप्ताष्टनवाङ्गुलैः ॥ ४ ॥

तुङ्गार्धादधिकं हीनं द्वारविस्तारमुच्यते ।
द्वारायामे तु नन्दांशे पञ्चांशं वास्य विस्तृतम् ॥ ५ ॥

लब्धोत्सेधे तु दिङ्नन्दवसुसप्तांशके क्रमात् ।
सप्तषट्पञ्चवेदांशो द्वारव्यासस्तु मानुषे ॥ ६ ॥

स्वस्वयोन्या गृहादीनां कल्प्यन्तां द्वारयोनयः।
दीर्घाच्छेषं तु वा तत्र द्वाराणां विस्तृतं भवेत् ॥ ७ ॥
अथवा गुणतारं वा कुर्याद् द्वारविधौ बुधः।
द्वारव्यासोच्चमखिलमङ्गुलिच्छेदवर्जितम् ॥ ८ ॥
यथा तथा प्रकर्तव्यं विस्तारायामकल्पने।
गर्भागारस्य विस्तारे मनुभक्तेऽर्कभागतः ॥ ९ ॥
द्वारायामं तदिध्मांशं दशभागं विशालकम्।
इदं तु वैष्णवं द्वारमथ शैवालये पुनः ॥ १० ॥
गर्भव्यासार्कनागांशं लिङ्गद्वारायतं पुनः।
आयतार्धं तु विस्तारमथवा गर्भविस्तरे ॥ ११ ॥
सप्तांशे सति वेदांशं द्वारदीर्घमुदाहृतम्।
तद्विश्वांशषडंशं स्याद् विस्तृतिः शिवमन्दिरे ॥ १२ ॥
नवपञ्चांशमुच्चं स्याद् गर्भगेहविशालकम्।
दीर्घाद् रुद्रांशबाणांशं शैवद्वारे विशालकम् ॥ १३ ॥
गर्भगेहविशालाष्टपञ्चांशं द्वारतुङ्गकम्।
तुङ्गादर्धं तु विस्तारं स्मृतं स्याच्छङ्कराच्युते ॥ १४ ॥
गर्भभूताग्निभागोच्चमुच्चेऽल्पष्टिविभाजिते।
नवभागं स्मृतं तारमथवा गर्भगेहतः ॥ १५ ॥
भानुसप्तकमायामं तस्मिंस्तिथिविभाजिते।
द्वारे सप्तांशकं तारमेतौ साधारणौ मतौ ॥ १६ ॥
अथ पादसमुत्सेधादष्टसप्तायतं ततः।
नवपञ्चविशालं तु गजपञ्चकमेव वा ॥ १७ ॥

अथवा विश्वषट्तारं द्वारं वैष्णवमीरितम् ।
तत्र सप्ताब्धिविस्तारं द्वारं कृष्णस्य पूजितम् ॥ १८ ॥

तत्रापि तिथिनागांशविस्तृतं द्वारमुत्तमम् ।
अशेषसुरसामान्यमिति पूर्वैरुदाहृतम् ॥ १९ ॥

सर्वेषामपि हर्म्याणां द्वारं मध्ये तु योजयेत् ।
तले तले विमानानां दिक्षु द्वाराणि विन्यसेत् ॥ २० ॥

प्रदक्षिणवशादेकं मात्रं नीत्वाथवा पुनः ।
मार्गकूपतरुस्तम्भकोणपीडमशोभनम् ॥ २१ ॥

मुख्यद्वारस्य देवानां नराणां च विशेषतः ।
स्वस्य विस्तारतोऽर्धं वा साष्टार्धांशमथापि वा ॥ २२ ॥

त्रिपादं वाथ कर्तव्यं द्वारं योगघनं पुनः ।
योगोत्सेधे तु वेदांशे चतुरश्रमधोगतम् ॥ २३ ॥

एकांशमूर्ध्वगं त्र्यश्रं बाह्येऽब्जक्षेपणान्वितम् ।
पतङ्गे योगवत्कार्यं घनं क्षेपणकारबुजम् ॥ २४ ॥

तारं भुजङ्गमस्यापि तत्राब्जक्षेपणे विना ।
द्वारोत्सेधनियुक्तशेषचरणोत्सेधे शरांशीकृते
द्व्यंशेनाधरपट्टिकामितघनां सार्धे नवाङ्कांशिते ।
हीनां वा जनकेन योगविततां शिष्टांशितः पट्टिका-
मूर्ध्वस्थामथ मङ्गलाद्यफलकां युक्त्यूर्ध्वपट्ट्यूर्ध्वतः ॥

द्वारोच्चे शेषपादोच्चे द्वादशांशविभाजिते ।
शिरोन्मानं तु सप्तांशं पञ्चांशं गुल्फमिष्यते ॥ २६ ॥

कवाटं चैव योगं चाप्येकजातिमहीरुहैः ॥ २७ ॥
कारयेद् योगमथवा शिलयेष्टकयापि वा।
कवाटं सारवृक्षेण सार्गलं नान्यथाचरेत् ॥ २८ ॥

भित्तिव्यासमितैर्विभज्य बहिरन्तः पञ्चसप्तांशकान्
कृत्वा कल्पितसूत्रसंस्थनिजमध्यं + + योगान्यथ।
मध्यान्मध्यमतीत्य दिक्षु रचयेद् द्वाराणि तूर्ध्वं प्रते-
रग्रद्वारमृते घनानि कृतशोभान्यूर्ध्वतस्तोरणैः ॥ २९ ॥

अथवा भित्तिमध्ये वा योगमध्यं नियोजयेत् ।
सप्तांशे भित्तिविष्कम्भे पञ्चांशोऽध्यग्निभागतः ॥ ३० ॥

क्रमाच्छराग्निभागे वा स्थाप्यो योगाधिकोऽन्तरे।
देवानां च नराणां च मध्यद्वारेऽप्ययं विधिः ॥ ३१ ॥

शेषाणामपि मध्ये स्यादिति शास्त्रविदो विदुः।
द्वारस्य योगयोः पार्श्वे भूषणार्थं समाचरेत् ॥ ३२ ॥

अर्धमण्डनकस्तम्भौ युक्तभूषणभूषितौ।
कुड्यपादविशालार्धं त्रिपादं वास्य विस्तृतम् ॥ ३३ ॥

कवाटानि चतुर्धा स्युः युगं चायुगमेव वा।
संहारं धावनं चैव तद्विशेषमथोच्यते ॥ ३४ ॥

योगद्वयान्तर्घटितकवाटद्वितयं यदि।
तद् युग्मं वामयोगान्तर्घटितं त्वेकं कवाटकम् ॥ ३५ ॥

यद्ययुग्मं कवाटं तत् कथ्यते शिल्पवित्तमैः।
दृढप्रवेशनिर्यूहं स्तम्भे वाप्युत्तरेऽपि वा ॥ ३६ ॥

संहाराख्यं कवाटं स्याद्भित्तिकूटं च धावनम् ।
फलकाभिरयुग्माभिर्युग्माभिश्च सुरालये ॥ ३७ ॥
कवाटं तु मनुष्याणां स्यादयुग्माभिरेव हि ।
दण्डाब्ध्यङ्गमतङ्गजांशबहलतालवद्युत द्वार्दल-
व्यास (?) मूलशिखायुतं दृढतरं कार्यं कवाटद्वयम् ।
कार्या वामकवाटरोचितपराग्भागर्धतीव्राक्षतः
तद्विघ्नप्रतता च सूत्रफलका सूद्यक्तनाद्युज्ज्वलाम् (?) ॥
वस्वादिसंकृत्यन्तासु संख्यास्वेकोनभाजिते ॥ ३९ ॥
द्वारतारे तदेकांशं कवाटबहलं विदुः ।
कवाटफलकायामं भुजङ्गमपतङ्गयोः ॥ ४० ॥
घनादिकं द्वारदीर्घसमं तत्र प्रकल्पयेत् ।
रङ्गपादौ च कर्तव्यौ सुवृत्तावग्रमूलयोः ॥ ४१ ॥
स्वबाहुल्यसमायामं सार्धं वा मूलभागगम् ।
भारबाहुल्यसदृशमग्रगं रङ्गपादकम् ॥ ४२ ॥
कवाटद्वितयं कुर्यान्मातृपुत्र्यभिधं बुधः ।
पट्टिकाव्यासचतुरंशैकांशेन समन्वितम् ॥ ४३ ॥
स्वबाहुल्येन सहितं तद्वारततो दलम् ।
व्यासं मातृकवाटस्य पट्टिकाविस्तृतार्धतः ॥ ४४ ॥
रहितं पुत्रिकाव्यासमेवं वा परिकल्पयेत् ।
योगयोः पार्श्वयोः पश्चात्कवाटौ योगमाश्रितौ ॥ ४५ ॥
प्रत्येकमेकं पद्मं वा द्वित्रिपद्ममथापि वा ।
द्वारतारचतुष्पञ्चषट्सप्ताष्टविभाजितः ॥ ४६ ॥

व्यासमेकांशतः कार्यं मात्रैर्वा त्र्यब्धिबाणकैः।
तत्सूत्रपट्टिकायास्तु घनं तारसमं भवेत्॥ ४७॥
अर्धं वा पादहीनं वा त्रिभागैकमथापि वा।
कवाटघनयुग्मं वा द्वारोच्चसममायतम्॥ ४८॥
अश्व्यादिवेश्मकृत्यन्ताः पङ्क्तयस्तत्र कल्पयेत्।
अग्न्याद्यत्यष्टिसंख्यान्तं पङ्कजान्यग्रसन्धिषु॥ ४९॥
अग्न्याद्याः पङ्क्तयो वाथ धृत्यन्ताश्चतुरादिकाः।
स्तना वा स्युः प्रकर्तव्या ओजयुग्मक्रमेण तु॥ ५०॥
ओजयुग्मस्तना पट्टी निर्विशेषामरालये।
वर्ज्या नरालये युग्मपङ्कजा सूत्रपट्टिका॥ ५१॥
तारार्धमुच्छ्रयं तेषां त्रिभागैकं तु वा भवेत्।
बहलार्धं तु वा कुर्यादुच्छ्रये दर्शनांशिते॥ ५२॥
ह्यंशं तदूर्ध्वपट्टं स्यात् पद्मं तु त्रिभिरंशकैः।
दलाष्टकयुतं वापि वृत्तं केसरसंयुतम्॥ ५३॥
अधःपट्टं तदेकांशं तदधः पद्मपीठिकाम्।
चतुरश्राकृतिं कुर्यादधःपट्टसमोन्नताम्॥ ५४॥
मूलाग्रपङ्कजे कार्ये ह्यर्धवृत्तविचित्रिते।
पङ्क्तयः पुष्पदामाद्यैः मुक्ताद्यैश्च विचित्रिताः॥ ५५॥
पट्टिकाव्यासतः पादभागं नीत्वाथ पार्श्वतः।
मातृसंज्ञकवाटस्य मूले चाग्रे महामतिः॥ ५६॥
भुजङ्गमघनं नीत्वा पतङ्गस्य घनं तथा।
तयोर्मध्ये द्वारसूत्रे तन्मध्यं च यथा भवेत्॥ ५७॥

तथा विन्यस्य तां कीलैः पङ्कजाभागकल्पितैः ।
सरोजमुकुलाग्रैर्वा कांस्यैर्वायसकल्पितैः ॥ ५८ ॥
पट्टिकापद्ममध्येषु विद्धैः कुर्याच्च निश्चलाम् ।
कवाटयोस्तारसमं भारायाममुदीरितम् ॥ ५९ ॥
भारतारं प्रकर्तव्यं पतङ्गवितते: समम् ।
सपादं वाथ सार्धं वा तुङ्गतुल्यं घनं तु वा ॥ ६० ॥
व्यासादर्धं त्रिपादं वा पुच्छतारसमायतौ ।
भारतारेऽब्धिसंभक्ते त्रीणि सूत्राणि पातयेत् ॥ ६१ ॥
तिर्यक्सूत्रद्वयं कार्यं द्वारव्यासाग्रमध्यतः ।
अन्त्यसूत्रयुतिर्यत्र तिर्यक् सूत्रत्रयस्य तु ॥ ६२ ॥
तत्स्थपृष्ठपदव्यासतुल्यं कर्कटकेन तु ।
भ्रामयित्वा करोत्यत्र वृत्तं खण्डत्रयं पुनः ॥ ६३ ॥
खण्ड्यन्तराग्रमूलेषु तृतीयात् सूत्रयोर्बहिः ।
त्यक्त्वा निम्नं प्रकर्तव्यं निम्नखण्डियुतौ तथा ॥ ६४ ॥
शिल्पिभिश्चित्रसंयुक्तं चित्रकारैः करोतु वा ।
कार्यं च सुषिरे वृत्ते ह्याद्यसूत्रबहिःपदे ॥ ६५ ॥
मूलागतत्तिर्यक्सूत्रयोर्बाह्यदेशतः(?) ।
ऊर्ध्वस्थरङ्गपादस्य प्रमाणेन विचक्षणः ॥ ६६ ॥
युज्यतां द्वारपादाभ्यां अन्तराद्यं पदं यथा ।
शूलकीलादिवेधैश्च प्रतेरूर्ध्वेऽर्धपाणिना ॥ ६७ ॥
अधोभारं त्वेवमेव मध्यखण्डिविवर्जितम् ।
पादमाद्यं परित्याज्यं द्वितीयस्थावटद्वयम् ॥ ६८ ॥

रङ्गपादप्रमाणेन वर्तुलं त्वर्धनिम्नकम्।
द्वारोत्सेधशरांशैकमरनायाममीरितम्॥ ६९॥
युगवह्न्येकभागं वा षट्पञ्चैकांशविस्तृतम्।
व्यासपादोनमर्धं वा समं वा बहलं विदुः॥ ७०॥
अधोभारसमाकारा कीर्तिता शिल्पवित्तमैः।
तदायामेऽब्धिसंभक्ते त्यजेन्नैकैकमग्रयोः॥ ७१॥
मध्ये निधाय द्वितयं तत्सन्धावर्गलस्य च।
कुर्याच्च कबलीं तत्र ह्यर्गलस्य प्रमाणतः॥ ७२॥
कवा(ट)व्या(स)सदृशमर्गलस्यायतं विदुः।
पादोनं वा तदष्टांशादेकतत्तारमुच्यते(?)॥ ७३॥
तारार्धं बहलं कुर्यात्पृष्ठं विस्तारतुल्यकम्।
अग्रे रमाया विस्तारतुल्यं नीत्वात्र कारयेत्॥ ७४॥
पृष्ठार्धं वा त्रिपादं वा खण्डं पृष्ठस्य तस्य च।
अर्गलस्य च विस्तारसममुन्नतमुच्यते॥ ७५॥
अर्धवृत्तं[२] तु वा पृष्ठमष्टाश्रं चारु कारयेत्।
ऊर्ध्वार्गलं पुत्रिकायामन्यस्यामधरार्गलम्॥ ७६॥
ऊर्ध्वाग्रमरमां चापि विन्यसेत्तद्बहिः पुनः।
द्वारसूत्रादर्गलार्धमानीय[३]त्वा च दक्षिणे॥ ७७॥
विन्यसेदरमां तत्र त्वन्यस्यान्यदिशि स्मृतम्।
द्वारायामस्य मध्ये तत्कुर्याच्छास्त्रविशारदः॥ ७८॥

---

१. 'कवाव्यौस', २. 'द्ध'. ख. पाठः. ३. 'नं नीत्वा' क. पाठः.

अरमामूलाग्रगैः शूलैः कीलैर्वा दृढतां नयेत् ।
एका वा स्यादुपद्वारे कवाटमिति केचन ॥ ७९ ॥
द्वारतारं कवाटस्य बहलद्वयसंयुतम् ।
कवाटफलकाव्यासं[1] रङ्गपादौ च वामके ॥ ८० ॥
द्वारव्यासार्धमानं वा त्रिभागैकमथापि वा ।
भारस्यायाममेवं स्यात्खण्डीशेषं यथा पुनः ॥ ८१ ॥
अधोभारस्तु वा गर्तशङ्कुं वा कारयेदधः ।
कवाटबहलद्विघ्नबहलं व्यासमेव च ॥ ८२ ॥
तत्स्थाने निखनेद्भूमौ तद्विस्तारायतात्मकम् ।
विभजेदूर्ध्वविस्तारे द्विधा चैकतमे पदे ॥ ८३ ॥
रङ्गपादप्रमाणेन गर्तं कुर्याद् यथाविधि ।
पृष्ठमष्टाश्रकं कुर्यादर्धवृत्तमथापि वा ॥ ८४ ॥
अस्यारमार्धभाराभा कवाटघनमानतः ।
त्रिगुणं वास्य विस्तारमायामं तद्वयं भवेत् ॥ ८५ ॥
तत्तारस्य त्रिभागेन तन्मध्ये गर्तमाचरेत् ।
समतुर्यश्रकं वा स्याद् वृत्तं वा तद्यथोचितम् ॥ ८६ ॥
कवाटघनतुल्यं स्यात्तदर्गलघनं पुनः ।
आयामत्रिगुणं वा स्याच्चतुर्गुणमथापि वा ॥ ८७ ॥
पृष्ठं बहलतुल्यं वा त्रिपादं वा यथोचितम् ।
बहलस्य त्रिभागैकं नीत्वा तस्याग्रमूलयोः ॥ ८८ ॥

---

१. 'सां' ख. पाठः.

तदन्तरायतं गर्तं कुर्याद्द्वयुतरं तु वा ।
स्वबाहल्यत्रिभागैकं व्यासं तस्य प्रकीर्तितम् ॥ ८९ ॥
निम्नता च तथा कार्या विन्यसेदर्गलं पुनः।
स्वाभ्यन्तरस्थकीलेन विद्धगर्तं यथा तथा ॥ ९० ॥
अरमासुषिरे सम्यग्वामाग्रं शिल्पवित्तमैः।
अरमान्तां द्वारपादे दक्षिणेऽन्तर्गपार्श्वतः (?)॥ ९१ ॥
कवाटबहलं नीत्वा तन्मध्ये विन्यसेद्बहिः।
शूलवेधैर्दृढीकृत्य द्वारविन्यासमाचरेत् ॥ ९२ ॥
कवाटं मातरं वामे पुत्रिकां दक्षिणे तथा ।
ऊर्ध्वाधोभारयोः पद्भ्यां यथायोगं तथा न्यसेत्॥ ९३ ॥
तत्कर्मकुशलैः सम्यग् घाटनोद्घाटनक्षमम् ।
एके सति कवाटे तु वामे पार्श्वे सुयोजयेत् ॥ ९४ ॥
गेहान्निर्गमतो ज्ञेयमत्र सव्यमसव्यकम् ।
ऊर्ध्वाधरभ्रमरकार्गलसन्धिपाल-
प्रक्षेपणीयवलयान्यपि पत्रकाणि ।
तिर्युञ्च्युदञ्चि पुलकार्तवकुड्मलानि
सश्रीमुखेन्दुशकला हि कवाटयोः स्युः ॥ ९५ ॥
लोहजा दारुजा वा (बा? स्युर्बा)ह्याभ्यन्तरयष्टयः॥ ९६॥
तासां (त्र्य? त्रि)द्व्यङ्गुलं व्यासं तारार्धं वा घनं स्मृतम्।
कवाटयोरूर्ध्वगाश्च तिर्यग्गाश्च भवन्ति ताः ॥ ९७ ॥
त्रिपञ्चसप्तसंख्या वा नवरुद्रत्रयोदश।
दिग्गसप्तदशो + + यष्टयोऽत्र विशेषतः ॥ ९८ ॥

तथा कवाटे विन्यस्य संविध्य दृढतां नयेत् ।
प्रधानद्वारमेकं वा द्वयं वान्यं तु जालकम् ॥ ९९ ॥
घनद्वारं तु वा कुर्यात् प्रासादानां विशेषतः ।
अग्र्यद्वारप्रततिमहिभिः संविभज्याशुगांशैः
कॢप्तं व्यासं रचयतु घनद्वारमन्यत् त्रिदिक्स्थम् ।
द्विघ्नव्यासायतमधिदलद्विघ्नतत्या ततं वा
सूद्यद्योगप्रकटितकवाटादिकस्वागदीप्तम् ॥ १०० ॥
प्रासादमण्डपादीनां चतुर्दिक्षु विदिक्षु वा ॥ १०१ ॥
तयोर्मध्येऽन्तराले वा व्योमाभित्तिस्तु यत्र वै ।
तत्रैव कल्प्यते सम्यक् कम्पद्वारं विचक्षणैः ॥ १०२ ॥
भुवङ्गं च पतङ्गं च योगं प्राग्वद् घनं ततः ।
कृत्वा दृढतरं बद्ध्वा योजयेदन्तराङ्घ्रयः ॥ १०३ ॥
यथा नरैर्गजैर्वापि घाटनोद्घाटनक्षमम् ।

अथ सोपानम् ।

अग्रद्वारभुवङ्गमस्थलसमारब्धान्यधोधः क्रमात्
सोपानानि समानि[2] सारशिलया चिन्वीत यावत्तलम् ।
अध्यर्धद्विगुणात्तदण्डविपुला निद्वारशाखाद्वयी
पार्श्वोद्यन्मकरास्यनिःसृतलतारुद्धोभयानान्निचम् (?) ॥
अग्रसोपानकरणं गुह्यागुह्यमिति द्विधा ॥ १०५ ॥
वेदाश्रं दीर्घवेदाश्रं वृत्तं चेति त्रियोनिकम् ।
चतुर्विधं प्रकारैः स्यात् त्रिखण्डं शङ्खमण्डलम् ॥ १०६ ॥

---

१. 'मः', २. 'न' ख. पाठः.

अर्धगोमूत्रकं चाथ वल्लीमण्डलमित्यपि।
त्रिखण्डाकाररचितं यत्सोपानं त्रिखण्डकम्॥ १०७॥

मूलादग्रं तु संक्षिप्तं क्रमाच्चच्छङ्खमण्डलम्।
तद्त्रिखण्डं च सोपानमर्धगोमूत्रसंज्ञकम्॥ १०८॥

वृक्षारोहिलताकारं वल्लीमण्डलसंज्ञकम्।
शयितं व्यासपादार्धत्रिपादोच्चानि वै पृथक्॥ १०९॥

समखण्डानि कुर्वीत सोपानानि यथाक्रमम्।
द्विदण्डं वा द्व्यर्धदण्डं भवेत्तद्बहलं ततः॥ ११०॥

त्रिपादं वाथ चार्धं वा हस्तनीप्रं विधीयते।
स्थितस्य शयितस्यापि प्रवेशः स्याद्यथाबलम्॥ १११॥

अश्व्यग्निवेदबाणर्तुस्वरदण्डान्तविस्तृतिः।
सोपानानां भवेद् द्वित्रिचतुर्दण्डाश्च पादके॥ ११२॥

अर्धचन्द्रसमाकारं तत्संस्थानं प्रकल्पयेत्।
तच्च हस्तं घनं वा स्यात् त्रिपादं वास्य चोपरि॥ ११३॥

स्थित्वा तले तले शस्तं प्रादक्षिण्याधिरोहणम्।
तदप्ययुग्ममेव स्यात्प्रासादे मण्डपेऽपि वा॥ ११४॥

शालादिषु च रङ्गेषु सोपानं प्रमुखं स्मृतम्।
पार्श्वयोर्मुखसोपानादन्यत्र परिकल्पयेत्॥ ११५॥

इति शिल्परत्ने द्वारलक्षणकथनं नाम
द्वाविंशोऽध्यायः।

अथ त्रयोविंशोऽध्यायः ।

अथ तोरणानि ।

स्तम्भे दिङ्नन्दनागांशिनि झषमनलांशेन शेषेण पादौ
व्यासं स्तम्भार्धतोऽब्ध्याशुगरसमितदण्डेन वा तत्र कुर्यात् ।
पत्राविद्धार्धचन्द्रात्म(क)मथ मकरास्यादिमत् पञ्चभुग्नं
कर्तव्यं तोरणं तद् वि(धि?विध)खगलसन्नक्रतुण्डोज्ज्वलं च ॥

प्रासादमध्ये कर्तव्यं मण्डपे भित्तिबाह्यके ।
हारासु वलभीमध्ये प्रमाणं भवनेऽपि वा ॥ २ ॥
तोरणं तत्सभादीनां द्वारे वा तलिपेऽथवा ।
पादोच्चे पञ्चषट्सप्तभागे वा तोरणाग्रकम् ॥ ३ ॥
शेषं पादोदयं ख्यातमेवं च त्रिविधं भवेत् ।
तोरणाग्रविशालं तु कुड्यस्तम्भोदयार्धकम् ॥ ४ ॥
कुड्यस्तम्भद्वयो(?)रन्तर्व्यासं वा तोरणाग्रकम् ।
स्वाङ्घ्रिवेत्रावसानं वा तस्माद् दण्डाधिकं तु वा ॥ ५ ॥
अर्धपादोक्तविधिना कारयेत् तोरणाङ्घ्रिकौ ।
उत्तरं कारयेत्पादस्योर्ध्वे चैव सवाजनम् ॥ ६ ॥
अब्जं क्षेपणकं पश्चात् तथैव क्षुद्रवाजनम् ।
तच्छिष्टं झषमानं तु तोरणावयवं स्मृतम् ॥ ७ ॥
तोरणाङ्घ्रिविशालं वा त्रिपादं वोत्तरोदयम् ।
तदर्धं वाजनोत्तुङ्गं तस्यार्धं दलमानकम् ॥ ८ ॥
दलार्धं क्षेपणं ख्यातं तस्यार्धं क्षुद्रवाजनम् ।
उत्सन्ध्यन्तनताग्रौ तु कुर्यान्मकरपृष्ठकौ ॥ ९ ॥

पत्राख्यं तोरणं त्वादौ द्वितीयं मकराभिधम् ।
तृतीयं चित्रसंज्ञं तु त्रिविधं तोरणाकृति ॥ १० ॥
अर्धचन्द्रसमाकारं पत्रजातिविराजितम् ।
पत्रतोरणमाख्यातं तच्छूद्राणां गृहोचितम् ॥ ११ ॥
पञ्चवक्त्रसमायुक्तं पार्श्वयोर्मकरास्यकम् ।
मध्ये पूरिमसंयुक्तं नानाचित्रसमन्वितम् ॥ १२ ॥
नानालङ्कारसंयुक्तं यत्तन्मकरतोरणम् ।
देवद्विजनृपाणां तु शस्तं मकरतोरणम् ॥ १३ ॥
तदेव पार्श्वयोर्मध्यपूरिमस्य द्वयोरपि ।
नक्रतुण्डसमायुक्तं भूतविद्याधरान्वितम् ॥ १४ ॥
सिंहेभव्यालहंसाद्यैः बालस्रङ्मुक्तदामकैः ।
अन्यैश्च विविधैश्चित्रैः चित्रबन्धैश्च भूषितम् ॥ १५ ॥
चित्रतोरणमेवं तु विशां वेश्मसु पूजितम् ।
प्रस्तरोत्तरयोर्मध्ये योज्यान्येतानि सर्वशः ॥ १६ ॥
गुहासु तोरणानां तु यथार्हं प्रतिमां तथा ।
न्यस्येन्नारीं नरादिर्वा यथाशोभविचित्रितम् ॥ १७ ॥
शिलादार्विष्टका मृत्स्ना द्रव्याणि स्युश्च तोरणे ।
कुड्यतोरणमेवं स्याद्यथाशोभविचित्रितम् ॥ १८ ॥
द्वारे द्वारे च कर्तव्यं गृहेषु द्वारतोरणम् ।
द्वारतुल्योन्नतं व्यासं तोरणाङ्घ्र्यन्तरं ततः ॥ १९ ॥
उत्तरं वाजनं त्वब्जं क्षेपणं चाष्टमङ्गलम् ।
वलका पञ्चवक्त्राद्या प्रागुक्तविधिना भवेत् ॥ २० ॥

पत्राख्यं मकराख्यं वा चित्रतोरणमेव वा ।
मध्योर्ध्वे शूलसंयुक्तं पार्श्वयोश्च विशेषतः ॥ २१ ॥
लोहैर्दारुशिलाभिर्वा कर्तव्यं द्वारतोरणम् ।
वृत्तौ तोरणपादौ तु कर्तव्यौ वा यथारुचि ॥ २२ ॥
द्विङ्नन्दवसुभागेन शिखावन्तौ स्वदीर्घतः ।
तदूर्ध्वे चोत्तरं कार्यं तदुच्चं दण्डमानकम् ॥ २३ ॥
दण्डत्रिपादमर्धं वा तद् वाजनमिदं विदुः ।
दलं तत् त्रिचतुर्भागं क्षेपणं तद्दलं भवेत् ॥ २४ ॥
सार्धदण्डं सपादं वा स्यादूर्ध्वे वलकोदयम् ।
तस्यां स्युर्मङ्गलान्यष्टौ तदूर्ध्वे त्रिशिखान्यपि ॥ २५ ॥
पञ्चवक्त्राणि तानि स्युः द्विदण्डोच्चानि मध्यतः ।
समं त्रिपादतुङ्गानि पार्श्वपत्त्राणि वा भवेत् ॥ २६ ॥
द्वित्रिवेदाङ्गुलं युक्त्या पत्त्राणां विस्तृतिः स्मृता ।
स्वोत्सेधाष्टनवांशं वा पत्त्राणां बहलं स्मृतम् ॥ २७ ॥
शिलादृढप्रवेशेन पादमूलेन निश्चलम् ।
तोरणानि युगहस्तमितानि क्ष्मोर्ध्वमर्धविततानि भवन्ति।
केतवः सुरगृहोत्तरदैर्घ्याः स्वोक्त + + + विचित्रपताकाः ॥
स्तम्भे स्तम्भे प्रकर्तव्यं सर्वेषां स्तम्भतोरणम् ॥ २९ ॥
पादोच्चं तु त्रिधा भङ्क्त्वा त्रिभागं चरणोदयम् ।
उत्तरं वाजनं त्वब्जं क्षेपणं क्षुद्रवाजनम् ॥ ३० ॥
तदूर्ध्वे झषबन्धं तु शेषभागेन कारयेत् ।
स्तम्भविस्तारमानेन झषविस्तारमाचरेत् ॥ ३१ ॥

दण्डपादादिमानेन तत्पादं बहलं विदुः।
पूर्वोक्तक्रमतः कार्यं तोरणत्रयमत्र तु ॥ ३२ ॥

अथ मङ्गलानि।

न्यस्येच्छङ्खारिकेतून् मुकुरवृषसृणीश्चामरं मत्स्ययुग्मं
दिक्ष्वीशे त्र्याद्यवत्सं मुकुरवृष + + द्वन्द्वकुम्भांस्त्रिधाग्नि।
श्रीशेशे स्वास्तिकाब्जं दरघट(मु)कुरं सोत्पलावर्तवत्सं
वत्सं कुम्भं सभेरीमुकुरझषसृणीं शंखनाद्यौ(?) च चण्ड्याम् ॥

पूर्णघटध्वजवज्रौ स्वस्तिकशक्ती च चामरद्वितयम्।
नागमयूर(क)मष्टौ स्कन्देऽपि करोतु मङ्गलान्यत्र ॥ ३४ ॥

दर्पणं पूर्णकुम्भं च वृषभं चामरद्वयम्।
श्रीवत्सं स्वस्तिकं शङ्खं दीपं विघ्ने संशास्तरि ॥ ३५ ॥

पीठं खड्गं सुधाकुम्भं कौ + व्यादरपुस्तकान्(?)।
काल्यां सह स्रक्ताम्बूलमिक्षुदण्डमिति क्रमात् ॥ ३६ ॥

दीपिका दर्पणं हेम धान्यपात्रं फलं दधि।
पुस्तामङ्गलपात्राणि लौकिकं मङ्गलाष्टकम् ॥ ३७ ॥

इति शिल्परत्ने तोरणलक्षणं नाम
त्रयोविंशोऽध्यायः।

अथ चतुर्विंशोऽध्यायः ।

अथ जालकम् ।

पादवर्गे गले चैव प्रासादानां तु जालकम् ।
प्रासादेषु महाशास्वप्यन्तरालस्य मध्यमे ॥ १ ॥
योजयेद् वेदिकोर्ध्वं तु सर्वेषामुत्तरादधः ।
चतुर्दण्डविशालं तदुत्तमं परिकीर्तितम् ॥ २ ॥
त्रिदण्डं वा द्विदण्डं वा मध्यमं त्वधमं क्रमात् ।
विस्तारसदृशोत्सेधादेकदण्डविवर्धनात् ॥ ३ ॥
विस्ताराद्विगुणं यावत् तावद् वै जालकोदयम् ।
तारात्सपादं सार्धं वा यथायोग्यं समाचरेत् ॥ ४ ॥
अथवा जालकानां तु तुङ्गं वेत्युत्तरान्तरम् ।
उच्चत्रिपादं विपुलं त्रिभागोनमथापि वा ॥ ५ ॥
स्तम्भव्यासार्धमानं तु व्यासं जालाङ्घ्रिकम्पयोः ।
घनं तत्सममर्धं वा त्रिचतुर्भागमेव वा ॥ ६ ॥
युग्मपादसमायुक्तं युग्मकम्पसमन्वितम् ।
मध्ये स्तम्भं च कम्पं च वर्जं जालकमाचरेत् ॥ ७ ॥
युग्मायुग्माङ्घ्रिभिः कम्पैरुक्तं तुङ्गे च वैपुले ।
भित्तिमध्याद् बहिस्तस्य स्तम्भमध्यं न योगवत् ॥ ८ ॥
गवाक्षं कुञ्जराक्षं वा नन्द्यावर्तमृजुक्रियम् ।
पुष्पखण्डं सकर्णं च जालकं षड्विधं भवेत् ॥ ९ ॥
दीर्घाश्रं कर्णगं छिद्रं गवाक्षमिति कथ्यते ।
युगाश्रं कर्णगं छिद्रं कुञ्जराक्षमुदाहृतम् ॥ १० ॥

पञ्चसूत्रमयं छिद्रं प्रादक्षिण्यक्रमेण तु ।
नन्द्यावर्तस्य पुष्पाभं नन्द्यावर्तमिति स्मृतम् ॥ ११ ॥

आर्जवौ[1] स्तम्भकम्पौ चेज्जालकं तद्दृजुक्रियम् ।
पुष्पखण्डं सकर्णं च नन्द्यावर्तमिवाचरेत् ॥ १२ ॥

गुणिकाजालकं धाम विन्यासाकृतिरन्ध्रकम् ।
स्वस्तिकं वर्धमानं च सर्वतोभद्रमित्यपि ॥ १३ ॥

कवाटयुगलं वैकं घाटनोद्घाटनक्षमम् ।
जालकाकृति चेत् तत्तु वातायनमिति स्मृतम् ॥ १४ ॥

लोहैर्द्रुमोपलैर्द्रव्यैर्वेष्टकाभिस्तु जालकम् ।

इति शिल्परत्ने जालकलक्षणं नाम
चतुर्विंशोऽध्यायः ।

अथ पञ्चविंशोऽध्यायः ।
अथ कूटकोष्ठादि ।

कुड्ये पङ्क्त्यादिभक्ते विदिशि विरचयेत् कूटमेकांशविस्ता-
रायामं विंशदीर्घा दिशिदिशि विशतामेकभागेन शालाम् ।
शालाकूटान्तराले चरणविरहितांशोन्मितां नासिकां तत्
पार्श्वद्वन्द्वे सजालं चरणविरहितांशादितः पञ्जरं च ॥ १ ॥

प्रासादादिविशाले तु दशभागकृते पुनः ।
नन्दाष्टसप्तभक्ते वा रुद्रभास्करभाजिते ॥ २ ॥

त्रयोदशहृते वाथ कूटमेकांशमानतः ।
शालामानं द्विभागं वा त्रिचतुर्भागमेव वा ॥ ३ ॥

---

१. 'वा स्तम्भकम्पा चे' क. पाठः.

कोणेषु कूटं तुर्यश्रं दिक्षु शालायताश्रका ।
अधिष्ठानं स्तम्भवर्गं प्रस्तरं कर्णशीर्षकौ ॥ ४ ॥
स्तूपिकां च विशेषेण बिभ्रतौ कूटकोष्ठकौ ।
धाम्नोष्टां(श)मितोऽथवा प्रतिमुखैः स्तूप्यन्तिमैस्संयुतः
प्रासादाकृतिकश्च कूट उदितो मध्यस्फुरन्नासिकः ।
शाला तत्समसूत्रगा मुखपटी शक्तिध्वजाद्युज्ज्वला
स्तूपित्रय्युपशोभिता परिलसन्नासा च सङ्कीर्तिता ॥ ५ ॥
एवं चादितले कुर्यादूर्ध्वभूमिषु तौ पुनः ॥ ६ ॥
अधिष्ठानं विना सर्वैरङ्गैः स्यातां समन्वितौ ।
ऊर्ध्वपादोदयं सप्तभागं कृत्वा विशेषतः ॥ ७ ॥
एकांशं वेदिकोत्सेधं सार्धांशं गलमानकम् ।
शीर्षकं तु गुणांशेन शेषं स्तूप्युदयं भवेत् ॥ ८ ॥
अथवा रुद्रसंभक्तेऽप्येकांशं वेदिकोन्नतम् ।
गुणांशं चरणोत्सेधं पादोनद्व्यंशमुत्तरम् ॥ ९ ॥
सपादांशं दलोत्सेधं पादोनाग्न्यंशकं शिरः ।
स्तूप्युत्सेधं सपादांशं क्रमशः परिकल्पयेत् ॥ १० ॥
एवं हि कूटकोष्ठौ द्वौ कल्पयेत् सर्वभूमिषु ।
कूटस्य तद्विशालं वा त्रिपादं वार्धमेव वा ॥ ११ ॥
पादं सार्धं सपादं वा मानसूत्राद्बहिर्गतिः ।
दण्डं सार्धाद्विदण्डं वा द्व्यर्धं वाथ त्रिदण्डकम् ॥ १२ ॥
मानस्याभ्यन्तरे वेशं विपदामास्पदं विदुः ।
यावत्कूटस्य निष्क्रान्तं तावच्छालाविनिर्गतिः ॥ १३ ॥

कूटव्यासत्रिभागैकं स्वनासेर्विस्तृतं भवेत्।
तद्व्यासे त्रिचतुष्पञ्चभागे भागं तु नीप्रकम्॥ १४॥
कर्णकूटकपोताच्तु नासिकानिर्गमं भवेत्।
चतुर्दिक्षु चतुर्नासीसंयुतं कूटमुच्यते॥ १५॥
एकस्तूपिसमायुक्तं नीप्रं वेशं विमानवत्।
वेदाश्रं वसुकोणं वा वृत्ताभं वा गलं शिरः॥ १६॥
नागराद्युचितं कल्प्यं कर्णकूटं विशेषतः।
शालानां पार्श्वयोः कुर्याल्ललाटाख्यं तु नासिकम्॥ १७॥
स्वस्तूप्यग्रसमं प्रोक्तं ललाटस्याग्रसीमकम्।
शालादीर्घत्रिभागैकं मुखे नासिविशालकम्॥ १८॥
गले वा कूटकोष्ठानां देवताद्यास्तु कल्पयेत्।
कोणे मध्येऽन्तरे भित्तौ बाह्ये वा मानसूत्रतः॥ १९॥
निर्गतैरुक्तमानेन कूटकोष्ठकपञ्जरैः।
संयुक्तं सदनं कार्यं देवमानुषयोरपि॥ २०॥
कूटं कोष्ठं पञ्जरं (च) निवृत्तस्फुटितं तथा।
गृहपिण्डेरधस्तात् स्युः तथा कुम्भलतादयः॥ २१॥

इति शिल्परत्ने कूटकोष्ठविधानं नाम
पञ्चविंशोऽध्यायः।

अथ षड्विंशोऽध्यायः।

अथ पञ्जराणि।

शालाकूटान्तरालं तद्द्वारान्तरमिति स्मृतम्।
पञ्जरं तत्र कुर्वीत तदनेकविधं भवेत्॥ १॥

दण्डैर्द्वित्रिचतुर्मितैर्मितवितानातानकं पञ्जरं
नासाद्युज्ज्वलितं च जालकमधो वेद्यूर्ध्वतः संस्थितम् ।
दण्डैर्द्व्यादियुगान्तिमैस्ततमतो दण्डर्द्धितं चायतं
कर्तव्यं द्विगुणान्तिमं सुपिरितं गोमूत्रिकादिक्रमात् ॥ २ ॥
पञ्जरं नासिकाकारं कूटकोष्ठाभमेव वा ।
हस्तपृष्ठविमानस्य शिखराकृति वा पुनः[1] ॥ ३ ॥
द्वितलं त्रितलं चैव चतुस्तलमिति क्रमात् ।
हारान्तरत्रिभागं तु वेदं पञ्जरविस्तृतम् ॥ ४ ॥
पञ्चभागत्रिभागं वा त्रिभागद्वयमेव वा ।
सप्तभागत्रिभागं वा नवभागचतुष्ककम् ॥ ५ ॥
सप्तभागचतुर्भागं पञ्चभागद्विभागिकम् ।
एवं सप्तविधं प्रोक्तमथवा दण्डमानतः ॥ ६ ॥
द्वित्रिवेदमिदं वा स्यात्पञ्जराणां विशालकम् ।
यथावकाशं तत्पार्श्वे तत्तदन्तरमानतः ॥ ७ ॥
एवमेव प्रकर्तव्यं धीमता पञ्जरान्तरम् ।
व्यासतुल्यं त्रिपादं वाप्यर्धं वा भित्तिबाह्यतः ॥ ८ ॥
निष्क्रमं पञ्जरादीनां त्रिभागद्वयमेव वा ।
यत्स्तम्भबहलार्धं तत्सर्वभूषणनिष्क्रमम् ॥ ९ ॥
महानास्युदयं तावद् यावत्प्रत्युत्तरान्तरम् ।
तत् पञ्चषट्सप्तनागभागोनं पञ्जरोदयम् ॥ १० ॥

---

१. 'नः । सप्तभागत्रि' क. पाठः.

दृश्यतेऽत्र महानासिरधिष्ठानसमन्वितम् ।
आदिभूततले तत्र पञ्जरं प्रस्तरान्वितम् ॥ ११ ॥
एतेषां स्वस्वदीर्घार्धमादिपादोदयं स्मृतम् ।
एवमादितले कुर्यान्महानास्यविशेषतः ॥ १२ ॥
कूटकोष्ठाकृतिर्वा स्यात् पञ्जराकृतिरेव वा ।
आदिपादे पञ्जराणामर्धमाण्डितयोस्ततः ॥ १३ ॥
पादयोरन्तरे कुर्याज्जालकं पूर्वमुक्तवत् ।
सिंहपञ्जरमादौ स्यात् तत्परं चार्धपञ्जरम् ॥ १४ ॥
निर्यूहपञ्जरं चैव कथितं लम्बनासिकम् ।
सिंहश्रोत्रं तथा खण्डनिर्यूहं झषपञ्जरम् ॥ १५ ॥
द्विदण्डादाचतुर्दण्डविस्तृतं जालकान्वितम् ।
चित्रपादद्वयोपेतं श्लिष्टप्राकारनीप्रकम् ॥ १६ ॥
षड्वर्गसहितं व्याससमनिर्गममेव वा ।
शक्तिध्वजयुतं चापि तथा सम्मुखपट्टिकम् ॥ १७ ॥
वेदिकाजालकस्तम्भयुक्तं(वा)सिंहपञ्जरम् ।
प्रासादनीप्रसंश्लिष्टनीप्रार्धं(वि)निर्गमः ॥ १८ ॥
अधिष्ठानाङ्घ्रियुक्तं च प्रस्तरग्रीवसंयुतम् ।
तद्वत्सशिखरं शक्तिध्वजं समुखपट्टिकम् ॥ १९ ॥
वेदिकाजालकर्णाढ्यं सार्धपञ्जरसंज्ञितम् ।
प्राग्वच्छेषं च विस्तारपादसम्मितनिर्गमम् ॥ २० ॥
व्यासत्रिभागनिर्यूहं वृत्तस्फुटितकर्मवत् ।
पञ्जराख्यं स्मृतं चाथ स्वतुल्यशिखराग्रकम् ॥ २१ ॥

अष्टनीप्रांशकर्णं च कपोताद्यग्रसंयुतम् ।
निर्यूहपञ्जरं चैतल्लम्बनासिकमुच्यते ॥ २२ ॥
संश्लिष्टनीप्रकर्णाङ्घ्रिकृतनागदलादपि ।
+ + निर्यूहितं युक्तं सर्वाङ्गैर्लम्बनासिकम् ॥ २३ ॥
सिंहश्रोत्रशिखायुक्तमेतदेव तु पादवत् ।
नीप्रसंश्रितकर्णांशं सिंहश्रोत्रविधानकम्(?) ॥ २४ ॥
यत् स्वविस्तारपञ्चांशद्व्यंशनिर्गमसंयुतम् ।
नीडाधस्तात्कपोताद्यैः खण्डनिर्यूहकं युतम् ॥ २५ ॥
दण्डदण्डार्धनिष्क्रान्तनीप्राधस्तात् ततोपरि(?) ।
कर्णोर्ध्वतोरणोपेतं कपोताद्यङ्गसंयुतम् ॥ २६ ॥
झषपञ्जरसंज्ञः स्यात्पञ्जरं त्वेवमष्टधा ।
पञ्जरोच्चे शरांशे वा सपादांशेन चाङ्घ्रिकम् ॥ २७ ॥
तदर्धं प्रस्तरोत्सेधं तत्समं कर्णमानकम् ।
शेषार्धे मञ्चकर्णाख्यौ शेषं शीर्षोदयं स्मृतम् ॥ २८ ॥
तत् स्तम्भार्धादधिष्ठानं शेषेणाप्युपपीठकम् ।
एवमुक्तं हि सर्वेषां पञ्जरावयवं बुधैः ॥ २९ ॥
अन्यथाह विशेषेण काश्यपः पञ्जरोदयम् ।
उपानाद्युत्तरान्तं तु नवभागविराजिते ॥ ३० ॥
उपपीठमथांशेन पक्षांशं तु धरातलम् ।
वेदांशं चरणायामं मञ्चमध्यर्धभागतः ॥ ३१ ॥

---

१. 'ध' क. पाठः.

अर्धांशं वेदिकामानं प्रत्यन्तं पञ्जरं स्मृतम् ।
तस्माद् गृहकपोतान्तं गलोदयमिवाचरेत् ॥ ३२ ॥
प्रासादस्य कपोतात्तु यथाशोभं विनिर्गतिः ।
तलान्तरेऽपि कर्तव्यं पादोच्चे तु नवांशिते ॥ ३३ ॥
गुणांशघनाभित्तिः स्याच्छत्रशीर्षे तु संयुतम् ।
पादायामं चतुर्भागमध्यर्धं प्रस्तरोदयम् ॥ ३४ ॥
अर्धांशं वेदिकामानं कपोतान्तं गलोदयम् ।
प्रतिवाजनसीमान्तं पञ्जरोदयमीरितम् ॥ ३५ ॥
गोपानाधारतः कल्प्यान् महाबलपराक्रमान् ।
हस्तपादद्वयोपेतान् दंष्ट्राकीर्णान् सटान्वितान् ॥ ३६ ॥
रौद्रदृष्टिसमायुक्तान् सिंहान्वा कुञ्जरानपि ।
हंसव्यालादिभूतान्वा गले वा धारयेद् दृढम् ॥ ३७ ॥
धृत्वा हस्तेन गोपानं यथाशोभं पदाथवा ।
अथ पादौ च हस्तौ च यथायुक्ति निधाय च ॥ ३८ ॥
गोपानं शिरसावाह्य रचयेद्वा मनोहरम् ।
अथवा पञ्जरोत्सेधादाद्यर्धं पादमुच्यते ॥ ३९ ॥
तच्छेषपञ्जरोत्सेधेऽप्यष्टादशविभाजिते ।
कुर्यादेकांशमानेन तूत्तरोच्चं विचक्षणः ॥ ४० ॥
वलभिं त्वेकभागेन द्विभागं तु कपोतकम् ।
प्रस्तरोत्सेधमव्यंशं तत्समं वेदिकोदयम् ॥ ४१ ॥
सार्धद्विभागं पादोच्चं तत्पादं तूत्तरोदयम् ।
तत्समं वलभेरुच्चं पञ्चांशं शिखरोदयम् ॥ ४२ ॥

वेदांशं वा त्रिभागं वा कुर्यादौचित्यभेदतः ।
शेषं शक्तिध्वजोत्सेधं भवेद् द्वितलपञ्जरे ॥ ४३ ॥
अथवात्र त्रिभागार्धं सवलभ्युत्तरोदयम् ।
तत्समं तु कपोतोच्चं द्विभागं प्रस्तरोदयम् ॥ ४४ ॥
त्रिभागं स्यात् पादतुङ्गं सवलभ्युत्तरं दृशम् ।
पञ्चांशं शिखरोत्सेधं शेषं शक्तिध्वजं स्मृतम् ॥ ४५ ॥
एवं वा पञ्जरं कुर्याद् द्वितलं सर्वमन्दिरे ।
षट्त्रिंशद्भाजिते तुङ्गे सवलभ्युत्तरं त्रिभिः ॥ ४६ ॥
तत्समं तु कपोतं स्याद् द्व्यर्धांशं प्रस्तरोदयम् ।
तत्समं वेदिकामानं चतुर्भिः पादमुच्यते ॥ ४७ ॥
अर्धाधिकद्विभागेन वलभ्यन्वितमुत्तरम् ।
तत्समं तु कपोतोच्चं तत्समं प्रस्तरोदयम् ॥ ४८ ॥
तत्समं चरणोत्सेधमुत्तरोत्सेधमंशतः ।
वलभ्युन्नतमेकांशं + + + शिखरोन्नतम् ॥ ४९ ॥
शक्तिध्वजं द्विभागं स्यादित्युक्तं त्रितलं बुधैः ।
चतुश्चत्वारिंशदंशे तुङ्गे पादावशेषिते ॥ ५० ॥
सवलभ्युत्तरं लोकैः कपोतं तत्समं स्मृतम् ।
त्रिभागं प्रतितुङ्गं स्यात् तत्समं वेदिकोदयम् ॥ ५१ ॥
चतुर्भिः पादमानं स्याद् द्वाभ्यां वलभिकोत्तरम् ।
तत्समं तत्कपोतोच्चं द्विभागं प्रस्तरोदयम् ॥ ५२ ॥
तत्समं वेदिकामानं पादोत्सेधं त्रिभागतः ।
वलभ्युत्तरमश्व्यंशं तत्समं तु कपोतकम् ॥ ५३ ॥

प्रत्युत्सेधं द्विभागं स्याद् द्विभागं पादमानकम्।
सवलभ्युत्तरं द्वाभ्यां षड्भागैः शिखरं स्मृतम् ॥ ५४ ॥
शेषं शक्तिध्वजं प्रोक्तं चतुस्तलमिदं स्मृतम्।
अथाष्टचत्वारिंशद्भिः पञ्जरैरंशितोदये ॥ ५५ ॥
सवलभ्युत्तरं चैव कपोतं प्रस्तरं तथा।
वेदिका च त्रित्रिभागैः पादोत्सेधं शरांशकम् ॥ ५६ ॥
सवलभ्युत्तरं तत्र कपोतं प्रतिवेदिके।
पृथक् सार्धद्विभागेन पादोच्चं चतुरंशतः ॥ ५७ ॥
वलभ्युत्तरमानं च कपोतं प्रस्तरं तथा।
पृथक् पृथग्विभागेन पादं वलभिकोत्तरम् ॥ ५८ ॥
पञ्चांशं शिखरोत्सेधं शेषं शक्तिध्वजोन्नतम्।
एवं वा पञ्जरं कुर्याच्चतुस्तलविभूषितम् ॥ ५९ ॥
चतुर्मुखं तु तुर्यश्रं पञ्जरं शिखरोदयम्।
तदायामत्रिभागैकं भद्रनासिविशालकम् ॥ ६० ॥
गले गले बालनासी तद्व्यासाग्न्यंशविस्तृता।
तारात्पञ्चांशविस्तारा बालनासिह्रयेऽथवा ॥ ६१ ॥
तत्समं पादहीनं वाप्यर्धं वा नासिनिर्गमम्।
दामैर्मुकुलवल्लीभिर्भूषयेच्छिखरं तथा ॥ ६२ ॥
पादोपरि कपोतेषु नासिकापत्रचित्रिता।
वेद्यूर्ध्वे पञ्जराधस्ताज्जालकं पूर्वमुक्तवत् ॥ ६३ ॥
नानाचित्रविचित्रं वा भवेत्कुम्भलतान्वितम्।
नानापत्रमृगाकीर्णं नाटकोक्तकथान्वितम् ॥ ६४ ॥

अथ तत्पार्श्वतः कार्यं चरणं त्वर्धमण्डितम् ।
दण्डं सपादं सार्धं वा सत्रिपादं द्विदण्डकम् ॥ ६५ ॥
द्विदण्डं वा प्रकर्तव्यं तज्जालकविशालकम् ।
उपपीठोक्तमार्गेण कारयेदुपपीठकम् ॥ ६६ ॥
तथाघ्रङ्गं तथाकारं पादं पादोक्तमार्गतः ।
तथोत्तरं च वलभिस्तत्तद्भूषान्वितं स्मृतम् ॥ ६७ ॥
अन्तरप्रस्तरयुतं गलकं बालनासिकम् ।
तिलपुष्पसमाकारं शीर्षं तिलकपञ्जरम् ॥ ६८ ॥
ग्रीवायां निर्मिते तार्क्ष्ये गरुडाभिधपञ्जरम् ।
कपोते वा गले वा स्यात्कपिश्चेत्कपिपञ्जरम् ॥ ६९ ॥
प्रत्यूर्ध्वे सिंहपादश्चेत्सिंहपञ्जरनामकम् ।
कपोते शिखरे कर्णे नानाचित्रविभूषितम् ॥ ७० ॥
चित्रपञ्जरमित्युक्तं शिल्पशास्त्रविशारदैः ।
महाप्रासादयोग्यं स्यात् त्रिचतुर्भूमिपञ्जरम् ॥ ७१ ॥
महागोपुरमुख्ये वा नैव क्षुद्रविमानके ।
अन्यदल्पविमानेषु योज्यं तदनुसारतः ॥ ७२ ॥

इति शिल्परत्ने पञ्जरकरणविधानं नाम
षड्विंशोऽध्यायः ।

अथ सप्तविंशोऽध्यायः ।

अथ वृत्तस्फुटितकम् ।

षडङ्गुलं समारभ्य द्व्यङ्गुलविवर्धनात् ।
(तावत्)कलावधिर्यावद् व्यासः स्यात् षड्विधोऽस्य तु ।
विस्तारार्धं तु तन्नीप्रं त्रिद्व्यंशं वा त्रिभागिकम् ।
वृत्ताकारं समाद्यन्तं तोरणाङ्घ्रिवदार्यतम् ॥ २ ॥
सकलं तत्तदूर्ध्वं तु शुकनास्यन्वितं तु वा ।
कर्णकूटाकृतिर्वाथ वृत्ताकारं प्रकल्पयेत् ॥ ३ ॥
स्तभोत्सेधयुगांशे तु द्विभागं चरणायतम् ।
कन्धरोदयमेकांशं शुकनास्यंशतो भवेत् ॥ ४ ॥
तदेव कूटमानं तु तत्तद्योग्यवशान्नयेत् ।

इति शिल्परत्ने वृत्तस्फुटितकलक्षणं नाम
सप्तविंशोऽध्यायः ।

अथ अष्टाविंशोऽध्यायः ।

अथ कुम्भलता ।

स्तम्भान्तरे महति धामनि पादविस्ता-
रोच्चाधिपादततपद्मगकुम्भसंस्थाम् ।
पादायतां घटमुखोद्गतपत्रचित्र-
मूलां प्रकल्पयतु कुम्भलतां समन्तात् ॥ १ ॥
कुड्यस्तम्भस्य विस्ताराद् द्विगुणं चार्धमुच्छ्रयम् ।
अथ पद्मासनं कुर्यात् तत्तदूर्ध्वं यथारुचि ॥ २ ॥

---

१. 'यु' स्व. पाठः.

विनिर्गतोन्नतिं कुम्भं पार्श्वयोस्तस्य तन्मुखात् ।
पत्रैर्विनिर्गतैश्चित्रं यथाशोभं नियोजयेत् ॥ ३ ॥

तदूर्ध्वे कुड्यचरणसमपादाम्बुजासनम् ।
अखण्डकलशं कुर्यात् पद्मं कुम्भलतान्वितम् ॥ ४ ॥

तस्याः कुम्भलतासंज्ञा सैव खण्डोपरि क्रमात् ।
नक्रतोरणविन्यस्ता स्तम्भकुम्भलता मता ॥ ५ ॥

कुम्भपद्मासनयुता सैव सर्वलतान्विता ।
पद्मकुम्भलता नाम विज्ञेयानिलता मता (?) ॥ ६ ॥

स्तम्भमूले तु वेद्यूर्ध्वे पद्मासनं प्रकल्पयेत् ।
पद्मोच्चं वसुधाभज्य कम्पमंशेन कारयेत् ॥ ७ ॥

अधःपद्मं गुणांशेन गलमेकांशमानतः ।
ऊर्ध्वपद्मं द्विभागेन कम्पमेकेन कल्पयेत् ॥ ८ ॥

तदूर्ध्वे कुम्भतुङ्गं तु पद्मस्योच्चसमं भवेत् ।
तत्तुङ्गद्विगुणा कुम्भलता वा ह्यन्यथाथवा ॥ ९ ॥

तदेवोत्सन्धिकोर्ध्वे तु वीरकाण्डं प्रकल्पयेत् ।
बोधिकारहितं यत्तत्स्तम्भाधारलता स्मृता ॥ १० ॥

स्तम्भतोरणवन्मूर्ध्नि कर्तव्या कुम्भगा लता ।

इति शिल्परत्ने कुम्भलताविधानं नाम

अष्टाविंशोऽध्यायः ।

अथ एकोनत्रिंशोऽध्यायः ।

अथोत्तराणि ।

खण्डोत्तरं चरणविस्तृतितुल्यविस्ता-
रोत्सेधमुत्तममतश्चरणोनतीव्रम् ।
पत्रोत्तरं दलविहीनघनं कनिष्ठं
रूपोत्तरं घनततीविपरीततो वा ॥ १ ॥

स्तम्भमूलसमं तारं तारस्यार्धं घनं विदुः ।
सप्तांशे शृगभागं(?) वा रुद्रांशे सप्तभागिकम् ॥ २ ॥

एवं पञ्चविधं प्रोक्तं रूपोत्तरघनं बुधैः ।
षड्भक्ते घनमानेनाप्यग्निभागं घनं विदुः ॥ ३ ॥

कल्पवाजनमेकांशं महापट्टं द्विभागिकम् ।
सप्तांशे भूमिभागं वा क्षुद्रवाजनकोच्छ्रयम् ॥ ४ ॥

द्विभागमूर्ध्वपट्टं स्या(दों?दोमां)शं घनमेव च ।
रुद्रांशे बाणभागं वा घनं वाजनमर्णवैः ॥ ५ ॥

अल्पवाजनमक्ष्यंशमथवाष्टविभाजिते ।
घनं वेदांशमिन्द्वंशं क्षुद्रवाजनमिष्यते ॥ ६ ॥

महापट्टं त्रिभिर्भागैर्व्युत्क्रमणे च दृश्यते ।
उत्सेधे विशिखांशिते द्वितयतो रूपोत्तरे वाजनं
षड्भक्तेऽल्पमिलांशतो द्वितयतो वा स्यान्महावाजनम् ।
एतन्निर्गमनं निजांशविहितं न्यस्येदुपर्युत्तर-
स्यैतत्तीव्रसमुच्छ्रयोच्छ्रयदलांशव्याततां पट्टिकाम् ॥ ७ ॥

स्तम्भान्तरेषु युग्मानि पत्राणि परिवेष्टयेत् ॥ ८ ॥

पत्रोत्तरे विशेषो + तथा युग्मानि वा पुनः ।
भारतारसमव्यासं यववृद्ध्या तथा पुनः ॥ ९ ॥
यवहीनेन वा कुर्याद् विस्तारार्धावसानकम् ।
विस्तारसप्तभागैकं नागरन्ध्रदशांशकैः ॥ १० ॥
रुद्रभास्करविश्वांशैरिन्द्रभागेऽर्धभागकैः ।
एकांशं तस्य पत्रस्य घनमानमुदाहृतम् ॥ ११ ॥
नानापुष्पलतादाममुखैः पत्रं विभूषयेत् ।
सुमुहूर्ते सुनक्षत्रे शुक्लपक्षे शुभोदये ॥ १२ ॥
स्नातोऽनुलिप्तः स्थपतिः द्रव्यैः सन्तोष्य तक्षकान् ।
गणेश्वरस्य संपूज्य पुण्याहं कारयेद् द्विजैः ॥ १३ ॥
विप्रेभ्यो दक्षिणां कृत्वा मौहूर्तिकवराय वै ।
मुहूर्तदक्षिणां कृत्वा वासोभिश्छन्नमुत्तरम् ॥ १४ ॥
कुड्येषु स्थापयेत् सम्यगथवाङ्घ्रिषु विन्यसेत् ।
तत्रापि बोधिकोर्ध्वे वा वीरकाण्डे तु वा न्यसेत् ॥ १५ ॥
स्वस्तिसूक्तादिकं सर्वं जपयित्वा द्विजोत्तमैः ।
संयोज्यान्यान्युत्तराणि परितश्चूलिका न्यसेत् ॥ १६ ॥
भारार्धं चूलिकोत्सेधं त्रिपादं वा समाचरेत् ।
उत्सेधार्धं घनं तस्य त्रिपादं त्र्यंशमेव वा ॥ १७ ॥
उत्तरस्योपरिष्टात् तु लुपास्थानेषु वा न्यसेत् ।
पादानि चूलिकाव्याससमोच्चानि ततः क्रमात् ॥ १८ ॥
एकैकाङ्गुलवृद्ध्या तु कारयेद् वा तदुन्नतम् ।
चूलिकाघनमानेन तुल्यं तेषां घनं स्मृतम् ॥ १९ ॥

तद्वनं द्विगुणं वाथ त्रिगुणं वा चतुर्गुणम्।
पादानां विस्तृतं तेषां मूर्ध्नि वा चूलिकां न्यसत् ॥ २० ॥
उत्तरोपरि वा न्यस्येत् कीलवेधैर्दृढीकृतम्।
उत्तरोपरि वा न्यस्येदथवा वाजनोपरि ॥ २१ ॥
कपोतोपरि वा न्यासं तुलानां प्रस्तरेऽथवा।
उत्तरोपरि विन्यस्य फलकं नेत्रसंज्ञकम् ॥ २२ ॥
तदूर्ध्वं वा तुलान्यासं यथाशोभं प्रकल्पयेत्।
वलभेश्च कपोतस्य घनमुत्तरतः समम् ॥ २३ ॥
तत्तदुचितभूषाढ्यं कपोतं मुष्टिबन्धवत्।
एकदण्डं द्विदण्डं वा त्रिदण्डं प्रस्तरोच्छ्रयम् ॥ २४ ॥
कूटकोष्ठादिकं सर्वं कारयेत् प्रस्तरे बुधः।
नानाचित्रकथां वात्र वल्लीपुष्पादिकं तु वा(?) ॥ २५ ॥
नेत्राख्यफलकान्यासप्रस्तरोत्सेधतः समम्।
त्रिपादं वाथवार्धं वा लताभिर्मण्डयेच्च तम् ॥ २६ ॥
तुलानां विस्तृतं कुर्यादुत्तरेण समादिकम्।
अलिन्दतारसदृशं तुलाङ्घ्र्युच्छ्रयमिष्यते ॥ २७ ॥
आरूढबाह्युत्तरयोरलिन्दं मध्यमुच्यते।
आरूढोत्तरविस्तारमुत्तरेण समादिकम् ॥ २८ ॥
न्यूनं तस्य तु पर्यन्तं चतुष्पष्ट्यङ्गुलादिभिः।
आरूढपादतुङ्गेन तदुत्तरविशालकम् ॥ २९ ॥
करोतु वा घनादीनि सर्वं पूर्ववदाचरेत्।
युग्मा वाथ तुलाः कार्या अयुग्माः पङ्क्तयः स्मृताः ॥ ३० ॥

युग्मायुग्मास्तुलाः कार्या देवागारे विशेषतः।
एकाङ्घ्र्यूनादिदण्डोच्छ्रितमुपरिनिधायोत्तरे वाजनं प्राक्
तिर्यग्दण्डोच्छ्रिताङ्घ्र्यूनितावितितुलास्तासु वंशानुवृत्त्या।
स्वार्धाक्रान्ता जयन्तीस्तदुपरि सुसमीकृत्य कृत्स्नानुमार्गं
निश्छिद्रं छादयेत् स्योचितघनफलकाप्रस्तरेणोर्ध्वभागम्।

द्वारार्धतः कदलिकाकरणे + गर्भ-
कुड्यं क्रमान्मुकुलयेदथवा शिलाद्यैः।
द्वारोर्ध्वतोऽष्टपुटचारुलसत्तरङ्गं
गर्भार्धतुङ्गमपिधानशिलाभिरामम्॥ ३२½॥

इति शिल्परत्ने उत्तरलक्षणं नाम
एकोनात्रिंशोऽध्यायः।

अथ त्रिंशोऽध्यायः।

अथ प्रस्तरम्।

स्तम्भोत्सेधार्धमानं वा मासूरोत्सेधमात्रकम्।
प्रस्तरस्योच्छ्रयं कुर्यात् पादस्योर्ध्वं विशेषतः॥ १॥

स्तम्भार्धादिसमुच्छ्रये प्रकृतिभक्ते प्रस्तरे वातिधृ-
त्यंशे चोत्तरवाजने त्रिशशिभिर्भूतालिरंशैस्त्रिभिः।
क्ष्माद्रीन्दुक्षितिभिः सवाजनकपोतालिङ्गपट्यन्तरी-
स्त्र्येकांशैः प्रतिवाजने प्रतिकपोते क्ष्मांशहान्यावरे॥ २॥

त्रिंशद्भागविभक्तमत्र विधिवत् कृत्वोन्नतं प्रस्तरे
कुर्याच्चोत्तरमत्र पञ्चभिरतस्तेषां त्रिभागं घनम्।
द्वाभ्यां वाजनमत्र पञ्चवलभौ भूयः कपोतं दिशा
तस्मिन् स्यान्मुखपट्टिका द्वितयतो गोपानयुक्तं तु तत्॥

आलिङ्गत्रिभिरंशतो द्वितयतः कार्यं च तद्वाजनं
भूयोंशैः प्रतिमत्र वह्निभिरुभाभ्यामेव तत्पट्टिकाम्।
प्रत्यग्रं मकरास्यकं विरचयेद् व्यालेभसिंहादिभिः
कार्यं चारुकपोतकं प्रमथकैरारूढमत्युज्ज्वलम्॥ ४॥

उत्सेधमेवमाख्यातं तेषां नीप्रमथोच्यते।
स्तम्भात् तु बोधिकानीप्रं तस्मादुत्तरनिर्गतिः॥ ५॥

ततस्तद्वाजनस्यापि नीप्रं तत्तुङ्गमानतः।
वाजनाद् वलभेर्नीप्रं वलभ्युच्चसमं भवेत्॥ ६॥

अर्धं वाथ त्रिपादं वा प्राग्वत् तद्वाजनस्य तु।
वाजनात् तु कपोतस्य नीप्रं चालम्बनं समः॥ ७॥

तत्कपोतं सगोपानं गोपानरहितं तु वा।
पादबाह्यसमं प्रोक्तं तत्कपोतस्य नीप्रकम्॥ ८॥

आलिङ्गं प्रस्तरसमं वेशं तस्माद् गलस्य तु।
प्रत्युत्सेधसमं वाथ कन्धरात् प्रतिनिर्गतिः॥ ९॥

समं त्रिपादमर्धं वा चोत्तराग्रस्य नीप्रकम्।
वलभिं भूतहंसाद्यैर्भूषयेदुत्तरोपरि॥ १०॥

नानापत्रलताद्यैस्तु कपोते कर्णपालिकाम्।
कुर्याद् सिंहमहेभाद्यैः प्रतिं संभूषयेत् पुनः॥ ११॥

प्रत्यग्रं कुररीबन्धं पूर्वोक्तक्रममाचरेत् ।

अथान्यथा —

दण्डमर्धं त्रिपादं वा तूत्तरोच्चं त्रिधा भवेत् ॥ १२ ॥

वलभिर्दण्डमाना स्याद् वाजनं पूर्ववद् भवेत् ।
कपोतोच्चं द्विदण्डार्धलम्बं तस्यार्धदण्डकम् ॥ १३ ॥
तत्समं निर्गमं सार्धदण्डं वापि द्विदण्डकम् ।
शेषं प्रस्तरमानं तु पञ्चभागे कृते पुनः ॥ १४ ॥
आलिङ्गमंशं कण्ठं च द्व्येकाभ्यां प्रतिवाजने ।

अथान्यथा —

उत्तरोच्चे + रामांशे भागेनैकेन पट्टिकाम् ॥ १५ ॥
तदूर्ध्वांशद्वयेनापि भावयेत् पद्मपट्टिकाम् ।
अत ऊर्ध्वं प्रस्तरं स्यात् पादार्धादुन्नतं यथा ॥ १६ ॥
सप्तांशे प्रस्तरोत्सेधे भागाभ्यां तु कपोतकम् ।
पट्टिका चापि भागेन कर्णमेकांशतो भवेत् ॥ १७ ॥
द्वाभ्यां तु कम्पकं कुर्याच्छिष्टेनाप्यूर्ध्वपट्टिकाम् ।
कपोतस्य विशेषेण तूपानसमनिर्गमम् ॥ १८ ॥

प्रकारान्तरं —

दण्डत्रिपादमुत्सेधमुत्तरोपरिवाजनम् ।
हंसभूतावलिर्वापि निद्रावा(?) दण्डकोच्छ्रया ॥ १९ ॥
निद्रावकर्णपट्टी(?) च तुलापादश्च यद्गतः ।
वाजनोर्ध्वे कपोतालिं कुर्यादध्यर्धदण्डतः ॥ २० ॥

द्वित्रिदण्डैस्तु वा तुङ्गमाकारं भिन्नवेणुवत्।
साग्रपट्टं तदुपरि कर्णमध्यमपालिके ॥ ११ ॥
अर्धत्रिपाददण्डेन कपोतालम्बनं पुनः।
उत्तरान्तं वाजनान्तं नवमात्रं तु वा भवेत् ॥ १२ ॥
अथवा पोतिकाधस्तात् कपोतस्याच्चलम्बनम्।
तदन्ते वा तुलाकर्णस्ततः स्यादर्धदण्डतः ॥ १३ ॥
त्रिपाददण्डबाहल्यं कम्पमानं विधीयते।
शिलामये शिलाभिः स्यादाच्छाद्यं वाजनोपरि ॥ १५ ॥
सौवर्णैं राजतैः शौल्बैः लौष्टैराच्छाद्य मार्त्तिकैः।
अथ गोपाननीप्रार्धाद् दण्डिकानियमो भवेत् ॥ १६ ॥
दण्डिकाव्यासबाहल्यौ स्तम्भव्यासार्धमाचरेत्।
चतुरायतसंस्थानमनुमार्गेण बन्धयेत् ॥ १७ ॥
दण्डिकाभारबहलमधोमण्डिः सनालिकम्।
दण्डैः समं मुष्टिबन्धं तत् पृथग् वाजनोपरि ॥ १८ ॥
अथ तद् व्यालसिंहेभभूतनाटकभूषितम्।
कपोतोपरि भूतालिः पादात्पादविनिर्गता ॥ १९ ॥
पादव्याससमा वार्धत्रिपादसदृशोच्छ्राया।
प्रतिर्निवेश्या तत्तुङ्गत्रिचतुर्भागनिर्गमम् ॥ २० ॥
वाजनं स्यात् समतलमुन्नतं तु न शोभनम्।

इति शिल्परत्ने प्रस्तरविधानं नाम
त्रिंशोऽध्यायः।

अथ एकत्रिंशोऽध्यायः ।

अथ गललक्षणम् ।

ऊर्ध्वभूमेः पादतुङ्गं गलमानमुदाहृतम् ।
आद्यङ्गोन्नततुल्यं वा गलोन्नतमिहोच्यते ॥ १ ॥

तदुच्चात् त्रिचतुष्पञ्चभागैकं वेदिकोन्नतम् ।
शेषं गलोदयं ख्यातमशेषं वा गलोदयम् ॥ २ ॥

त्रिचतुष्पञ्चहस्तं वा गलव्यासमुदाहृतम् ।
अङ्घ्रेर्वेद्यङ्घ्रिवेशं यत् तद्वद्वा गलवेशनम् ॥ ३ ॥

त्रिपादं वा तदर्धं वा वेद्यङ्घ्रेर्गलवेशनम् ।
वेदाश्रं नागरकर्णं वस्वश्रं द्राविडे गलम् ॥ ४ ॥

वृत्तं तु वेसरे हर्म्ये शीर्षानुकूलमाचरेत् ।
दिशि भद्रसमायुक्तं नासानुकूलकाङ्घ्रिकम् ॥ ५ ॥

तदधः पादतुङ्गाद् वा नालोन्मानं प्रकल्पयेत् ।
पूर्वाङ्घ्रितः परं पादं यथापूर्वं समीरितम् ॥ ६ ॥

भानुद्व्यंशे गलोत्सेधे कुलांशं तद्गलोदयम् ।
उत्तरोच्चं गुणांशं तु वाजनोच्चं शिवांशकम् ॥ ७ ॥

अग्न्यंशं वलभेस्तुङ्गं व्योमांशं वाजनोदयम् ।
अथवा गलशिष्टांशे भानुभागकृते पुनः ॥ ८ ॥

उत्तरोच्चं गुणांशं तु शिवांशं वाजनोदयम् ।
तदूर्ध्वे मुष्टिबन्धोच्चमध्यर्धांशमुदाहृतम् ॥ ९ ॥

मृणाल्युच्चं गुणांशं तु पट्टिकां त्वेकभागतः ।
सार्धांशं दण्डिकोच्चं तु व्योमांशं पद्मपट्टिका ॥ १० ॥

गोपानं कल्पयेदूर्ध्वमवरोहणमेव वा ।
गलादुत्तरनिष्क्रान्तं तदुच्चदलतों भवेत् ॥ ११ ॥
वाजनादेस्तु निष्क्रान्तं यथापूर्वं स्वतुङ्गतः ।

अथान्यथा —

वेदिकाद्विगुणोऽध्यर्धसमो वा स्याद् गलोदयः ।
भित्तिविस्तारनामांशं वेदिकावेशनं भवेत् ॥ १२ ॥
ग्रीवावेशं तदूर्ध्वं स्याच्छरांशोनोऽपि तत्समः ।
मृणालिकावक्रपादभूतहंसमृगैरपि ॥ १३ ॥
व्यालनाट्यकथाभिर्वा गलभूषणमाचरेत् ।
कूटकोष्ठमहानासिपञ्जराद्यैरथापि वा ॥ १४ ॥

अथ प्रकारान्तरं —

ग्रीवायामुपरि त्रिदण्डपरिशिष्टांशे चतुर्भाजिते
मूलांशं च तृतीयकं च दशधा तुर्यं च कृत्वांशकम् ।
आलिङ्गाह्वयपट्टिकां त्रिभिरुभाभ्यामन्तरीं पञ्चभिः
स्वद्यंशाहितवाजनां प्रतिमधः षड्भक्त्यंशके कल्पयेत् ॥
शालाकूटगवाक्षकादिरुचिरां भित्तिं द्वितीये तृती-
येंऽशे पञ्चभिरुत्तरं च वलभिं भूतद्विपाद्युज्ज्वला ।
तुर्येंऽशे दशभिर्विकल्पितमुखपट्ट्याढ्यं कपोतं ततः
सस्वाङ्घ्रि गृहपिण्डिमूर्ध्वनिहितैर्दण्डैस्त्रिभिः कल्पयेत् ॥
तले द्वितीये विदिशासु कूटान् दिशासु शालाश्च तदन्तरेषु ।
नासीर्द्विशो वा रचयेद् दिशासु मूर्तीरजाद्याः शिखरेषु नासीः ॥

तद्भेदः—

बाह्योत्तरेण रहिते विगतोर्ध्वकूटे
ग्रीवान्तरे निजगजांशकृशाग्रकुड्ये ।
न्यस्योत्तरं न्यसतु तत्र लुपास्तुलास्थ-
पादेषु लग्नशिरसश्चरणार्धलम्बाः ॥ १८ ॥

इति शिल्परत्ने गलविन्यासलक्षणं नाम
एकत्रिंशोऽध्यायः।

अथ द्वात्रिंशोऽध्यायः ।

अथ शिखरम् ।

तारात् पञ्चद्विभागं वा नवसप्तांशमेव वा ।
त्रयोदशांशरुद्रांशं विमानानां विभागतः ॥ १ ॥
अत्यष्टितिथिभागं वा वेदरामांशकं तु वा ।
षट्पञ्चांशं तु वा नागसप्तभागमथापि वा ॥ २ ॥
विस्तारार्धं तु वा कुर्यादष्टधा शिखरोदयम् ।
वैदेहं मागधं चापि कौरवं कौसलं तथा ॥ ३ ॥
शौरसेनं च गान्धारं क्रमेणावन्तिकं स्मृतम् ।
व्यासार्धं शिखरोत्सेधं कि(ञ्चि)न्न्यूनं च मानुषम् ॥ ४ ॥
व्यासार्धं तुङ्गमाद्यं तु तत्तुङ्गे सप्तभाजिते ।
एकैकांशविवृद्ध्याष्टौ भवन्ति शिखरोदयाः ॥ ५ ॥
व्यामिश्रकं कलिङ्गं च तथा काशिकमेव च ।
वैराटं द्राविडं चैव बाल्हिकं कौल्लकं पुनः ॥ ६ ॥

तथा शौण्डिकमित्येते व्यामिश्रादिलुपोदयाः ।
एते दैवविमानानां पाषण्डाश्रमिणां तथा ॥ ७ ॥
प्रतिलोमकुलानां तु विशेषेण शुभावहाः ।
अथवान्यप्रकारेण भवन्ति शिखरोदयाः ॥ ८ ॥
दण्डिकोत्तरविस्तारात् पञ्चभागद्विभागिकम् ।
सप्तभागत्रिभागं च नवांशे चतुरंशकम् ॥ ९ ॥
रुद्रभागकृतेष्वंशं विश्वभक्ते षडंशकम् ।
तिथ्यंशे सप्तभागं वात्यष्ट्यंशे वा गजांशकम् ॥ १० ॥
व्यासार्धं वा क्रमेणैव कुर्याच्छिखरकोदयम् ।
एते पञ्चालवैदेहमागधाः कौरवाः पुनः ॥ ११ ॥
कौसल्यशौरसेनौ च गान्धारावन्तिकौ क्रमात् ।
अथ तारार्धमुत्सेधं शिखरस्य नवांशिते ॥ १२ ॥
एकद्वित्रिचतुष्पञ्चषट्सप्तांशविवर्धनात् ।
क्रमेण शिखरोच्चानां नामान्यपि च सप्तधा ॥ १३ ॥
कालिङ्गकाश्यवाराटकौल्लकानि च शौण्डिकम् ।
काश्मीरं चैव गाङ्गेयौ शिखराणि पृथग् विदुः ॥ १४ ॥
एतानि देवधिष्ण्यानां विस्तारार्धं नृणां गृहे ।
अन्यथा शिखरोत्सेधं वदन्ति च महत्तराः ॥ १५ ॥
ऊर्ध्वभूस्तम्भतुङ्गस्य सदृशं शिखरोदयम् ।
आद्यङ्गोन्नतमानं वा शिखरस्योदयं स्मृतम् ॥ १६ ॥
अल्पानां तु विमानानां तारात् त्र्यंशं शिरोदयम् ।
विमानोच्छ्रयषट्पञ्चभागं वा शिखरोदयम् ॥ ५७ ॥

शिखरे कपोतनिष्क्रान्तं वेदितारसमं विदुः ।
वलभीबाह्यतो दण्डमध्यर्धं वा द्विदण्डकम् ॥ ५८ ॥

सार्धद्विदण्डं वा नीप्रं लम्बनं च कपोतके ।
तन्नीप्रसदृशं तुङ्गं वलभेर्वाजनोर्ध्वतः ॥ ५९ ॥

शिरस्तादृक्कपोतोर्ध्वे कारयेत् स्तूपिकादधः ।
शिखरे मध्यविस्तारं कपोताद् बाह्यतः समम् ॥ २० ॥

वलभीबाह्यतुल्यं वा तदर्धं वा त्रिपादकम् ।
चतुरश्रं च वृत्तं च षडश्राष्टाश्रमेव च ॥ २१ ॥

द्वादशाश्रं षोडशाश्रं पद्मकुड्मलसन्निभम् ।
तथा कमलसङ्काशं दीर्घवृत्तं च कोमलम् ॥ २२ ॥

अष्टाद्यष्टाष्टधाराणि हर्म्यादीनां शिरांसि च ।
षडाद्यं षष्टिकोणं च समन्तं शिखराकृति ॥ २३ ॥

शिखरस्य तु विस्तारे बाणाग्न्यंशं तु विस्तृतम् ।
शिखरे बलिकस्थानं भुतांशे तु शिरोदये ॥ २४ ॥

नीप्रतो वेदभागान्ते बलिकस्थानमाचरेत् ।
त्रिचतुःपञ्चमात्रं वा बलिमण्डलविस्तृतम् ॥ २५ ॥

तत्तारस्य चतुर्थांशं तन्मण्डलघनं भवेत् ।
युग्मं वायुग्मसंख्यं वा परितः कल्पयेत् समम् ॥ २६ ॥

बलिकानामधश्चोर्ध्वे वेत्रं तस्यार्धमानतः ।
बलिमण्डलविस्तारपञ्चभागद्विभागिकम् ॥ २७ ॥

शिरःपद्मविशालं तु तदुच्चं शिखरावधिम्।

+ + + + + + + + + + + + पञ्चद्विसप्तत्रिकं

त्वष्टाश्रस्य नवाम्बुधिश्च शिखरे त्वेकादशात् पञ्च वा।

वृत्तानां त्वथ षट्त्रयोदशतिदा(?)तिथ्यंशसप्तांशकैः

शालायाश्च निजार्धमेव नवतिः सप्तादशांशे भवेत्(?)॥

इति शिल्परत्ने शिखरलक्षणं नाम
द्वात्रिंशोऽध्यायः।

अथ त्रयस्त्रिंशोऽध्यायः।

अथ लुपालक्षणम्।

कुर्यादुत्तरपट्टिकोपरि लुपाः कूटप्रविष्टाग्रकाः

स्वस्वांशाहितकर्णसूत्रकमितांन्मध्यादिकर्णावधि।

स्तम्भोच्चे शरशैलनन्दनयनैर्भक्ते चतुर्धोत्तरात्

तासां स्यादवलम्बनं नयनवह्न्यब्ध्युर्वरांशैः क्रमात्॥ १॥

अधोमूलाश्चोर्ध्वकेशा लुपाः सर्वाः प्रकीर्तिताः।

स्तम्भोत्सेधत्रिभागैकं लुपालम्बं करोतु वा॥ २॥

चतुरङ्गुलतो विभजेद् विकृतिलुपापङ्क्तिसंख्यकार्धेन।

एकैकांशविहीनेष्वखिलभुजेष्वब्धिमात्रकं कोटिः॥ ३॥

तत्कर्णोन्मितभुजया कोट्या पूर्वोक्तया + चयः।

तेन लुपाया दैर्घ्यं षड्गुणितेनाश्विहस्तावतितिगृहे॥ ४॥

तस्मान्न्यूनाधिकस्तारगृहे नीप्रलम्बनेऽथोह्य।

पुतद्वदत्तरकूटादीनां घने चानुपाततः कार्यम्(?)॥ ५॥

उत्तरस्यानुरूपेण तासां तारमुदीरितम् ।
तत्समं पादहीनं वा वस्वंशोनाधिकेन वा ॥ ६ ॥
पादाधिकं वा वस्वंशत्रितयाधिकमेव च ।
विस्तारार्धाधिकं वा स्याद् विस्तारं प्रकृतेरिदम् ॥ ७ ॥
प्रकृतिव्याससदृशं तुर्यश्रं कल्पयेद् बुधः ।
तत्र पूर्वोक्तवत् कार्याः कर्णरेखाः क्रमेण तु ॥ ८ ॥
विकृतिलुपानां तारं तत्तत्कर्णसमं विदुः ।
स्वव्यासाब्ध्यंशसहितं लुपामूलविशालकम् ॥ ९ ॥
पुच्छार्धं यत्र संयोज्यं नीप्रपट्ट्या विचक्षणैः ।
सार्धाङ्गुलं तु बाहल्यं लुपानां यववृद्धितः ॥ १० ॥
यावदत्वङ्गुलं तावत् कुर्यादौचित्यभेदतः ।
स्वस्वघनार्धेष्वेवं पङ्क्तिदलैः संविभज्यवलयस्य ।
गमनं युक्त्या कुर्यादेकैकांशोनितेन कोट्यादौ ॥ ११ ॥
अथवान्यप्रकारेण लुपादीर्घं विदुर्बुधाः ॥ १२ ॥
वंशोच्चेमुत्तरयत्तत्स्वेनैव (?) गुणयेद् बुधः ।
यथायथानि स्थानानि लुपानां वंशलम्बतः ॥ १३ ॥
प्रत्येकं स्वगुणीकृत्य वंशस्योच्चकृतौ युतम् ।
तन्मूलं तु लुपामानमेवं सर्वत्र कल्पयेत् ॥ १४ ॥
उत्तरानीप्रलम्बं यत् तेन तत्रापि कल्पयेत् ।
तारार्धं स्वगुणीकृत्य वंशोच्चकृतिसंयुतम् ॥ १५ ॥
चूलिकामध्यगात् कीलाद् यद्यद्रीद्र(?)लुपान्तरम् ।
तदपि स्वगुणीकृत्य तारार्धोच्चकृतौ युतम् ॥ १६ ॥

तत्तदिष्टलुपायाममिष्टयोगात् प्रकल्पयेत् ।
लुपाफलकमादाय तक्षितं तक्षकोत्तमैः ॥ १७ ॥
ध्वजसूत्रं तु कर्तव्यमामूलाग्रं तु पार्श्वयोः ।
सूत्रादभ्यन्तरं कार्यं चूलिकाव्यासमानतः ॥ १८ ॥
द्विव्यङ्गुलान्तरं कार्यं (तस्य ?) ध्वजसूत्रस्य पार्श्वयोः ।
पार्श्वसूत्रे प्रकर्तव्ये पुनरतन्मानसाधनैः ॥ १९ ॥
मात्वाङ्कयेच्चूलिकोर्ध्वे वलयस्थानकेषु च ।
मूलाग्रयोर्विशेषेण नितरां मानवित्तमः ॥ २० ॥
उत्तराग्रीप्रपर्यन्तलुपायामे(पु?तु) भाजिते ।
कुर्यान्नेत्रांशतो नीप्राद् वलयं शेषमूर्ध्वतः ॥ २१ ॥
त्रिधा विभक्ते कर्तव्ये वलयद्वितयं समम् ।
उत्तरादूर्ध्ववंशान्तं पञ्चधा विभजेत् पुनः ॥ २२ ॥
दक्षिणोत्तरयोर्मध्यं द्विभागं शेषमूर्ध्वतः ।
सप्तांशे नयनांशेन वलयोत्तरमध्यमम् ॥ २३ ॥
वलयद्वितये कार्यं वलयाद्वय(?)मेव च ।
वलयादूर्ध्ववंशान्तं त्रिभिरेवं करोतु वा ॥ २४ ॥
तत्तच्छोभानुरूपेण युक्त्या वा कारयेदिदम् ।
पूर्वोक्तविन्दुस्थानेषु चतुरङ्गुलमात्रकम् ॥ २५ ॥
तुर्यश्रं कल्पयेत् तत्र कर्णसूत्रं समालिखेत् ।
तत्सूत्रं शिल्पशास्त्रज्ञैर्वितानमिति कथ्यते ॥ २६ ॥
तस्य तिर्यग्गतं सूत्रं लम्बसूत्रं विदुर्बुधाः ।
करोत सुषिरं तत्र वलयस्थानके बुधः ॥ २७ ॥

चतुर्दशयवं प्रोक्तं प्रायेण वलयं बुधैः ।
त्र्यङ्गुलं द्व्यर्धमात्रं वा द्व्यङ्गुलं सार्धमात्रकम् ॥ २८ ॥
तुल्यमुत्तरबाहल्यैश्चूलिकाया विशालकम् ।
तदर्धं तद्घनं कुर्यात् तत्त्रिभागद्वयं तु वा ॥ २९ ॥
घनमानत्रिभागैकं तत्कीलानां घनं विदुः ।
तच्चतुर्गुणमेव स्या(द् वा?व्या) समग्रे ततः क्रमात् ॥
अष्टांशहीनमूले तद्व्यासं युक्त्या तदायतम् ।
उत्तरोपरि विन्यस्येच्चूलिकामथवा पुनः ॥ ३१ ॥
तत्पादं तत्र विन्यस्य युक्त्या तस्यां च चूलिकाम् ।
चूलिकावलयादीनां घनमानप्रमाणतः ॥ ३२ ॥
तुर्यश्रं कल्पयेत् क्षेत्रं पूर्ववत् फलकादिषु ।
पूर्ववत् कर्णसूत्राणि लुपापङ्क्तिवशाल्लिखेत् ॥ ३३ ॥
तच्चत्कर्णगतं मानमायामं सुषिरादिषु ।
तच्चल्लुपागतं कुर्याच्चूलिकावलयादिषु ॥ ३४ ॥
आयतं सुषिरस्यास्य नोर्ध्वाधस्तिर्यगेव हि ।
ऊर्ध्वाधस्सुषिरायामं वलयादिघनैः समम् ॥ ३६ ॥
लुपानां प्रकृतीभागे ह्यन्तर्गमनमीरितम् ।
तच्चद्गमनमानेन चूलीवलययोस्तथा ॥ ३५ ॥
कोटिभागे तु गमनं लम्बसूत्राद् बहिर्गतम् ।
आयताश्रं तु सुषिरं विकृतीनां ततो भवेत् ॥ ३७ ॥
तुर्यश्रं सुषिरं कुर्याद् वलयस्य प्रमाणतः ।
प्रकृतीनां लपानां वै पुनस्तत्र समाचरेत् ॥ ३८ ॥

छिन्द्यान्मूलं लुपानां वै तद्धितानाख्यसूत्रतः ।
तस्माद् वलयलम्बान्तं वलयाद् वलयान्तरम् ॥ ३९ ॥
वलयोत्तरयोर्मध्यं वलयाद् वंशकावधि ।
छिन्द्यात् परशुना सम्यग् यथानिम्नं तु तक्षयेत् ॥ ४० ॥
कुक्षिनिम्नं च सर्वासां सज्यचापमिवाचरेत् ।
अर्धचन्द्राभमित्येके नीप्रान्ते तु विशेषतः ॥ ४१ ॥
कुक्षिनिम्नं प्रकर्तव्यं जङ्घापृष्ठसमं नृणाम् ।
वलयस्थानपर्वाणि लुपाविस्तारमानतः ॥ ४२ ॥
उत्तरद्विगुणं वा स्यादुत्तरोपान्तपर्वकम् ।
ऊर्ध्वबिन्दुगताल्लम्बसूत्रात् कूटार्धमानकम् ॥ ४३ ॥
नीत्वा तत्र शिखां कृत्वा छिन्द्यात् परशुना ततः ।
व्यासं सङ्कोचयेत् तत्र सज्यचापाभमेव तु ॥ ४४ ॥
उत्तानधनुषा तुल्यं पुच्छभागोर्ध्वमाचरेत् ।
लुपाल्लुपान्तरं नीप्रस्थाने स्यात् करमात्रकम् ॥ ४५ ॥
प्रायेण कथितः सद्भिः किञ्चिन्न्यूनाधिकं तु वा ।
वलयत्रिगुणविस्तारं कुर्याद् वलयबन्धकम् ॥ ४६ ॥
नानापत्रविचित्राद्यैर्भूषयेत् तद् यथारुचि ।
उत्तरार्धं त्रिपादं वा वंशस्योच्छ्रयमिष्यते ॥ ४७ ॥
उच्छ्रयेण तथा तारमुच्छ्रयेण समं तु वा ।
तुलायां न्यस्य वंशाङ्घ्रिं वंशं वा तत्र विन्यसेत् ॥ ४८ ॥
वंशस्य तारद्विगुणमध्यर्धं वास्य विस्तृतम् ।
तत्पादं वंशपादस्य घनं त्रिभागं वा समाचरेत् (?) ॥ ४९ ॥


लुपाग्रशिखयैवैनं दृढीकृत्य न्यसेत् तु वा ।
लुपानां चूलिकायोगे सन्धिः स्यादर्धपार्णिकम् ॥ ५० ॥
लुपाग्रवंशयोगे तु वेणुपर्वाभिधं भवेत् ।
विकृतिलुपानां तासां सकलबहलसदृशतरा परिधिः ।
(परिधिः) कूटस्येष्टा सा कथिता शिल्पशास्त्रज्ञैः ॥ ५१ ॥
उत्तरतारसमानं कुर्याद् वा तत्र कूटविष्कम्भम् ।
सार्धं वाथ सपादं द्विगुणं वा कारयेद् यथाशोभम् ॥ ५२ ॥
यावन्त्यो विकृतिलुपास्तावन्त्यश्राणि कूटस्य ।
वृत्तं वापि समस्तं तक्षणकुशलैस्तु कारयेन्मतिमान् ॥ ५३ ॥
व्यासार्ध्यर्धं दीर्घं पादोनाक्षं तथैव नेत्रं वा ।
धुद्भूरप्रसवाभं कूटं कुर्यादधोमूलम् ॥ ५४ ॥
पट्टं किञ्चित् कुर्यात् कूटस्य लुपावितानतारसमम् ।
उत्तरवन्नैवोर्ध्वं पट्टमधश्चोर्ध्वतो निघनम् ॥ ५५ ॥
वंशस्यापि च पट्टं कुर्यादेवं घनं चैव ।
अग्रमधः कूटस्य कार्यं पद्मालये लुपानां च ॥ ५६ ॥

अष्टांशकादिकृशविस्तृतिपावकांश-
तीव्रा च नीप्रफलकोत्तरतो लुपानाम् ।
द्वित्राङ्गुलादिविततं चतुरश्ररूपं
कर्तव्यमासु वलयं च निजानुरूपम् ॥ ५७ ॥

उत्तरस्य तु विष्कम्भे दशभागकृते पुनः ॥ ५८ ॥
अष्टांशे नीप्रपट्टिः स्यात् सप्तसप्तार्धकैरपि ।
बहलं तद्विभागैकविस्तारेऽष्टांशके कृते ॥ ५९ ॥

ऊर्ध्वपट्टत्रिभागं वा मध्यं तच्चतुरंशकम्।
क्षुद्रवाजनमेकांशमथ पञ्चांशके कृते ॥ ६० ॥
व्यासे वाजनमश्विभ्यां त्रिभागं घनमुच्यते।
विस्तारस्य त्रिभागैकं कर्णं नीप्रवितानतः ॥ ६१ ॥
पञ्चभागद्विभागं वा सप्तभागत्रिभागिकम्।
धूलीनिरोधनं कर्म सम्यक् कृत्वा गुरुः स्वयम् ॥ ६२ ॥
विन्यस्यन् नीप्रफलका लुपापुच्छेषु वेधयेत्।
प्रत्येकं नीप्रकोणेषु पारावतमथ न्यसेत् ॥ ६३ ॥
नीप्रपट्टयपिधानार्थं लोष्टानां लक्षणाय च।
शाकाद्युत्तमदारुकल्पितफलकैरेताः समन्ताल्लुपाः
संछाद्योपरि तत्पिधानफलकां कृत्वोल्लसत्कीलकाम्।
वास्त्वाधारसमोन्नतां प्रथिततत्पाथोजकुम्भादिकां
विन्यस्येन्नवपुण्डरीकमुकुलाग्रामूर्ध्वतः स्तूपिकाम् ॥ ६४ ॥
यवात्यष्टिमितव्यासा पट्टिका कथिता बुधैः ॥ ६५ ॥
यवानां नवकं प्रोक्तं बहलं शिल्पकोविदैः।
बहलात् पादहीनं तु तासामन्तरमीरितम् ॥ ६६ ॥
तलोच्छ्रयार्धमुदितमपिधानस्य विस्तृतम्।
पादं वाप्यथ पादोनं कीर्तितं तदवाङ्मुखम् ॥ ६७ ॥
पादुकोच्चेन बहलं सममर्धं त्रिपादकम्।
वेश्मपुंसः शिरोदेशमपिधानमितीरितम् ॥ ६८ ॥

इति शिल्परत्ने लुपालक्षणं नाम
त्रयस्त्रिंशोऽध्यायः।



अथ चतुस्त्रिंशोऽध्यायः ।

अथ मूर्ध्नेष्टका ।

शिखरस्योदयार्धान्ते महानास्यवसानके ।
शक्तिध्वजावसाने वा मूर्ध्नेष्टकां तु विन्यसेत् ॥ १ ॥
शिलाभिस्तु शिलाहर्म्ये त्विष्टका त्विष्टकालये ।
दारुणा दारुहर्म्ये तु कर्तव्यं शिवमिच्छता ॥ २ ॥
मिश्रद्रव्यकृते हर्म्ये यद्रव्ये(ण) कृतं शिरः ।
तद्रव्येणैव कर्तव्यं मूर्ध्नेष्टकाविधिं तथा ॥ ३ ॥
इष्टकाव्यासमायामं घनं चाद्येष्टकामिव ।
लोहजं दारुजं वाथ स्तूपीदण्डं तु कारयेत् ॥ ४ ॥
असनं खदिरं वाथ तिन्त्रिणीसारमेव वा ।
मधूकं पद्मरज्जूकं षडेते तरवः स्मृताः ॥ ५ ॥
पूर्वोक्तान्येव लोहानि अथ मिश्रितमेव वा ।
ऊर्ध्वभूम्यङ्घ्रिविस्तारं स्तूपीदण्डायतं भवेत् ॥ ६ ॥
मूर्ध्नशैलोपरिष्टात् तु स्तूप्यन्तं वा तदायतम् ।
ऊर्ध्वभूम्यङ्घ्रिविस्तारं तस्य मूलविशालकम् ॥ ७ ॥
तस्याग्रमङ्गुलं व्यासं मूलादग्रं क्रमात् कृशम् ।
तुङ्गे गुणांशे त्वेकांशं मूले वेदाश्रमाचरेत् ॥ ८ ॥
चतुरश्रं मध्यमग्रे तु वृत्ताकारं प्रकल्पयेत् ।
चतुरश्रोपरिष्टात् तु सर्वं वृत्तमथापि वा ॥ ९ ॥
कर्तव्यं तस्य मूले तु शिखिपादेन योजनम् ।
दण्डमूलसमं व्यासं स्वव्यासत्रिगुणायतम् ॥ १० ॥

तद्व्यासार्धघनोपेतं पूर्वाग्रं चोत्तराग्रकम्।
वद्ध्वा तन्मध्यगे छिद्रे दण्डलम्बं सुयोजयेत् ॥ ११ ॥
दण्डमूलत्रिभागैकं शिखाव्यासमुदाहृतम्।
शिखिपादं घनं तस्य दीर्घं स्याद् योजयेद् दृढम् ॥ १२ ॥
दण्डमूलाग्रयोः पट्टं योजयेल्लोहजं बुधः।
कर्णिकायां न्यसेद् दण्डं शक्रादिषु महादिशि ॥ १३ ॥
चत्वारश्चेष्टकाः स्थाप्या शुभेऽहनि विशेषतः।
आचार्यो मण्डपे सर्वमधिवास्य यथाविधि ॥ १४ ॥
रात्रौ जागरणं कृत्वा प्रातस्स्नानादिकृद् बुधः।
नववस्त्राङ्गुलीयाद्यैरनुलेपैरलङ्कृतः ॥ १५ ॥
यज्ञसूत्रं विनान्यैस्तु भूषितेनाथ शिल्पिना।
सह प्रासादशिखरमारुह्य च गुरुः स्वयम् ॥ १६ ॥
स्थिरराश्युदये वा स्यादुदयात्मोदयेऽपि वा।
जीवशुक्रसमायुक्ते तयोर्दृष्टेऽथवा पुनः ॥ १७ ॥
कुर्यान्मूर्ध्नेष्टकान्यासं स्थाने पूर्वमुदाहृते।
पूर्वादिदिक्षु चत्वारश्चेष्टकाः प्रथमं न्यसेत् ॥ १८ ॥
क्रमेण ब्रह्मविष्ण्वीशसदाशिवकृतेश्वराः।
तर्जनीवेधमात्रं तु शिखरे सुषिरं कुरु ॥ १९ ॥
नवरत्नं तु विन्यस्य स्तूपीदण्डं तदूर्ध्वतः।
प्रतिष्ठाप्य यथान्यायं कलशैरभिषिञ्चयेत् ॥ २० ॥
ततः शिल्पिवरः सम्यग् बद्धोदैः सुधयापि च।
गुलोदैर्वा दृढीकृत्य निश्चलत्वं समाचरेत् ॥ २१ ॥

यजमानो हृष्टमना दक्षिणाद्यैः स्वशक्तितः ।
आचार्यं शिल्पिनं चान्यान् कर्मकारांश्च तोषयेत् ॥ २२ ॥
अथ दारुमये कुर्याच्छुल्वाद्यैश्छादनं ततः ।
वर्षातपादिवारण(तु?क)ल्यैः शुल्वादिकल्पितैः ॥ २३ ॥
फलकैः सारेष्टकाभिर्वा विमानाशिखरं ततः ।
(सुपिदधातु ?) मृल्लोष्टैर्वाथ शिखरं सम्यगाच्छादयेत् क्रमात् ॥
प्रथमं नीप्रलोष्टानि न्यावृत्त्या च तदूर्ध्वतः ।
एकावृत्त्या पुनस्तत्र तुर्यश्राणि च विन्यसेत् ॥ २५ ॥
क्रूरलोष्टानि विन्यस्य चतुरश्रं पुनः क्रमात् ।
द्यश्राणि विन्यसेत् पश्चादेवमेव पुनः पुनः ॥ २६ ॥
नीप्रपट्ट्या अपिधानं विन्यसेत् प्रतिपट्टिकम् ।
कोणपारावतं नीप्रकोणेष्वथ च विन्यसेत् ॥ २७ ॥
पश्चात् तदूर्ध्वतः कोणलोष्टानि च प्रविन्यसेत् ।
तत्पार्श्वयोः पुटाख्या+न्यूर्ध्वलोष्टानि चोर्ध्वतः ॥ २८ ॥
गर्तकोणे तदाख्यानि कीलादीनि यथोचितम् ।
यथाबुद्धि यथाशोभं शिखरं विदधातु च ॥ २९ ॥
अथ शौल्बे राजतैर्वा सौवर्णैर्वा सुरालये ।
शिखराच्छादनं कुर्यात् फलकैरर्थसौलभात् ॥ ३० ॥
यवमात्रं घनं तेषां तदर्धं वा समाचरेत् ।
अष्टाङ्गुलादिविस्तारं फलकानां स्मृतं बुधैः ॥ ३१ ॥
प्रादक्षिण्येन विन्यस्य गूढकीलैर्दृढीकृतम् ॥ ३१½ ॥

इति शिल्परत्ने मूर्ध्नेष्टकाविन्यासं नाम
चतुस्त्रिंशोऽध्यायः ।

अथ पञ्चत्रिंशोऽध्यायः ।

अथ नासिकालक्षणम् ।

ललाटनासिका ख्याता शिखरे तारतः समा ।
शिखरस्य तु विस्तारे त्रिचतुष्पञ्चभाजिते ॥ १ ॥
नासिकातारमेकांशमुत्तमाधममध्यमम् ।
महानासीति विख्याता त्रिविधा स्याद् विमानके ॥ २ ॥
समं त्रिपादमर्धं वा निष्क्रमं तद्विशालतः ।
विस्तारत्रिचतुर्थांशहीनशेषं तदुच्छ्रयम् ॥ ३ ॥
गलादुपरि तत्तुङ्गं नासिकानां प्रकीर्तितम् ।
शक्तिध्वजं तदूर्ध्वे तु नासीतुङ्गार्धमेव वा ॥ ४ ॥
त्रिपादं वा त्रिभागैकभागं वा (स्यात्) तदुच्छ्रयम ।
तच्छक्तिध्वजतुङ्गे तु गुणभागविभाजिते ॥ ५ ॥
भागं वा किंपिरीवक्त्रं तच्छेषं तु गलोदयम् ।
दण्डं वा गलमानं स्याद् द्विदण्डं किंपिरीमुखम् ॥ ६ ॥[1]
एवं शक्तिध्वजं कार्यं तदूर्ध्वे त्रिशिखं न्यसेत् ।
पत्रं वा विन्यसेत् तत्र किंपिरीमुखमानतः ॥ ७ ॥
विस्तारमुख्यपट्ट्यास्तु दण्डं वाध्यर्धमेव वा ।
तीव्रं तदष्टभागं वा कर्णकोच्चं तु तत्ततिः ॥ ८ ॥
वल्लीमण्डलचित्राद्यैर्भूषयेन्मुखपट्टिकाम् ।
मुखपट्ट्यवशेषं तदवगाढमुदाहृतम् ॥ ९ ॥
अवगाढाख्यभागं तु मृणालादिविभूषितम् ।
शूलाभं वा स्थलाभं वा सव्यालं वा सनाटकम् ॥ १० ॥

---

१. 'फि' ख. पाठ.

मालिकाकूटकोष्ठादिमण्डितं वा विमानवत् ।
चित्रपत्राख्यमकरतोरणाढ्यमथापि वा ॥ ११ ॥
तोरणाभ्यन्तरे लक्ष्मीः साभिषेकाम्बुजासना ।
अन्यैर्नानालङ्करणैर्नासीगाढं तु मण्डयेत् ॥ १२ ॥
ललाटिकावगाढं तु तथैव च विभूषयेत् ।
ललाटीवंशसंसिद्धं मध्ये शूलं दृढीकृतम् ॥ १३ ॥
स्तम्भविस्तारविस्तीर्णा विधातव्या कुमारिका ।
तत्कर्णपत्रमपरं मण्डितश्चावलम्बितम् ॥ १४ ॥
अकर्णकेन चार्धं वा यथायुक्ति यथारुचि ।
अन्तर्गतलुपां तिर्यगग्रबन्धमनिष्टदम् ॥ १५ ॥
भद्राभिधमहानासी सर्वाङ्गपदसंयुता ।
उत्तरं वाजनं चाब्जं क्षेपणं नासिकादधः ॥ १६ ॥
यथायुक्ति भवन्त्येते कर्णोत्तरादिमानतः ।
ऊर्ध्वभूस्तम्भतारं वा त्रिपादं वार्धमेव वा ॥ १७ ॥
नासिकास्तम्भविस्तारं कर्णोत्तरान्तमुन्नतम् ।
वस्वश्रं वाथ वृत्तं वा युगाश्रं वा तदाकृति ॥ १८ ॥
नासिकायास्तु विस्ताराद् द्विदण्डं वा त्रिदण्डकम् ।
हीनं शेषं विशालं स्यात् पादयोर्बाह्यसीमकम् ॥ १९ ॥
नारयङ्घ्र्यभ्यन्तरे तत्र दिङ्मूर्तिस्थापनं कुरु ।

अथ क्षुद्रनासी —

सार्धदण्डं द्विदण्डं वा त्रिदण्डं वाथ विस्तृतम् ॥ २० ॥

तत्तारत्रिचतुर्थांशहीनशेषं तदुन्नतम्।
कपोतालिङ्गनात् क्षुद्रनासिकोच्चं तु कल्पयेत् ॥ २१ ॥
प्रतिवाजनसीमान्तं तस्य शक्तिध्वजोन्नतम्।
तदुच्चं तु त्रिधाभज्य कर्णमेकांशमुन्नतम् ॥ २२ ॥
एकांशं किंपिरीवक्त्रं तारं युक्तिवशान्नयेत्।
शक्तिध्वजस्य विपुलं कारयेद् दण्डमानतः ॥ २३ ॥
तत्कर्णं तावदेवोच्चं सपादं सार्धमेव वा।
नासिकार्धेन गाढं स्याद् गाढार्धं मुखपट्टिकाम् ॥ २४ ॥
गर्भार्धसमविस्तारा महानासी चतुर्दिशम्।
तदर्धो वा त्रिपादो वा तासां निर्गम ईरितः ॥ २५ ॥
क्षुद्रनासी तदर्धा + वारांशेन विकारयेत्।
पादं प्रतिकपोतेषु कल्पयेत् स्वस्तिकाकृति ॥ २६ ॥
मध्ये च कूटशालानां पञ्जरे नाल्पनासिका।
शिखरे भद्रनासा स्याल्ललाटाख्या तु नासिका ॥ २७ ॥
शालाग्रयोस्तु कर्तव्ये नासिकालक्षणं त्विदम्।

अथ मूर्तिन्यासः —

नन्दीश्वरमहाकालौ पूर्वद्वारोपरि न्यसेत् ॥ २८ ॥
दक्षिणे दक्षिणामूर्तिं पश्चिमेलिं+सम्भवम्।
विष्णुं वाप्यथ कौबेर्यां दुर्गां ब्रह्माणमेव वा ॥ २९ ॥
दक्षिणे च गणेशानमुत्तरे नृत्तरूपिणम्।
क्षेत्रेशं चैव चैशान्यां द्वारे तद्वारपालकान् ॥ ३० ॥

ईशावतारक्रीडादिकथारूपाणि चैव हि ।
मूलभित्तौ च परितो विन्यसेदुक्तलक्षणम् ॥ ३१ ॥
अथोपरितले प्राच्यामिन्द्रं षण्मुखमेव वा ।
दक्षिणे दक्षिणामूर्तिं वीरभद्रमथापि वा ॥ ३२ ॥
पश्चिमे नरसिंहं वाप्युत्तरे चार्थदं विधिम् ।
द्वितीये तु तले चैवं तृतीये तु मरुद्गणान् ॥ ३३ ॥
तलेतलेऽमरान् सिद्धान् यक्षविद्याधरानपि ।
गन्धर्वाप्सरसो वाथ नागेन्द्रांस्तु मुनीश्वरान् ॥ ३४ ॥
प्रमथांश्चैव दैत्यादीन् षोडशप्रतिमांस्तथा ।
कर्णादधः प्रतेरूर्ध्वं कोणे के + स्ववाहनम् ॥ ३५ ॥
कर्णादधश्चान्त्यतले प्राकारादौ च विन्यसेत् ॥ ३५½ ॥

इति शिल्परत्ने नासिकालक्षणं नाम
पञ्चत्रिंशोऽध्यायः ।

अथ षट्त्रिंशोऽध्यायः ।

अथ स्तूपिकां भावाहस्तवंशतुलादयः(?) ।

स्तूपिकाश्चापि देवानामयुग्माश्चैव शोभनाः ।
युग्मा एव मनुष्याणां प्रशस्ताः सर्वधामसु ॥ १ ॥
शिखरे स्तूपिकास्थाने कार्या मूर्ध्नेष्टका तथा ।
तत आच्छाद्य शिखरं द्रव्यैः कार्तस्वरादिभिः ॥ २ ॥
स्तूपीदण्डं समाच्छाद्य कलशं चैव विन्यसेत् ।
पद्मतारात् सपादं स्यात् स्तूपीकुम्भविशालकम् ॥ ३ ॥

विस्तारेण सपादं वा सार्धं वा स्तूपिकोच्छ्रयम्।
पङ्कजं तोरणस्रक् च क्षेपणं पत्रक्षेपणम् ॥ ४ ॥

घृक् च कम्पं च पद्मं च वेत्रत्रितयकुड्मलौ।
एवं तस्यैवावयवं यथाशोभं समाचरेत् ॥ ५ ॥

चतुरष्टद्विरष्टाश्रं सधारं वर्तुलं तु वा।
स्यादाकृतिः सुरोर्वीशविप्राणां च विशां मतम् ॥ ६ ॥

इत्येकभूमौ चतुरश्ररूपे सुरालयेऽल्पे विधिरभ्यधायि।
अथाभिधास्ये द्वितलादिजातिच्छन्दादिवृत्तादिगतं विशेषम् ॥

इति शिल्परत्ने स्तूपिकालक्षणं नाम
षट्त्रिंशोऽध्यायः।

अथ सप्तत्रिंशोऽध्यायः।

अथ शान्तिकादिनियमः।

शान्तिकं पौष्टिकं चैव जयदं त्वद्भुतं पुनः।
सार्वकामिकमित्येवं पञ्चधा सदनं स्मृतम् ॥ १ ॥

पूर्वोक्तं मानमुन्मानं कुर्यादत्रापि सर्वतः।
अल्पे धामनि विस्तृतिद्विगुणितप्रायोच्छ्रयेऽष्टांशिते
मूलांशेन मसूरकोच्छ्रयमतः स्तम्भोच्छ्रयं द्व्यंशकम्।
भूयः प्रस्तरमंशतो गलमिलांशेन प्रकल्पोच्छ्रयं
भागाभ्यां शिखरोच्छ्रयं विरचयेदेकांशतः स्तूपिकाम् ॥ २ ॥
एवं वा शान्तिकं सद्म प्रोक्तमंशोच्छ्रयं पुनः ॥ ३ ॥

स्वसप्ताष्टदशांशैकहीनं वा कारयेद् बुधः ।
सदनोच्चे नवांशे तु शिवांशं तत्तलोदयम् ॥ ४ ॥

सार्धद्विभागं पादोच्चं मञ्चमेकांशमानतः ।
सार्धांशं गलमानं तु द्विभागं शिखरोदयम् ॥ ५ ॥

स्तूपिकामंशतः कुर्यात् पौष्टिकाख्ये सुरालये ।
सदनोच्चे दशांशे तु भागमाद्यंशकोन्नतम् ॥ ६ ॥

सार्धद्व्यंशं तु पादोच्चं प्रस्तरोच्चं शिवांशकम् ।
सार्धांशं गलमानं तु गुणांशं शिखरोदयम् ॥ ७ ॥

एकांशं स्तूपिकामानं कुर्याज्जयदनामकम् ।
रुद्रांशे हर्म्यतुङ्गे तु सपादांशं धरातलम् ॥ ८ ॥

सार्धद्व्यंशं तु पादोच्चं प्रस्तरं तु शिवांशकम् ।
अध्यर्धांशं तु कर्णोच्चं सार्धत्र्यंशं तु शीर्षकम् ॥ ९ ॥

सपादांशं स्तूपिकोच्चं कुर्यादद्भुतमन्दिरे ॥ १० ॥

उत्तुङ्गे सप्तभागे तु शिवांशं तु धरातलम् ।
पक्षांशं पादतुङ्गं च शिखरोच्चं गुणांशकम् ॥ ११ ॥

स्तूप्युत्सेधमथैकांशं कर्तव्यं सार्वकामिके ।
नानालङ्कारभेदेन तेषां नामानि सन्ति वै ॥ १२ ॥

श्रीभोगादीन्यनेकानि तानि ज्ञेयानि शास्त्रतः ।

अथ द्वितलं —

प्रासादोच्चं तु विभजेदष्टाविंशद्विभागतः ॥ १३ ॥

तद्गुणांशमधिष्ठानं षडंशं चरणायतम्।
गुणांशं मञ्चतुङ्गं तु भूतांशं चरणोदयम् ॥ १४ ॥
द्विभागं प्रस्तरोत्सेधं शिवांशं वेदिकोदयम्।
द्विभागं गलमानं तु सार्धवेदांशकं शिरः ॥ १५ ॥
स्तूप्युच्चं सार्धभागं तु कुर्याच्छान्तिकसद्मनि।
चतुस्त्रिंशद्विभक्ते तु कारयेत् सदनोदये ॥ १६ ॥
सार्धाग्न्यंशमधिष्ठानं तद्वयं चरणायतम्।
गुणांशं प्रस्तरोत्सेधं पादं सार्धषडंशकम् ॥ १७ ॥
गुणांशं मञ्चमानं तु शिवांशं वेदिकोदयम्।
गलोच्चं सार्धलोकांशं भूतांशं शिखरोदयम् ॥ १८ ॥
अध्यर्धांशं शिखामानं सदने पौष्टिकाभिधे।
त्रयस्त्रिंशद्विभक्ते तु सदनोत्सेधमानके ॥ १९ ॥
गलं सार्धद्विभागं स्याज्जयदेऽन्यत् तु पूर्ववत्।
षट्त्रिंशद्भाजिते तुङ्गे युगभागं धरातलम् ॥ २० ॥
वस्वंशं पादमानं तु मञ्चं सार्धत्रिभागिकम्।
सप्तांशं चरणोत्सधं गुणांशं मञ्चमानकम् ॥ २१ ॥
एकांशं वेदिकोत्सेधं गुणांशं तु गलोदयम्।
भूतांशं शिखरोत्सेधं सार्धांशं स्तूपिकोदयम् ॥ २२ ॥
अद्भुताख्ये गृहे कुर्याद् द्वितले देवपूजिते।
चत्वारिंशत्कृते तुङ्गे वेदभागं धरातलम् ॥ २३ ॥
द्विगुणं तस्य पादोच्चं मञ्चमानं युगांशकम्।
तत्पादं सार्धसप्तांशं त्रिभागं प्रस्तरोदयम् ॥ २४ ॥

भागद्वयं वेदिकोच्चं ग्रीवोत्सेधं गुणांशकम् ।
सप्तांशं शिखरोत्सेधं सार्धांशं स्तूपिकोदयम् ॥ २५ ॥

इत्येवं क्रमशः कुर्यात् सदने सार्वकामिके ।
एतेषां भूषणाकारवशान्नामानि सन्ति वै ॥ २६ ॥

बहूनि स्वस्तिकादीनि द्वितले देवमन्दिरे ।

अथ त्रितलं —

प्रासादत्रितये भास्वद्विगुणांशविभाजिते ॥ २७ ॥
द्व्यंशं धरातलोत्सधं वेदांशं चरणोदयम् ।
मञ्चमानं द्विभागं तु पादोनचतुरंशकम् ॥ २८ ॥
पादायामं हि सार्धांशं प्रस्तरोच्चमुदाहृतम् ।
सार्धाग्निभागं पादोच्चं सपादांशं तु मञ्चकम् ॥ २९ ॥
अर्धांशं वेदिकामानं गलमानं शिवांशकम् ।
सार्धाग्न्यंशं तु शिखरं स्तूप्युच्चं त्वेकभागिकम् ॥ ३० ॥
शान्तिके त्रितलेऽप्येवं कुर्याच्छास्त्रानुसारतः ।
द्वितीयतलपादान्तमेवमेव करोत्वतः ॥ ३१ ॥
अध्यर्धांशं तु मञ्चोच्चमर्धांशं वेदिकोदयम् ।
शिवांशं वेदिमानं तु गुणांशं शिखरोदयम् ॥ ३२ ॥
सपादांशं शिखामानं पौष्टिकेऽर्कद्विभाजिते ।
सप्तविंशत्कृते तुङ्गे द्व्यंशमाद्यङ्गकोन्नतम् ॥ ३३ ॥
चरणोच्चं तु वेदांशं द्विभागं प्रस्तरोन्नतम् ।
वेदांशं चरणायामं मञ्चं पादोननेत्रकम् ॥ ३४ ॥

तद्वच्च चरणायामं सार्धांशं प्रस्तरोदयम्।
एकांशं वेदिकामानं ग्रीवामानं द्विभागिकम् ॥ ३५ ॥

वेदांशं शिखरोन्मानं सपादं स्तूपिकोदयम्।
जयदे कारयेत् सर्वदेवासुरविमानके ॥ ३६ ॥

द्विचत्वारिंशत्कृते तुङ्गे सार्धाग्न्यंशं धरातलम्।
सप्तांशं चरणायामं मञ्चमाद्यङ्गतः समम् ॥ ३७ ॥

पादं सार्धषडंशं तु गुणांशं प्रस्तरोदयम्।
षडंशं तलिपं कुर्यात् सार्धद्व्यंशं तु मञ्चकम् ॥ ३८ ॥

एकांशं वेदिकोत्सेधं द्विभागं तु गलोदयम्।
भूतांशं शिखरं शेषं स्तूप्युत्सेधं गृहेऽद्भुते ॥ ३९ ॥

साष्टचत्वारिंशद्भिर्भक्ते तुङ्गे गृहस्य तु।
आद्यङ्गोन्नतमध्यंशं तद्युगं चरणायतम् ॥ ४० ॥

मञ्चमानं तु वेदांशं तलिपं सार्धसप्तकम्।
सार्धत्रिभागं मञ्चोच्चं सप्तांशं चरणायतम् ॥ ४१ ॥

प्रस्तरोच्चं गुणांशं तु शिवांशं वेदिकोदयम्।
द्विभागं गलमानं तु रसांशं शिखरोदयम् ॥ ४२ ॥

द्विभागं तु शिखामानं कारयेत् सार्वकामिके।
अत्रापि स्वस्तिकादीनि भवन्त्याख्यानि भूषणैः ॥ ४३ ॥

अथ चतुस्तलम्—

एकोनचत्वारिंशांशे कारयेत् सदनोदये।
सार्धपक्षांशमाद्यङ्गं भूतांशं चरणोदयम् ॥ ४४ ॥

अधिष्ठानसमं मञ्चं पादं सत्र्यङ्घ्रिसागरम् ।
सपादद्व्यंशकं मञ्चं पादं सार्धाब्धिभागिकम् ॥ ४५ ॥
पक्षांशं प्रस्तरोत्सेधं सपादाब्ध्यंशमङ्घ्रिकम् ।
पादोनाक्षांशकं मञ्चं शिखांशं वेदिकोदयम् ॥ ४६ ॥
कर्णोच्चं तु द्विभागं तत् सार्धवेदशिरोन्नतम् ।
स्तूपिकोत्सेधमक्ष्यंशं शान्तिके सदनोत्तमे ॥ ४७ ॥
प्रासादस्योच्छ्राये पञ्चपञ्चाशद्भागभाजिते ।
आद्यङ्गोत्सेधमग्न्यंशं रसांशं चरणोदयम् ॥ ४८ ॥
प्रस्तरोच्चं तु रामांशं भूतांशं तलिपोदयम् ।
पादोनाग्न्यंशकं मञ्चं भूतांशं चरणायतम् ॥ ४९ ॥
गुणांशं मञ्चमानं तु तद्वयं चरणायतम् ।
त्रिभागं प्रस्तरोत्सेधं सार्धं बाणांशमङ्घ्रिकम् ॥ ५० ॥
प्रस्तरोत्सेधमग्न्यंशं वेदिकोच्चं शिवांशकम् ।
द्विभागं गलमानं तु भूतांशं शिखरोदयम् ॥ ५१ ॥
पादोनद्व्यंशकं स्तूपितुङ्गं तु जयदे कुरु ।
होमादिस्तूपिपर्यन्तं पञ्चाशद्भागभाजिते ॥ ५२ ॥
सार्धाग्न्यंशमधिष्ठानं सप्तांशं चरणोदयम् ।
आद्यङ्गसदृशं मञ्चं पादं वार्धषडंशकम् ॥ ५३ ॥
सपादत्र्यंशकं मञ्चं रसांशं चरणोदयम् ।
गुणांशं प्रस्तरोत्सेधं पादं सार्धशरांशकम् ॥ ५४ ॥
सार्धद्विभागं मञ्चोच्चमेकांशं वेदिकोदयम् ।
द्विभागं तु गलोन्मानं पञ्चांशं तु शिरोदयम् ॥ ५५ ॥

शिखामानं सपादांशं कुर्यादद्भुतहर्म्यके।
पञ्चाशद्भाजिते तुङ्गे सार्धाग्न्यंशं धरातलम् ॥ ५६ ॥
धात्वंशं चरणायामं मञ्चं साङ्घ्र्यग्निभागिकम्।
सार्धषट्कं तु पादोच्चं रामांशं प्रस्तरोदयम् ॥ ५७ ॥
सार्धषड्भागकं पादं ज्यंशं प्रस्तरतुङ्गकम्।
सार्धपञ्चांशकं पादं मञ्चं पादोनपावकम् ॥ ५८ ॥
शिवांशं वेदिकामानं द्विभागं तु गलोदयम्।
पञ्चांशं शिखरं कुर्याद् व्योमांशं स्तूपिकोदयम् ॥ ५९ ॥
सर्वदेवोचिते हर्म्ये सार्वकामिकसंज्ञके।
सुभद्रादीनि नामानि सन्ति तेषां बहूनि च ॥ ६० ॥

अथ पञ्चतलं —

तुङ्गेऽष्टचत्वारिंशांशे सत्रिपादानलांशकम्।
आद्यङ्घ्रिं तद्युगं पादं सार्धद्व्यंशं तु मञ्चकम् ॥ ६१ ॥
साङ्घ्रिरामांशकं पादं द्व्यंशार्धं प्रस्तरोन्नतम्।
पञ्चांशं चरणायामं ++ साङ्घ्रिकरांशकम् ॥ ६२ ॥
पादं पादोनपञ्चांशं द्विभागं प्रस्तरोन्नतम्।
भागं सार्धाङ्घ्रिभागं तु मञ्चमङ्घ्र्यूनलोचनम् ॥ ६३ ॥
शिवांशं वेदिकामानं गलमानं द्विभागिकम्।
सार्धाङ्घ्र्यंशं शिरोमानं शेषं स्तूप्युच्चमाचरेत् ॥ ६४ ॥
शान्तिके भवने पञ्चतले त्वेवं विचक्षणः।
चतुश्चत्वारिंशदंशभक्ते तु सदनोदये ॥ ६५ ॥

धरातलोच्चं रामांशं रसांशं चरणोदयम् ।
लोकांशं प्रस्तरोत्सेधं सार्धवेदांशमङ्घ्रिकम् ॥ ६६ ॥
सपादभागं मञ्चोच्चं पादं साङ्घ्रियुगांशकम् ।
प्रस्तरोच्चं द्विभागं तु वेदांशं चरणोदयम् ॥ ६७ ॥
पक्षांशं मञ्चमानं तु पादं सार्धगुणांशकम् ।
अध्यर्धांशं तु मञ्चोच्चं व्योमांशं वेदिकोदयम् ॥ ६८ ॥
द्विभागं गलमानं तु सार्धवेदांशकं शिरः ।
अध्यर्धांशं शिखामानं कारयेत् पौष्टिके गृहे ॥ ६९ ॥
सदनोच्चे तु षट्त्रिंशद्भक्ते द्व्यंशं धरातलम् ।
वेदांशं चरणोत्सेधं प्रस्तरोच्चं द्विभागिकम् ॥ ७० ॥
वेदांशं तु तथा पादं सव्यङ्घ्र्यंशं तु मञ्चकम् ।
सार्धानलांशपादोच्चं तदर्धं प्रस्तरोदयम् ॥ ७१ ॥
सपादाग्न्यंशकं पादं सार्धांशं प्रस्तरोन्नतम् ।
गुणांशं पादतुङ्गं तु मञ्चं साङ्घ्रिशिवांशकम् ॥ ७२ ॥
एकांशं वेदिकामानं पदोनद्व्यंशकं गलम् ।
शिखरं सार्धलोकांशं शेषांशं स्तूपिकोन्नतम् ॥ ७३ ॥
जयदे भवने कुर्यात् पञ्चभूमौ विशेषतः ।
विमानोच्चे त्रयस्त्रिंशद्भाजिते कुट्टिमं द्वयम् ॥ ७४ ॥
वेदांशं चरणायामं द्विभागं प्रस्तरोन्नतम् ।
सार्धाग्न्यंशं तु पादोच्चं मञ्चं पादोननेत्रकम् ॥ ७५ ॥
त्रिभागं चरणायामं तदर्धं मञ्चमानकम्
सार्धद्विभागं पादोच्चं सपादांशं तु मञ्चकम् ॥ ७६ ॥

स्तम्भं पादाधिकद्व्यंशं मञ्चं साङ्घ्रिशिवांशकम् ।
व्योमांशं वेदिकामानमध्यर्धं गलमानकम् ॥ ७७ ॥

सार्धत्रिभागं शिखरं द्विभागं स्तूपिकोन्नतम् ।
अद्भुते सदने ह्येवं सर्वं कुर्यात् सुरालये ॥ ७८ ॥

चतुर्विंशद्विभागे तु तुङ्गे द्व्यर्धं धरातलम् ।
गुणांशं चरणोत्सेधं मञ्चमानं तदर्धकम् ॥ ७९ ॥

पादं पादोनलोकांशं सार्धांशं त्वथ मञ्चकम् ।
द्व्यर्धांशमङ्घितुङ्गं तु सपादं प्रस्तरोदयम् ॥ ८० ॥

स्तम्भं पादाधिकद्व्यंशं तदर्धं मञ्चमानकम् ।
सार्धभागद्वयं पादमेकांशं प्रस्तरोच्छ्रयम् ॥ ८१ ॥

अर्धांशं वेदिकामानं त्रिपादं गलमानकम् ।
शिरः पादोननेत्रांशं शेषं तु स्तूपिकोन्नतम् ॥ ८२ ॥

एवं कुर्यादिदं सर्वं सदने सार्वकामिके ।
नामानि ब्रह्मकान्तादीन्यनेकानि भवन्त्यतः ॥ ८३ ॥

भूषणाकृतिभेदेन द्रष्टव्यान्यत्र शास्त्रतः ।

अथ षट्तलं —

सप्तपञ्चाशदंशे तु सदनोदयमानके ॥ ८४ ॥

आद्यङ्घ्र्युन्नतमग्न्यंशं षडंशं चरणोदयम् ।
पादहीनत्रिभागं तु मञ्चं सार्धं शरांशकम् ॥ ८५ ॥

पादं द्व्यर्धं प्रस्तरोच्चं पादं साङ्घ्रिशरांशकम् ।
सार्धद्विभागं मञ्चोच्चं पञ्चांशं चरणोदयम् ॥ ८६ ॥

सपादद्वितयं मञ्चं पादोत्सेधं शरांशकम् ।
सत्रिपादांशकं मञ्चं पादं सार्धयुगांशकम् ॥ ८७ ॥
पादोनद्व्यंशकं मञ्चं व्योमांशं वेदिकोदयम् ।
गलं पादोननेत्रांशं सार्धाब्ध्यंशं शिरोदयम् ॥ ८८ ॥
पक्षांशं स्तूपिकामानं शान्तिकादिषु पञ्चसु ।
साधारणेन वा कुर्यादिदं सुरगृहोत्तमे ॥ ८९ ॥
अम्बुजासनकादीनि नामानीह भवन्ति च ।

अथ सप्ततलं —

सप्तषष्टिकभागे तु कृते तत्सदनोदये ॥ ९० ॥
सपादाग्न्यंशमाद्यङ्गं पादं सार्धरसांशकम् ।
तदर्धं प्रस्तरोत्सेधं षड्भागं चरणोदयम् ॥ ९१ ॥
पादोनञ्यंशकं मञ्चं सार्धपञ्चांशमङ्घ्रिकम् ।
प्रस्तरं + दलाक्ष्यंशं पादं साङ्घ्रिशरांशकम् ॥ ९२ ॥
प्रस्तरं सार्धपक्षांशं भूतांशं चरणोदयम् ।
साङ्घ्रिद्विभागं मञ्चोच्चं पादं पादोनपञ्चकम् ॥ ९३ ॥
द्विभागं प्रस्तरोत्सेधं स्तम्भं सार्धयुगांशकम् ।
पादोनद्व्यंशकं मञ्चं व्योमांशं वेदिकोदयम् ॥ ९४ ॥
पादोनद्व्यंशकं कर्णं सार्धवेदांशकं शिरः ।
पक्षांशं स्तूपिकामानं सप्तभूमौ सुरालये ॥ ९५ ॥
शान्तिकाद्यविशेषेण कुर्यात् सर्वं यथाविधि ।
श्रीछन्दादीनि नामानि बहून्यत्र भवन्ति हि ॥ ९६ ॥

अथाष्टतलम्—

+ + षष्टिकृते तुङ्गे सार्धाग्न्यंशं धरातलम्।
सप्तांशं चरणायामं मञ्चं सार्धत्रिभागिकम् ॥ ९७ ॥
पादं सार्धषडंशं तु द्यर्धांशं मञ्चमानकम्।
पादं सपादपञ्चांशं मञ्चं सार्धद्विभागिकम् ॥ ९८ ॥
भूतांशं चरणायामं मञ्चं साङ्घ्रिविभागिकम्।
पादोनपञ्चकं पादं मञ्चं पादोननेत्रकम् ॥ ९९ ॥
सार्धवेदांशकं पादं व्योमांशं प्रस्तरोदयम्।
शिवांशं वेदिकातुङ्गं पादोनद्व्यंशकं गलम् ॥ १०० ॥
शिखरं सार्धवेदांशं तच्छेषं स्तूपिकोदयम्।
कुर्यादष्टतले गेहे शान्तिकाद्यविशेषतः ॥ १०१ ॥
शिवच्छन्दानि नामानि बहून्यत्र भवन्ति हि।

अथ नवतलम्—

अष्टाशीत्यंशिते तुङ्गे पादोनचतुरंशकम् ॥ १०२ ॥
जङ्घोच्चं तद्युगं पादं प्रस्तरं सार्धवह्निकम्।
सप्तांशं चरणोत्सेधं मञ्चोच्चं साङ्घ्रिपावकम् ॥ १०३ ॥
पादं सार्धरसांशं तु गुणांशं मञ्चमानकम्।
षड्भागं पादतुङ्गं तु मञ्चं पादोनपावकम् ॥ १०४ ॥
पादोच्चं सार्धभूतांशं मञ्चं सार्धद्विभागिकम्।
भूतांशं चरणोत्सेधं मञ्चं सार्धद्विभागिकम् ॥ १०५ ॥
साङ्घ्र्यंशं प्रस्तरोत्सेधं शश्यंशं वेदिकोदयम्।
कर्णोच्चं सार्धभागं तु सार्धवेदांशकं शिरः ॥ १०६ ॥

शेषं स्तूप्युदयं कार्यमेकांदशतले गृहे ।
शान्तिकाद्यविशेषेण तत्राप्याकारभूषणैः ॥ १०७ ॥
विजयादीनि नामानि सन्त्यनेकानि लक्षणैः ।

अथ द्वादशतलम्—

सप्तोत्तरशतांशं तु सदनोच्चं तु कारयेत् ॥ १०८ ॥
धरातलोच्चं भूतांशं नवांशं चरणोदयम् ।
सार्धाब्ध्यंशं तु मञ्चोच्चं पादं सार्धगजांशकम् ॥ १०९ ॥
शेषं पूर्वोक्तवत् सर्वं सदने रविभूमिके ।
त्रयोदशदलादीन्यप्यतः सन्ति गृहाणि हि ॥ ११० ॥
आषोडशतलं प्राह काश्यपो मुनिसत्तमः ॥ १११ ॥

इति शिल्परत्ने शान्तिकादिनियमो नाम
सप्तत्रिंशोऽध्यायः ।

अथ अष्टात्रिंशोऽध्यायः ।

अथ वृत्तषडश्रादिप्रासादलक्षणम् ।

युगाश्रं वृत्तसङ्काशं चतुरायतकं पुनः ।
द्व्यश्रवृत्तं कुक्कुटाण्डसदृशं च षडश्रकम् ॥ १ ॥
अष्टाश्रं चाकृतिरित्येवं सप्तधा सुरमन्दिरे ।
गेहेऽल्पे परिणाहेन द्वाविंशद्भाजिते सति ॥ २ ॥
व्यासं करोतु सप्तांशैः प्रायो वृत्तात्मके गृहे ।
स्वाभीष्टमाने दशयुक्तसप्तशतांशिते विश्वलसच्छतांशः ।

यस्तेन मानेन परिभ्रमय्य वृत्तात्मकं वेश्म समातनोतु ॥ ३ ॥

वृत्तव्यासे हते नागवेदवह्न्यब्धिखेन्दुभिः ॥ ४ ॥

तिथ्यश्विविबुधैर्भक्तः सुसूक्ष्मः परिधिर्भवेत्।

परिधेर्व्यत्ययाद् यद्वा सुसूक्ष्मं व्यासमानयेत् ॥ ५ ॥

नाहार्धमानप्रचये हरिरन्ध्रिभक्तेऽर्णवांशैर्वितातिं तनोतु।

आयाममंशैर्ऋतुसम्मितैश्च तुर्यश्रदीर्घस्य सुरालयस्य ॥ ६ ॥

अथवा गृहपरिणाहस्यार्धेन विभज्य तत्र नवधांशैः।

विस्तारं चायामस्त्रिभिर्ऋतुभिरिदं करोतु शिल्पिवरः ॥ ७ ॥

नाहार्धे तु करक्षैकभक्ते नवरसांशकैः।

हस्तितुण्डस्य विस्तारं कुर्याद् वा शेषमायतम् ॥ ८ ॥

अथवा चतुर्विंशांशे नवांशैर्विस्तृतिं तथा।

तिथ्यंशैर्हस्तितुण्डस्य दीर्घमानमुदाहृतम् ॥ ९ ॥

अथवा गुणविस्तारं कुर्याद् वा चतुरायते।

चतुरायतगृहं चाथ वृत्तायतगृहं तथा ॥ १० ॥

मुखपृष्ठायतं कुर्याद् दक्षवामायतं तु वा।

स्वाभीष्टे परिणाहमानानिचये धाम्नश्चतुःषष्टिभा-

गोनेऽष्टादशधा कृतेऽर्णवमितैरंशैः पृथक् कल्पयेत्।

पार्श्वद्वन्द्वसमायतौ मुखतातिं च द्व्यंशसूत्रभ्रमात्

प्रायः साङ्घ्रिरसांशनाहमपि पृष्ठं हस्तिपृष्ठात्मनः ॥ ११ ॥

गेहस्य नाहे कृतिभाजिते + + +

अंशैश्चतुर्दशैस्तारं पार्श्वभागं तथैव च ॥ १३ ॥
द्वाविंशत्पृष्ठमानं स्यात् सप्तभागपरिभ्रमात् ।

भागद्वये द्विरदपृष्ठसमुक्तनीत्या
वृत्तीकृते तदुभयान्तरभागदैर्घ्यम् ।
स्वेध्मांशतो विरहितेन गुणांशकेन
वृत्तायते वितनुयात् सुरवर्यधिष्ण्ये ॥ १४ ॥

षोढा विभज्य निजवाञ्छितमात्रराशि-
मंशायतानि परिकल्प्य षडश्रकाणि ।
कुर्याद् गृहं रसपुटं द्विगुणांशमानो
व्यासोऽशितेऽत्र तिथिभिर्नयनांशहीनः ॥ १५ ॥

स्वाभीष्टमाने दशधा विभक्ते व्यासत्रिभागैर्द्विषडंशितेऽस्मिन् ।
व्यासे शरांशैर्विहितायतांस्तदश्रींश्च कुर्याद् वसुकोणधाम्नः ॥

मुखपृष्ठायते तुर्यश्रायते सुरमन्दिरे ॥ १७ ॥
शिखरे हस्तिपृष्ठे च कुर्यादग्रे ललाटिकाम् ।
दक्षवामायते तत्र शालाकारे ललाटिकाम् ॥ १८ ॥

पार्श्वयोः शिखरे कुर्याद् विना वात्र ललाटिकाम् ।
षडश्राष्टाश्रयोः कुर्याच्छिखरे भद्रनासिकाम् ॥ १९ ॥

यावन्त्यश्राणि गेहस्य तत्तन्मध्ये यथापुरम् ।
प्रासादसदृशं दीर्घं तदर्धं त्र्यंशिते द्वयम् ॥ २० ॥

वेदांशे गुणभागं वा भूतांशे युगभागकम् ।
रसांशे शरभागं वा षड्भागं गिरिभाजिते ॥ २१ ॥

गोत्रांशं वसुभागे वा रन्ध्रांशे वसुभागकम् ।
सुखमण्डपदीर्घं स्यान्नवधा परिकीर्तितम् ॥ २२ ॥
दीर्घमानेन तारं स्यात्तत्समं वार्धमेव वा ।
पञ्चांशे शिखिभागं वा सप्तांशे वेदभागकम् ॥ २३ ॥
ऊर्म्यंशं दशभागं वा मित्रांशे पञ्चभागकम् ।
इत्येवं विस्तृतं तेषामन्तरालं विधीयते ॥ २४ ॥
भिन्नसन्धावुत्तरादौ कोणेतरगते न्यसेत् ।
आधाराधेयभावेन मूलाग्रौ चाप्यधोत्तरम् ॥ २५ ॥

इति शिल्परत्ने वृत्तषडश्रादिप्रासादलक्षणं नाम
अष्टात्रिंशोऽध्यायः ।

अथ एकोनचत्वारिंशोऽध्यायः ।

अथ मण्डपम् ।

तत्र पूर्वं मुखमण्डपं —

नेत्रेषुसप्तदशभानुभिरादिधाम्न-
स्तारं विभज्य विधुलोकयुगांशभूतैः ।
विस्तारमत्र रचयेन्मुखमण्डपस्य
पादोनमर्धमथवा सममस्य दीर्घम् ॥ १ ॥
हर्म्यतारार्धमानं तु कन्यसं मुखमण्डपम् ।
हर्म्यतारमुखं श्रेष्ठं त्रिपादं मध्यमं पुनः ॥ २ ॥

निधिभक्ते तु तत्तारेऽप्येकद्वित्रिवियुक्तितः ।
अधमाधममाद्यं स्यादधमे मध्यमे परम् ॥ ३ ॥

अधमोत्तममन्यत् स्याच्चतुर्थादित्रयं क्रमात् ।
हर्म्यतारार्धमानं तु कन्यसं मुखमण्डपम् ॥ ४ ॥

हर्म्यतारमुखं श्रेष्ठं तयोर्मध्येऽष्टभाजिते ।
एकैकांशकहीनेन नवधोक्तं तदायतम् ॥ ५ ॥

हस्तं सार्धं द्विहस्तं वा प्रासादस्यांशमेव वा ।
अन्तरालस्य दीर्घं स्याद् द्विदण्डं तस्य वेशनम् ॥ ६ ॥

सार्धं वाप्येकदण्डं वा मानसूत्रात् तु निर्गमम् ।
तारमानेन वा कुर्यात् सप्तभागैकभागिकम् ॥ ७ ॥

अष्टभागैकभागं वा नवभागैकमेव वा ।
दशांशादेकभागं वाप्यन्तरालविशालकम् ॥ ८ ॥

युग्मस्तम्भसमायुक्तं युक्त्या सर्वाङ्गसंयुतम् ।
सावकाशान्तरालं वा सकुड्यं वा सजालकम् ॥ ९ ॥

सावकाशान्तरालं चेद् दीर्घं द्वित्रिचतुष्करम् ।
सोपानं पार्श्वयोः कार्यं गजहस्तविभूषितम् ॥ १० ॥

प्रासादभित्तिविस्तारतुल्यं वार्धत्रिपादकम् ।
अन्तरालस्य भित्तेस्तु व्यासं स्यान्मण्डपे तथा ॥ ११ ॥

कूटकोष्ठादियुक्तं वा हीनं वा मुखमण्डपे ।
त्रिवर्गसहितं वापि तोरणाद्यैर्विचित्रितम् ॥ १२ ॥

एकानेकतलं वाथ कर्तव्यं मुखमण्डपम् ।

अथार्चनामण्डपः —

अन्तर्मण्डलतो व्यतीत्य करमात्रं प्रार्चनामण्डपं
तुर्यश्रं समसूरकं निजमुखायामस्य वा मध्यतः ।
वेदस्तम्भभृतैकभारमथवा कुर्याच्चतुर्द्वादश-
स्तम्भद्व्युत्तरसंयुतं स्वमुकुटाद्यालंक्रियालंकृतम् ॥ १३ ॥
प्रासादतारतुल्यं वा त्रिपादं वार्धमेव वा ॥ १४ ॥
मण्डपानां तु विस्तारमथवा तत्तदंशकम् ।
योनिः स्याद् येन तेनैव मानेन परिकल्पयेत् ॥ १५ ॥
नवसप्तदशाष्टांशेऽप्येकैकांशविहीनतः ।
इत्येव मूलपादेन मण्डपाङ्घ्रिसमुच्छ्रयः । १६ ॥
अथवा करमानैर्वा तदलोच्चं धरातलम् ।
सार्धद्विहस्तमारभ्य षट्षडङ्गुलवर्धनात् ॥ १७ ॥
अष्टहस्तान्तमङ्घ्र्युच्चं मण्डपानां समाचरेत् ।
द्विद्व्यङ्गुलविवृद्ध्या वा स्तम्भस्योत्सेधमाचरेत् ॥ १८ ॥
अष्टाङ्गुलं समारभ्य चार्धार्धाङ्गुलवर्धनात् ।
नन्दपङ्क्त्यङ्गुलं यावत् तावत् स्तम्भस्य विस्तृतिः ॥ १९ ॥
स्तम्भोच्चे शरभागे तु द्विभागं स्यान्मसूरकम् ।
तृतीयांशं त्रिभागे तु स्तम्भोत्सेधं मसूरकम् ॥ २० ॥
पङ्क्तिनन्दाष्टसप्तर्तुशरांशे पादतुङ्गके ।
भागेनाद्यङ्गतुङ्गं तु मण्डपानां विशेषतः ॥ २१ ॥
न्यासात् पादाधिकं सार्धं द्विगुणं वा ततोऽधिकम् ।
चतुरश्रायतं कुर्यादथवा मण्डपं पुनः ॥ २२ ॥

नाट्यमण्डपनाहार्धे षोडशैः शिवयुग्मकैः ।
भक्ते दशांशकैस्तारं दशभिर्वा यथाक्रमम् ॥ २३ ॥
चतुरश्रं चतुःस्तम्भं नन्द्यावर्त्तं तु मण्डपम् ।
अष्टाभिः स्वस्तिकाख्यं स्याद् वीरासनमिनाङ्घ्रिभिः ॥
स्तम्भैः षोडशभिर्विद्यान्मण्डपं श्रीप्रतिष्ठितम् ।
जयभद्रं रथस्तम्भं षट्त्रिंशद्भिरथाङ्घ्रिभिः ॥ २५ ॥
मण्डपो माणिभद्रः स्याच्छतस्तम्भैर्विशालकम् ।
अत ऊर्ध्वं युताः स्तम्भैर्विशाला एव मण्डपाः ॥ २६ ॥
त्रिहस्तं तु समारभ्य द्विद्विहस्तविवर्धनात् ।
यावदेकोनविंशं तु ततमाभासमण्डपे ॥ २७ ॥
एकविंशतिहस्तादि द्विद्विहस्तविवर्धनात् ।
सप्तत्रिंशतिहस्तान्तं विकल्पं नवधा स्मृतम् ॥ २८ ॥
नवत्रिंशद्धस्तमारभ्य द्विद्विहस्तविवर्धनात् ।
पञ्चपञ्चाशदन्तं यन्मण्डपं छन्दसंज्ञितम् ॥ २९ ॥
सप्तपञ्चाशदारभ्य द्विद्विहस्तविवर्धनात् ।
त्रिसप्ततिकरं यावत् तावत् जात्याख्यमण्डपम् ॥ ३० ॥
तद्विस्तारसमं दीर्घं समतुर्यश्रमण्डपम् ।
अध्यर्धहस्तमारभ्य षडङ्गुलविवर्धनात् ॥ ३१ ॥
+ + + + + + + + पादोत्सेधमुदीरितम् ।
गुणाङ्गुलविवृद्ध्या वा कुर्यात् पादसमुच्छ्रयम् ॥ ३२ ॥
वस्वङ्गुलं समारभ्य वार्धाङ्गुलविवर्धनात् ।
एकोनविंशन्मात्रान्तं स्तम्भविष्कम्भमानकम् ॥ ३३ ॥

पूर्वोक्तमार्गमाश्रित्य स्तम्भादीनि करोतु वा ।
आयताश्चादयः सर्वे भवन्त्युक्त्या च मण्डपाः ॥ ३४ ॥

प्रासादसम्मुखे कुर्यान्मण्डपानां चतुष्टयम् ।
मुखमण्डपमादौ तु प्रतिमामण्डपं ततः ॥ ३५ ॥

स्नानमण्डपमन्यं हि नृत्तमण्डपमेव च ।
मण्डपान्मण्डपं वाथ सालात् सालमथापि वा ॥ ३६ ॥

कराद्धीनं न कुर्वीत ह्येकादशकरं शुभम् ।
स्तम्भालङ्कारभेदेन बहुधा ते भवन्ति हि ॥ ३७ ॥

चतुरश्रश्चतुष्पादो वसुनासाविभूषितः ।
ब्रह्मासनाभिधानः स्यान्मण्डपो वाप्रपाथवा ॥ ३८ ॥

त्रिपङ्क्तिषोडशस्तम्भं सरङ्गं द्व्यष्टनासिकम् ।
सकूटं वा चतुर्द्वारं चतुर्दिक्षु सनासिकम् ॥ ३९ ॥

देवद्विजनरेन्द्रार्हं नाम्ना सिद्धं भवन्ति हि ।
एकभारं चतुष्पादं श्रीकरं नाम मण्डपम् ॥ ४० ॥

द्विभारं षोडशस्तम्भं मण्डपं स्वस्तिकाभिधम् ।
बाह्ये तु द्वादशस्तम्भं नाम्ना तु विजयं तथा ॥ ४१ ॥

कर्णबन्धसमायुक्तं मण्डपं भद्रनामकम् ।
दिशामुखं चतुर्दिक्षु भद्रनासिकयान्वितम् ॥ ४२ ॥

मण्डपं दीर्घतुर्यश्रं सभारङ्गमिति स्मृतम् ।
द्विभद्रं षोडशपदं तत् तथैवेन्दुकान्तकम् ॥ ४३ ॥

पद्मकोशं वर्तुलं चेन्मण्डपं सर्वयोग्यकम् ।
चतुरश्रं समं कुर्यात् कर्णबन्धावलम्बकैः ॥ ४४ ॥
तदाच्छेदलुपाभिर्यद् युक्तं श्रीकरनामकम् ।
तदेवायतवृत्तं चेद् विष्णुकान्ताभिधानकम् ॥ ४५ ॥
पादैर्द्वादशभिर्युक्तं कर्णबन्धावलम्बकैः ।
बालकूटैश्चित्रपट्ट्या व्यालविद्याधरादिभिः ॥ ४६ ॥
नानालङ्कारकैर्युक्तं नाम्ना ललितभद्रकम् ।
सर्वाङ्गपादसंयुक्तं सर्वालङ्कारभूषितम् ॥ ४७ ॥
विशालं नाम तत् प्रोक्तं मण्डपं वा प्रपाथवा ।
मध्ये रङ्गं विधातव्यं मण्डपेषु च केषुचित् ॥ ४८ ॥
चतुर्थांशेन पादोच्चात् तस्य वेद्युन्नतं भवेत् ।
चतुःस्तम्भं वसुस्तम्भं षोडशस्तम्भमेव वा ॥ ४९ ॥
सर्वावयवसंयुक्तं सुन्दरं रङ्गमाचरेत् ।
देवप्रतिष्ठास्थानं तु विमाने रङ्गसंज्ञितम् ॥ ५० ॥
तत्रापि चैवं कर्तव्यं सकुड्यं वा सजालकम् ।

अथाधिवासमण्डपः —

प्रासादस्याग्रतो वैशे सौम्ये वा याम्यगोचरे ॥ ५१ ॥
नवाष्टसप्तषट्पञ्चहस्तं वा मण्डपं ततः ।
तदायामसमं तारं समतुर्यश्रमेव हि ॥ ५२ ॥
भारद्वयसमायुक्तं षोडशस्तम्भसंयुतम् ।
चतुर्द्वारसमायुक्तं चतुस्तोरणभूषितम् ॥ ५३ ॥

सपताकध्वजोपेतं तत्तद्दिक्षु विधानतः ।
मुक्तास्रग्गर्भमालाभिर्वितानैश्च विभूषितम् ॥ ५४ ॥

मण्डपस्य त्रिभागैकं मध्ये कृत्वोपवेदिकम् ।
वेदाङ्गुलोन्नतं वेशमुपवेदियुगाश्रकम् ॥ ५५ ॥

शेषं वेदिविशालं तु भानुमात्रं तदुन्नतम् ।
भारद्वयाङ्गुलं वोच्चं दर्पणोदरसन्निभम् ॥ ५६ ॥

स्थलं कृत्वा तु कुण्डाढ्यं तत्तद्दिक्षु यथोचितम् ।
अथवा वालुकैः स्थूलैः कृतैः स्थण्डिलकैर्युतम् ॥ ५७ ॥

घटानां च पुटानां च वशात् कलशमण्डपम् ।
एवमेवाग्रतः कुर्याद् देवदेवस्य सम्मुखम् ॥ ५८ ॥

सोमेशानान्तरे कार्यं मङ्गलाङ्कुरमण्डपम् ।
प्रत्यग्द्वारं तु सर्वत्र संवृतस्वजयोनिकम् ॥ ५९ ॥

अथ नाट्यमण्डपः —

पर्यन्ते प्रतियोनिभाजि बहिरूर्ध्वं वोत्तरस्याथवा
मध्य(सूत्र?)स्थे दलिते ततो विभजिते सम्यक् चतुर्वर्गकैः ।
स्यादंशः पदकायतिस्तु विततिर्द्वाभ्यां पदाभ्यां युतं
तच्छिष्टा ततिरुत्तरं नटनधाम्नो द्वित्रिसंख्यं मतम् ॥ ६० ॥

पदं तिस्रः स्तूप्यो विततिदलस्योत्तरतला-
दुपर्युत्थाधः स्याद्विपदामिति ततस्तु चरणः ।
पदं चाधिष्ठानं पदगणनालिन्दचरणा-
न्तराण्यारूढाङ्घ्र्याद्यखिलमुचितं मण्डपमपि (?) ॥

एकैकाष्टसु दिक्षु पार्श्वयुगगे द्वे द्वे च भागद्वये
द्वयष्टौ दीर्घलुपा विदिग्गतलुपास्त्वाबद्धमूलाः पुनः ।
कल्प्या श्छेदलुपाद्वयीषु सचलक्षास्तासु(?) कोणोन्मुखा
द्वेधा सर्वलुपान्तरं तु पदमात्रं चित्रपट्ट्युज्ज्वलम् ॥ ६२ ॥

रङ्गं स्वयोनिपरमार्ध इहार्णवाश्रं
वेदाङ्घ्रिरुत्तरलुपाद्युचिताङ्गशोभि ।
पश्चान्मृदङ्गपदमस्य ततोऽपि पश्चा-
न्नैपथ्यधाम च विभागविदा निधेयम् ॥ ६३ ॥

रङ्गस्य नीप्रविततिः समसीम्नि मध्य-
स्तूप्या स्वमूलसदनस्य तु पश्चिमायाम् ।
स्तूपी च सङ्गमवशात् कुरलेन कल्प्या
प्रायेण हारविततिः श्रुतिहस्तदैर्घ्या ॥ ६४ ॥

अथवाष्टाविंशतिभिश्चत्वारिंशतिभिः पुनः ।
विंशद्भिर्वाथ विभजेत् पर्यन्तार्धं पदाशये ॥ ६५ ॥

देवस्याग्रे दक्षिणतः रुचिरे नाट्यमण्डपे ।
नाहार्धे चतुर्विंशांशे विस्तारं दशभागतः ॥ ६६ ॥

षोडशांशे षडंशा वा कुर्याद्वा सुरमन्दिरे ।
मानुष्यराजधान्यादौ युक्त्या लक्षणसंयुतम् ॥ ६७ ॥
सर्वं समाचरेन्नाट्यमण्डपेषु यथोचितम् ॥ ६७½ ॥

इति शिल्परत्ने मण्डपविधानं नाम
एकोनचत्वारिंशोऽध्यायः ।

अथ चत्वारिंशोऽध्यायः ।

अथ प्राकाराः ।

प्रासादसदनादीनां रक्षालङ्कारसिद्धये ।
वप्राणि क्रमतः कुर्यात् पञ्चद्वित्र्येकसंख्यया ॥ १ ॥
तत्रान्तर्मण्ड(लं) त्वाद्यमन्तहारा द्वितीयकम् ।
तृतीयं मध्यहारा स्याद् बाह्यहारा चतुर्थकम् ॥ २ ॥
मर्यादा पञ्चमं प्रोक्तं शालानां शिल्पवित्तमैः ।
दण्डेऽर्धेन्तर्गतं मण्डलमवनिमितेऽर्धान्विते वान्तहारा
दोस्संख्ये मध्यहारा जलधिपरिमिते बाह्यहाराद्रिसंख्ये ।
मर्यादा मूलधाम्नः प्रथमचरमवर्जं मुखायामयुक्ताः
प्राकाराः पञ्चकार्याः स्युरिह चरमसीम्नैकविंशेऽपि वा स्यात् ॥
प्रासादस्योत्तरसमवधेर्जागतान्तस्य वा स्याद्
व्यासो दण्डस्त्रिविध उदितः पादुकान्तस्य वात्र ।
नेयश्चायं निजनिजपदादेकदण्डः सपादः
सार्धः साङ्घ्रित्रय इति मुखाययाममानं समुक्तम् ॥ ४ ॥
बीजात् पादं तु वार्धं वा त्रिपादं तत्समं तु वा ॥ ५ ॥
द्विगुणं त्रिगुणं वाथ चतुष्पञ्चगुणं तु वा ।
कल्पयेत् तु मुखायामं बीजाच्छेषमथापि वा ॥ ६ ॥
क्षुद्राणामल्पहर्म्याणां स्वव्यासार्धप्रमाणतः ।
अन्तर्मण्डलकं कुर्यात् सत्रिहस्तं तु तत्समम् ॥ ७ ॥
द्वितीयं च तृतीयं च तस्मात् पञ्चकराधिकम् ।
तस्मात् ससप्तहस्तं तु तत्समं स्याच्चतुर्थकम् ॥ ८ ॥

नवहस्तसमायुक्तं तत्समं पञ्चमं भवेत् ।
मध्यमानां तु मूलार्धमन्तर्मण्डलकं भवेत् ॥ ९ ॥

ततः शराद्रिवृहतीरुद्धहस्तं यथाक्रमात् ।
वप्रान्तरालविस्तारमुक्तं प्राकारपञ्चके ॥ १० ॥

अथोत्तमानां मूलार्धं प्रथमं त्वथ यादिभिः ।
नन्दातिजगतीहस्तैः (अन्त)हारा भवन्ति हि ॥ ११ ॥

अथवा मूलनिलयं कृत्वा तत्र चतुष्पदम् ।
आद्यसालं महापीठं पदैः षोडशभिर्युतम् ॥ १२ ॥

मण्डूकाख्यं द्वितीयं स्यान्मध्यहारा महानसम् ।
चतुर्थं सुप्रतीकान्तं पञ्चमं चेन्दुकान्तकम् ॥ १३ ॥

एवं युग्मपदैर्युक्तमयुग्मैरथ कथ्यते ।
एवं मध्ये विमानं स्यादाद्यसालं तु पीठकम् ॥ १४ ॥

द्वितीयं स्थण्डिलं सालं मध्यं चोभयचण्डितम् ।
चतुर्थं संहितं सालमीशकान्तं तु पञ्चमम् ॥ १५ ॥

चतुरश्रीकृते तेन मुखाय़ाममितोऽर्धतः ।
आयामं पुरतः प्रोक्तं प्राकाराणां विशेषतः ॥ १६ ॥

पूर्वद्वारे तन्मुखं पश्चिमे वा पूर्वे वा तत्पश्चिमद्वारकेऽपि ।
देशाभावे तत तयोर्दक्षिणे वा प्राकाराणामुत्तरे वाथ कुर्यात् ॥

पूर्वस्थानं चार्षिकं दैविकं वा नद्यास्तीरे पर्वतान्ताब्धिपार्श्वे ।
तस्मिन् प्राकाराननं मण्डपाद्यं यस्मिन् देशे लभ्यते तत्र कुर्यात् ॥

अथवा गृहतारार्धं गुणभागैकभागिकम्
चतुर्भागैकभागं वा ह्येतन्मण्डलविस्तृतम् ॥ १९ ॥

अन्तहाराविशालं तु तद्बाह्ये द्विगुणं हि तत् ।
मध्यहाराविशालं तु तद्बाह्ये तद्विसंगुणम् ॥ २० ॥

मर्यादाया विशालं तु बाह्ये त्वादिचतुर्गुणम् ।
महामर्यादकततमादेः पञ्चगुणं भवेत् ॥ २१ ॥

अथवा हस्तमानेन वक्ष्ये प्राकारसीमकम् ।
त्रिपञ्चसप्तहस्तान्ते वाद्यमाभासहर्म्यके ॥ २२ ॥

नवैकादशहस्ते वा विश्वहस्ते द्वितीयकम् ।
तिथिसप्तदशैकोनविंशद्धस्ते तृतीयकम् ॥ २३ ॥

एकविंशत्त्रयोविंशत्पञ्चविंशत्करेऽन्यकम् ।
सप्तविंशे नवविंशेऽप्येकत्रिंशे तु पञ्चमम् ॥ २४ ॥

विकल्पे पञ्चहस्तादि त्रयस्त्रिंशान्तमादितः ।
त्रित्रिधा छन्दहर्म्ये तु सप्तहस्तं मुखैः क्रमात् ॥ २५ ॥

सप्तत्रिंशत्करान्तैस्तु त्रित्रिधा सालपञ्चके ।
नवहस्तं समारभ्य सप्तत्रिंशावसानकम् ॥ २६ ॥

प्राग्वद्वै सालसीमा स्याद्धर्म्याणां जातिसंज्ञके ।

भक्तायामग्रभूमाविषुभिरिह बहिर्व्यंशकं त्र्यंशमन्तः
कृत्वान्तर्मण्डले दिक्परिवृढबलिपीठेषु तद्दण्डसीमा ।
प्राच्यावाच्याः स्वसूत्रेष्वितरदिगधिपाश्चालिताः किञ्चनातः
प्रादक्षिण्यान्मिथस्ते द्वितय इह महादिङ्मुखाः सम्मुखाश्च ॥

दण्डं स्वं समतीत्य भित्तिरुदिता बाह्यान्तहाराश्रिता
दण्डान्तो द्विविधस्तदुत्तरविभिन्नोऽग्रे सभाभेदतः ।
ज्वालासीमनि दीपधामनि तथान्तःस्थोत्तरेऽन्तर्गते
प्राकारेऽथ बहिःस्थितोत्तरबहिःसाले महीयस्यपि ॥ २८ ॥

प्रासादचरणाद् वाथ होमाद् वा प्रथमस्य तु ॥ २९ ॥

नीप्रं द्वितीये प्रथमा द्वितीयात् तु तृतीयके।
चतुर्थस्य तृतीयात् तु चतुर्थात् पञ्चमस्य तु ॥ ३० ॥

कुड्याभ्यन्तरबाह्ये वा कुड्यमध्येऽपि नीप्रकम् ।
प्रथमे प्रकृतेस्तुल्ये तलं तस्माद् गुणाङ्गुलम् ॥ ३१ ॥

नतं द्वितीयान्त्यान्तं तत्तद्देव नतं भवेत् ।
मूलजन्मस्थलाधस्तादुच्छ्रितं मूलसालके ॥ ३२ ॥

ततस्ततो द्वितीयादौ षट्षडङ्गुलहीनकम् ।
हस्तार्धं वात्र जन्मोच्चं तस्मात् त्रिव्यङ्गुलक्षयात् ॥ ३३ ॥

महामर्यादाभित्त्यन्तं क्रमाद्वा कारयेत् स्थलम् ।
अष्टादशाङ्गुलं मूलसाले वाथ ततः क्रमात् ॥ ३४ ॥

चतुर्मात्रक्षयादेवमुत्तमाधममध्यमम् ।
अन्तर्मण्डलभित्तेस्तु विस्तारं सार्धहस्तकम् ॥ ३५ ॥

तस्मात् त्रिव्यङ्गुलाधिक्यात् क्रमात् साला भवन्ति हि ।
व्योमहस्तं समारभ्य त्रिव्यङ्गुलविवर्धनात् ॥ ३६ ॥

भवन्ति वा व्योमहस्तात् षट्षडङ्गुलवर्धनात् ।
आदिसालात् क्रमादेवं विस्तारं त्रित्रिधोदितम् ॥ ३७ ॥

मूलधारमिदं तत् स्यादग्रं वस्वंशहीनतः।
तत्तद्विष्कम्भतुल्यं वा द्विगुणं त्रिगुणं तु वा ॥ ३८ ॥
चतुष्पञ्चगुणं वाथ सालोत्सेधं प्रकल्पयेत्।
अथवा हस्तमानेन कल्पयेत् सार्धहस्ततः ॥ ३९ ॥
षट्षडङ्गुलवृद्ध्या तु षट्सप्तान्तं समुच्छ्रयम्।
त्रिपञ्चसप्तहस्तादि नन्दरुद्रकरं तु वा ॥ ४० ॥
द्विद्विहस्तविवृद्ध्या तु प्रत्येकं त्रित्रिभेदकम्।
अथवोत्तरसीमान्तं कुम्भान्तं फलकान्तकम् ॥ ४१ ॥
नीप्रान्तं वाजनान्तं वा प्रस्तरान्तं गलान्तकम्।
एवं सालोदयं तत्तदष्टांशं तच्छिरोदयम् ॥ ४२ ॥
अथाद्यं कलशान्तं तु द्वितीयं फलकान्तकम्।
बोधिकान्तं तृतीयं तु चतुर्थं चोत्तरान्तकम् ॥ ४३ ॥
पञ्चमं तु कपोतान्तमेवं वोन्नतकल्पना।
कोणेषु वृत्ताकारं वा सर्वसालेषु वाचरेत् ॥ ४४ ॥
भित्तिविष्कम्भकर्णस्य पञ्चांशद्वितयं बहिः।
त्यक्त्वा वृत्तीकृतं कुर्यादन्तर्भागं तु तत्क्रमात् ॥ ४५ ॥
ऋजुभित्त्युत्तरोपेतं वाजनच्छत्रशीर्षकम्।
कल्पयेद्वा विशेषेण सालानां बाह्यभागतः ॥ ४६ ॥
कूटकोष्ठादिसंयुक्तं सपादं समसूरकम्।
बुद्बुदार्धेन्दुशीर्षं वाप्यजुशीर्षमथापि वा ॥ ४७ ॥
अपृक्तमालिकं वा स्यात् सभाकारमथापि वा।
मण्डपाकृतिकं वा स्याद्वृजुकुड्यमथापि वा ॥ ४८ ॥

एकद्वित्रितलं वाथ कुर्यात् प्रासादमञ्चके ।
सालोच्चे सप्तभागे तु पक्षांशं वा धरातलम् ॥ ४९ ॥

नवांशे तु द्विभागं वा रुद्रांशेऽग्न्यंशमेव वा ।
मूलप्रासादतुल्यं वा चरणं च धरातलम् ॥ ५० ॥

धरातलं तदुक्तं वा ह्यार्जवं वा प्रकल्पयेत् ।
पादोच्चाद्दतुसप्ताष्टभागैकं पादविस्तृतम् ॥ ५१ ॥

दण्डं त्रिपादमर्धं वा बहलं तस्योत्तरस्य तु ।
मूलपादसमं व्यासं मध्यपादसमं तु वा ॥ ५२ ॥

पादाग्रसदृशं वा स्यात् कुड्यपादादि पूर्ववत् ।
अधस्तलोपरिष्टात् तु चेष्टकास्तरणं कुरु ॥ ५३ ॥

शैलजैः फलकाभिर्वा पुनः कुर्यात् तलान्तरम् ।
लुपागोपानसहितं दण्डाकारमिदं विदुः ॥ ५४ ॥

लुपादिना विहीनं चेन्मण्डपाकारसंज्ञितम् ।
बाह्यकुड्यविहीनं तु मण्डपाकारमण्डितम् ॥ ५५ ॥

छत्राकारमिदं ख्यातं यथेष्टं तेषु विन्यसेत् ।
जातिः पञ्चतलोपेतश्छन्दः सागरभूमिकः ॥ ५६ ॥

विकल्पस्त्रितलस्तत्राप्याभासो द्वितलः स्मृतः ।
मध्यान्तहारयोरेवं मालिकापङ्क्तिरिष्यते ॥ ५७ ॥

एकद्वित्रिचतुष्पञ्चभूमिका वाथ मालिका ।
भित्तेरुपरिभित्तिर्वा पादं वा तलिपोपरि ॥ ५८ ॥

भित्तेरुपरिपादं वा पादोपरि न भित्तिकम् ।
सभामण्डपकच्छत्राकारा वाप्यृजुभित्तिका ॥ ५९ ॥
कूटकोष्ठादियुक्ता वा मालिकापङ्क्तिरिष्यते ।
षडङ्गुलं समारभ्य व्योमाङ्गुलविवर्धनात् ॥ ६० ॥
विंशन्मात्रावधिर्यावत् तावत् पादस्य विस्तृतिः ।
पादबन्धमधिष्ठानं कारयेत् पूर्वमुक्तवत् ॥ ६१ ॥
द्वितीयं च तृतीयं च चतुर्थं सालमेव च ।
गृहीत्वान्यौ विवर्ज्येते यत्र तत्तु त्रितालकम् ॥ ६२ ॥
द्वितीयं वा तृतीयं वा गृहीत्वान्यास्तु वर्जिताः ।
एकसालान्वितं हर्म्यं ह्येवमेव प्रकल्पयेत् ॥ ६३ ॥
बीजात् पादं तु वार्धं वा त्रिपादं तत्समं तु वा ।
तस्यानुसालकं युक्तं द्विसालं सम्प्रकीर्तितम् ॥ ६४ ॥
पृष्ठे सपार्श्वद्वितये स्वमूलयोन्यन्वितं मण्डपमाकलय्य ।
तुर्यश्रमातत्य ततोऽन्तराले तन्वीत संयोज्य मिथोऽन्तहाराम् ॥
कृत्वा वंशं मुखायत्युपचितनिजदण्डस्थितं पार्श्वहारा-
भारासक्ताग्रमूलं प्रथितगुणविभागादिकूप्त्या विभज्य ।
कृत्वा तद्भागतस्तद्वितितिमुचितयोन्याढ्यमन्योत्तराणि
न्यस्यारूढोत्तरादीन्यपि रचयतु तद्युक्तितोऽग्रे सभायाम् ॥
स्वामीष्टे सममर्धिते गृहपरीणाहे स्ववंशप्रथा-
द्वन्द्वोने चतुरादियुग्मपरिसंख्याभिर्विभक्ते समम् ।
एकांशेन ततिं तनोतु परिशिष्टैरातातिं चांशकै-
रूनांशं परितः प्रपूरयतु चैवं पादसूत्रे क्रमः ॥ ६७ ॥

तत्पादपङ्क्तिविहितो हि विशेष एष
विष्कम्भतो विरहितेन विभक्तपङ्क्तिः ।
शाला तृतीयविहिता गुणभक्ततारा
साधारणी निगमवर्गसुरेश्वराणाम् ॥ ६८ ॥

हीना चतुर्थगदितायतपङ्क्तिकाख्या
विष्कम्भमानकृतदैर्घ्यपदा तथान्या ।
एवं द्विधा कृतविधानविशिष्टनाम्ना
ग्राह्ये च ते कनकसूत्रमिवान्त्यवर्णात् ॥ ६९ ॥

अथ दीपमाला —

अथवा मध्यहारायां कारयेद् दीपमालिकाम् ।
सदीपवेद्याभिवृतामेकद्वित्रितलान्विताम् ॥ ७० ॥

उपानाद्यङ्घ्रितुल्यं यन्मूलहर्म्यस्य तेन वै ।
चतुरादिद्वादशान्तैर्भक्त्वा संख्यैस्तदंशकम् (?) ॥ ७१ ॥

संयुक्त्वा वा वियुक्त्वा वा पादमानं करोत्विह ।
अथवाश्विहस्तमारभ्य द्वादशाङ्गुलवृद्धितः ॥ ७२ ॥

कुर्याद् वा सप्तहस्तान्तं पादमानमिहाखिले ।
अष्टाष्टाङ्गुलवृद्ध्या वा मन्मथान्तकमन्दिरे ॥ ७३ ॥

सामान्यविधिना पश्चात् तेनाद्यङ्गसमुन्नतिः ।
ज्वालावसाने दण्डान्तं प्रायेणात्र विधीयते ॥ ७४ ॥

प्रासादनाहपादेन तुल्यं नातोऽधिकं क्वचित् ।
विस्तारं दीपशालायास्तस्मादष्टाष्टमात्रकम् ॥ ७५ ॥

मुक्त्वा मुक्त्वा यथाशोभं यथारुचि समाचरेत् ।
कोणेषु मण्डपाकारं कारयेच्छिखरं पुनः ॥ ७६ ॥

ललाटनासिकाद्वन्द्वं कोणे कोणे सलक्षणम् ।
मुखे पृष्ठे च भद्राख्या नासिका च भवेदिह ॥ ७७ ॥

अधिष्ठानोपरिष्टात् तु दण्डिकाचरणं न्यसेत् ।
बाह्यान्तरावृतिगतं सदृढीकृतदण्डिकम् ॥ ७८ ॥

तुल्यान्तरालं तन्मध्ये वेदिकाङ्घ्रिं च विन्यसेत् ।
दण्डिकाङ्घ्रेर्बहिः कार्या दी(पि)काद्यङ्गकोपरि ॥ ७९ ॥

पूर्वोक्तवेदिवत् तुङ्गं तस्यां तस्यां प्रविन्यसेत् ।
तुल्यान्तरं वेदिपादान् कोणवर्जं यथा तथा ॥ ८० ॥

अष्टाङ्गुलादिविष्कम्भं कर्तव्यं दण्डिकाङ्घ्रिषु ।
अथवा भित्तिसंलग्नं विन्यस्येद् वेदिपादकान् ॥ ८१ ॥

वेदिकाघनवत् कार्यं वेदिकाङ्घ्रिगतं घनम् ।
तद्घनत्रिगुणं तारं तच्चतुर्गुणमेव वा ॥ ८२ ॥

आद्यङ्गोच्चात् तु सप्तांशं नवांशं वा द्विपांशकम् ।
त्रयोदशांशतिथ्यंशमथ सप्तदशांशकम् ॥ ८३ ॥

घनं वेधा यवैर्वाथ सपादाङ्गुलतः क्रमात् ।
अर्धाङ्गुलविवृद्ध्या तत्पादोनन्यङ्गुलान्तकम् ॥ ८४ ॥

तत्समां विस्तृतिं तस्यामथवान्यप्रकारतः ।
एकादशयवं मुख्यं तस्माद् द्विद्वियवोत्तरम् ॥ ८५ ॥

त्रयोविंशद्यवान्तं वा घनं वेद्याः प्रकल्पयेत् ।
तद्घनस्य चतुर्थांशं पञ्चांशं वाधिकं ततम् ॥ ८६ ॥
ज्वालावेधं न कर्तव्यं दीपधामोत्तरस्य हि ।
तस्माज्ज्वालाबहिर्भागे वान्तरे वोत्तरं न्यसेत् ॥ ८७ ॥
दण्डिकाग्रे बाह्यगतं तद्युक्त्यान्तर्गतं तथा ।
उत्तरस्य तु विष्कम्भं पादोत्सेधेन वा पुनः ॥ ८८ ॥
पादोनत्र्यङ्गुलं वाथ सपादत्र्यङ्गुलं तु वा ।
पादोनाब्ध्यङ्गुलं कुर्यात् सपादचतुरङ्गुलम् ॥ ८९ ॥
एवं योनिप्रभेदेन कल्पयेद् वाङ्गुलात्मकम् ।
दण्डिकाबहलं कुर्यादुत्तरेण समं तथा ॥ ९० ॥
त्रिपादं वाथ वार्धं वा बहलेन समं घनम् ।
अर्धं वा पादहीनं वा दण्डिकानां विशेषतः ॥ ९१ ॥
स्वस्तिकं मकरास्यं वा सिंहेभाननमेव वा ।
दण्डिकाग्रे प्रकर्तव्यं नानाभावसमन्वितम् ॥ ९२ ॥
दण्डिकाद्यन्तरे कार्यं भूतसिंहादिमण्डितम् ।
पुष्पवल्ल्यादियुक्तं वा फलकं नाटकान्वितम् ॥ ९३ ॥
पञ्चसप्ताङ्गविश्वेशतिथिसप्तदशावृतिः ।
वेदिका स्याद् यथाशोभं परितस्तुल्यान्तरं यथा ॥ ९४ ॥
वेदिकाद्वयमध्यं तु सपाददशमात्रतः ।
पादोनसप्तमात्रान्तमर्धार्धाङ्गुलहीनतः ॥ ९५ ॥
कार्यं योनिवशादेव नान्यथा शिल्पकोविदैः ।
वेदिकादिवशे तस्या घने चोत्तरविस्तृतौ ॥ ९६ ॥

दीपसीम्नि च कार्या स्याद् योनिरेका न सङ्करा।
तस्यां वेद्यां न्यसेद् दीपपात्रं कांस्यादिकं पुनः॥ ९७॥
यावद् वेदिकयोर्मध्यं तावद् दीपान्तरालकम्।
अर्धपङ्क्तिर्यदा दृष्टा तदा तां कोणपार्श्वयोः॥ ९८॥
द्वाराणां पार्श्वयोर्वाथ यथायुक्ति परित्यजेत्।
अन्त्यवेद्यूर्ध्वतः कार्यं तद्युक्त्या वेदिकोत्तरम्॥ ९९॥
वेदिकाघनवत् कार्यं तद्घनं तच्चतुर्गुणम्।
तारमुत्तरभूषाढ्यं वेदिकाङ्घ्रिषु विन्यसेत्॥ १००॥
वेद्युत्तरान्तमथवा लुपालम्बनमिष्यते।
उत्तरस्य तु विष्कम्भादेकद्वित्रिचतुर्गुणम्॥ १०१॥
वेदिर्वेद्यासु संबद्धा चतुष्कोणेषु नाङ्घ्रिषु॥ १०१½॥

इति शिल्परत्ने पञ्चप्राकारलक्षणं नाम
चत्वारिंशोऽध्यायः।

अथ एकचत्वारिंशोऽध्यायः।

अथ गोपुरम्।

प्रतिवप्रं तु कर्तव्यं द्वारे द्वारे तु गोपुरम्।
क्षुद्राल्पमध्यमुख्यानां धिष्ण्यानां स्वप्रमाणतः॥ १॥
द्वारशोभा द्वारशाला द्वारप्रासादहर्म्यके।
द्वारगोपुरमित्येते क्रमान्नाम्ना प्रकीर्तिताः॥ २॥
एकद्वित्रितलं वा तु द्वारशोभाख्यमाचरेत्।
द्वित्रिवेदतलं कुर्याद् द्वारशालाख्यगोपुरम्॥ ३॥

त्रिवेदसायकतलं द्वारप्रासादकं तथा ।
हर्म्याख्यगोपुरं वेदपञ्चषट्तलमाचरेत् ॥ ७ ॥
द्वारगोपुरकं कुर्यात् पञ्चषट्सप्तभूमिकम् ।
अन्तर्मण्डलके द्वारशोभाख्यं स्यात् ततः क्रमात् ॥ ८ ॥
द्वारशालादयः कार्या अन्तर्हारादिकेष्वपि ।
अथवा सर्वसालेषु द्वारशोभादयस्तु वा ॥ ९ ॥
सोपपीठमधिष्ठानं विना वात्रोपपीठकम् ।
मूलप्रासादविस्तारे सप्ताष्टनवभाजिते ॥ ७ ॥
दशैकादशभक्ते वाप्येकांशरहितं ततम् ।
शोभादिगोपुरान्तानां मध्यमं विपुलं त्विदम् ॥ ८ ॥
मूलालयविशाले तु चतुष्पञ्चषडंशिते ।
सप्ताष्टांशेऽशहीनं तु विकल्पाभासयोस्ततिः ॥ ९ ॥
मूलतारत्रिभागैकमर्धं भां परिकल्पयेत् ।
त्रिभागं चतुरंशे तु गुणांशे द्वितयं तु वा ॥ १० ॥
पञ्चभागे तु वेदांशं जातिच्छन्दाख्ययोस्ततम् ।
द्विहस्तादिद्विरष्टान्तमेकहस्तविवर्धनात् ॥ ११ ॥
शोभादीनां तु विस्तारं विकल्पाभासयोर्मतम् ।
गुणहस्तं समारभ्य एकहस्तविवर्धनात् ॥ १२ ॥
तथा सप्तदशान्तं स्याच्छन्दहर्म्ये विशालकम् ।
चतुर्हस्तं समारभ्याथाष्टादशकरावधि ॥ १३ ॥
शोभादिगोपुरान्तानां जातिहर्म्ये विशालकम् ।
हस्तमानेन विस्तारमेवं वा परिकल्पयेत् ॥ १४ ॥

त्रिकराद् रुद्रहस्तान्तमधमादित्रयं त्रयम्।
सर्वसाले सर्वहर्म्ये विस्तारं परिकल्पयेत् ॥ १५ ॥
महत्तरे तु श्रेष्ठानि मध्यमे मध्यमत्रयम्।
क्षुद्राल्पयोः प्रशस्तं हि कन्यसत्रयगोपुरम् ॥ १६ ॥
अथवा पञ्चहस्तादि द्विद्विहस्तविवर्धनात्।
त्रयोदशकरान्तं तु शोभाव्यासं तु पञ्चधा ॥ १७ ॥
तिथिहस्तं समारभ्य त्रयोविंशत्करावधि।
द्वारशालाविशालं तु पञ्चधा परिकीर्तितम् ॥ १८ ॥
पञ्चविंशत्कराद् यावत्त्रयस्त्रिंशत्करं तथा।
द्वारप्रासादविस्तारं पञ्चधा परिकल्पयेत् ॥ १९ ॥
पञ्चत्रिंशत्कराद् यावच्चित्वारिंशतिस्तथा।
द्वारहर्म्यस्य विस्तारं पञ्चधैवं समाचरेत् ॥ २० ॥
पञ्चचत्वारिंशदादि त्रिपञ्चाशत्करान्तकम्।
द्विद्विहस्तविवृद्ध्या तु पञ्चधा गोपुरे तिथिः ॥ २१ ॥
गोपुराणां तु विस्तारमित्येवं बहुधोदितम्।
विस्तारेणायतं कुर्याद् गोपुराणां विशेषतः ॥ २२ ॥
सपादं वाथ सार्धं वा पादोनद्विगुणं तु वा।
सत्रिभागैकभागं वा सत्रिभागत्रिभागिकम् ॥ २३ ॥
द्विगुणं वा प्रकर्तव्यं विस्तारात् सर्वगोपुरे।
हस्तमानेन विस्तारं यदि तत्र विशेषतः ॥ २४ ॥
आयाममुक्तवत् कार्यं ह(स्त)च्छेदं विना बुधैः।
प्रवृद्ध्या वात्र हान्या वा करोतु करपूर्णताम् ॥ २५ ॥

आयादिशोभनोपेतं कारयेत् करमानके ।
विस्तारं सप्तधाभज्य शोभोच्चं रुद्रभागतः ॥ २६ ॥
तारादर्धाधिकं तुङ्गं द्वारशालाख्यगोपुरे ।
सप्तभागे तु रुद्रांशं भान्वंशं (तु) तृतीयके ॥ २७ ॥
विस्तारे नवभक्ते तु मन्वंशं तुङ्गमन्यके ।
विस्तारद्विगुणोत्सेधं कल्पयेद् द्वारगोपुरे ॥ २८ ॥
विस्तारायामयोर्मानसूत्रं बाह्ये विधीयते ।
जन्मतः स्तूपिकान्तं स्यादुत्सेधं गोपुरेऽखिले ॥ २९ ॥
अथवा तारमानेन तुङ्गमेवं करोत्वथ ।
सप्तांशे रुद्रभागं वा षडंशं चतुरंशके ॥ ३० ॥
पञ्चांशे सप्तभागं वा सप्तांशं वेदभागिके ।
नवभागं तु पञ्चांशे द्विगुणं वाखिलोन्नतम् ॥ ३१ ॥
विस्तारस्य त्रिभागैकं चतुर्भागैकभागिकम् ।
पञ्चभागाद्वेभागं वा गोपुराणां तु निर्गतिः ॥ ३२ ॥
सप्तकुड्यस्य बाह्ये तु द्वारतारमथोच्यते ।
मूलात् सार्धं सत्रिपादमथवा हस्तमानतः ॥ ३३ ॥
सार्धहस्तं समारभ्य षडङ्गुलविवर्धनात् ।
पञ्चहस्तावधिर्यावत् क्षुद्राणां द्वारविस्तृतिः ॥ ३४ ॥
त्रिहस्तं तु समारभ्य यावत्सप्तकरावधि ।
षडङ्गुलविवृद्ध्यां तु मध्यमद्वारविस्तृतम् ॥ ३५ ॥
चतुर्हस्तं समारभ्य यावन्नवकरं ततिः ।
रसमात्रविवृद्ध्या तु महतेर्द्वारविस्तृतम् ॥ ३६ ॥

तारात् पञ्चांशसप्तांशं सप्तांशदशकं तथा।
द्विगुणं वा सपादं वा सार्धद्विगुणमेव वा ॥ ३७ ॥

द्वारोत्सेधं प्रकर्तव्यमन्तर्मण्डलतः क्रमात्।
एकत्रिंशरसप्ताङ्कमात्रं नीत्वाथ दक्षिणे ॥ ३८ ॥

क्रमेण विन्यसेद् द्वारं बिम्बमध्याद् यथोचितम्।
मूगे + + न्निरीक्ष्यैव(?) कर्तव्यं गोपुरं ततः ॥ ३९ ॥

लिङ्गमध्यात् तु वामेन नीत्वा वा द्वारमाचरेत्।
तन्मध्याद् गोपुरायामं कुर्यादुभयतः समम् ॥ ४० ॥

द्वारयोगं कवाटं च कुर्यात् पूर्वोक्तमार्गतः।
मूलाधिष्ठानपादोच्चे वेदेष्वृषिभुजङ्गमैः ॥ ४१ ॥

नन्दपक्षीशमार्ताण्डैर्भक्ते हित्वा तदंशकम्।
गोपुराद्यङ्गमङ्घ्रिं च कुर्याद् वा सर्वगोपुरे ॥ ४२ ॥

पादबन्धमधिष्ठानमुपपीठं तु पूर्ववत्।
प्रवेशदक्षिणे गर्भं न्यसेदारूढभित्तिके ॥ ४३ ॥

द्वारतुङ्गपुरग्रामराजधान्यादिपूदितम्।
करोतु वात्र विधिवत् सुराणां गोपुरेऽपि च ॥ ४४

सोपपीठमधिष्ठानपादोच्चं चोत्तरान्तकम्।
विधायोदितमार्गेण शेषे षोढा कृते पुनः ॥ ४५

सपादांशं तु मञ्चोच्चं भागेन प्रस्तरोदयम्।
भागेन कन्धरोत्सेधं सत्रिपादांशकं शिरः ॥ ४६

शिष्टेन तु शिखातुङ्गमित्येकतलगोपुरे ।
एवं तु द्वितलादीनां तलाधिक्यविभागतः ॥ ४७ ॥
आद्वादशतलादूर्ध्वं सर्वमत्र विचक्षणैः ।
गोपुरव्यासपञ्चांशे गर्भागारं त्रिभागतः ॥ ४८ ॥
भागाभ्यां भित्तिविष्कम्भं विदध्यादेकभूमिके ।
द्वितले गोपुरे व्यासे गर्भं शैलाब्धिभागतः ॥ ४९ ॥
त्रिभागैर्भित्तिविष्कम्भं व्यासे रन्ध्रविभाजिते ।
अंशेन कूटविस्तारं कोष्ठमंशैस्त्रिभिस्तथा ॥ ५० ॥
कूटकोष्ठकयोर्मध्ये पञ्चांशैः पञ्जरादिकम् ।
कूटकोष्ठादिनिष्क्रान्ताद्यखिलं पूर्वमुक्तवत् ॥ ५१ ॥
व्यासे नवांशे त्रितले कूटकोष्ठादि कल्पयेत् ।
व्यासेन दशधा कृत्वा करोत्वब्धितले पुनः ॥ ५२ ॥
रुद्रांशैः शर(भौ?भू)मौ स्यात् सूर्यांशैः षट्तले तथा ।
विद्यांशैरद्रिभूमौ तु करोतु निखिलं क्रमात् ॥ ५३ ॥
गोपुराणा तु सर्वेषां कुड्यं गर्भमलिन्दकम् ।
कूटं शालां पञ्जरं च नासिकां हस्तिपृष्ठकम् ॥ ५४ ॥
करोतु मूलहर्म्यानुसारात् कुम्भलतामपि ।
मसूरकस्तम्भवेदिजालकैस्तोरणादिभिः ॥ ५५ ॥
यथायुक्ति यथाशोभं युक्तमेव करोत्वतः ।
अधस्तलं द्वारतारे वेदैर्वेणुभिरंशिते ॥ ५६ ॥
एकांशरहितं वोर्ध्वतलेषु द्वारविस्तृतम् ।
सोपानं पूर्ववद् + + गर्भागारेष्वियं भिदा ॥ ५७ ॥

श्रीमन्दिरादिनामानि गोपुराणां विशेषतः।
सन्त्याकारवशाद् भूषाभेदैः संस्थानभेदतः ॥ ५८ ॥

इति शिल्परत्ने गोपुरविधानं नाम
एकचत्वारिंशोऽध्यायः।

अथ द्विचत्वारिंशोऽध्यायः।

अथ परिवारविधानम्।

अष्टौ वा परिवाराः स्युर्द्वादशैव भवन्ति वा।
अथ षोडश वा कार्यास्तथा द्वात्रिंशदेव वा ॥ १ ॥
द्वात्रिंशत्परिवारास्तु जातिहर्म्ये विशेषतः।
छन्दे षोडश कर्तव्याः शेषयोर्द्वादशैव वा ॥ २ ॥
अष्टौ क्षुद्रविमानानां सर्वे सर्वेषु वाचरेत्।
वाहो विघ्नपतिर्ब्रह्मा मातरोऽथ गुहो हरिः ॥ ३ ॥
दुर्गा निर्माल्यभुक् चाष्टौ परिवाराः प्रकीर्तिताः।
तथैव दशलोकेशा निर्माल्याशी च मातरः ॥ ४ ॥
एते च द्वादश प्रोक्ताः परिवाराः सुरालये।
एते च विघ्नराजश्च गुहो दुर्गा हरिस्तथा ॥ ५ ॥
स्वस्वोचितदिशि स्थाप्याः परिवारास्तु षोडश।
वास्तुप्रकरणोद्दिष्टा ईशानाद्याश्च देवताः ॥ ६ ॥
यास्ता द्वात्रिंशदत्रोक्ताः स्थाप्याः स्युस्तत्क्रमेण हि।
एवं वान्यमते कार्याः परिवारा विशेषतः ॥ ७ ॥

क्षुद्राभासविकल्पेषु चाष्टौ छन्देऽपि षोडश ।
जात्ये भवन्ति द्वात्रिंशत् तत्पक्षे स्थापयेत् क्रमात् ॥ ८ ॥
कल्पयेदन्तहारायां परिवाराष्टकं पुनः ।
षोडशं परिवाराणां मध्यहारावधौ भवेत् ॥ ९ ॥
प्राकारे तु चतुर्थे तु द्वात्रिंशत्परिवारकः ।
तत्तत्प्राकारकुड्ये वा सालकुड्याश्रयं तु वा ॥ १० ॥
मुखायामं विना क्षेत्रे चतुरश्रकृते सति ।
नवभक्ते तु तन्मध्ये कल्पयेन्मूलमन्दिरम् ॥ ११ ॥
प्राच्यां वै वाहनस्थानमनलश्चाग्निगोचरे ।
मृगो वाप्यनलस्थाने याम्ये वै मातरः स्मृताः ॥ १२ ॥
एकवेरस्तु वा याम्ये नैर्ऋत्यां तु विनायकः ।
कुमारो वारुणे स्थाप्यो ज्येष्ठा वै वायुगोचरे ॥ १३ ॥
सौम्ये तु केशवस्थानं तत्र कात्यायनी तु वा ।
भास्करः शाङ्करे देशे परिवाराष्टकं त्विदम् ॥ १४ ॥
बीजे तु पञ्चपञ्चांशे बाह्ये तत्पूर्वकोष्ठतः ।
इन्द्रश्चाश्विनिवह्नी च पितरश्च यमस्तथा ॥ १५ ॥
रोहिणी निर्ऋतिश्चैव चाप्सरोगण एव च ।
वरुणोऽप्यृषयश्चैव वायू रुद्रस्तथैव च ॥ १६ ॥
सोमश्च क्षेत्रपालश्च शङ्करश्च दिवाकरः ।
एवं षोडश चेत् कार्याः परिवारोत्तमास्त्विह ॥ १७ ॥
चतुर्थसालबीजे तु नन्दनन्दविभाजिते ।
बाह्यावृतौ गताः पूर्वकोष्ठात् प्रादक्षिण्यक्रमात् ॥ १८ ॥

गौरी शर्वस्तथा ब्रह्मा शिवस्तस्माद् भृगुस्तथा।
ईशानः काशिकश्चैव एकाक्षो विघ्न एव च ॥ १९ ॥
सरस्वती तथा लक्ष्मीश्चैकरुद्रस्तथैव च।
पशुपतिर्वसुश्चैव महादेव + + + + ॥ २० ॥
धनदो रुद्रकालाग्नी श्रीकण्ठो नागदेवताः।
भीमश्च पृथिवी चैव शिखण्डी च मरुत् तथा ॥ २१ ॥
उग्रश्च + + रश्चैव द्वात्रिंशत्परिवारकाः।
अथवा पृथिवीस्थाने गौरी स्थाप्या तथैव च ॥ २२ ॥
गौरीस्थाने न्यसेत् पृथ्वीमन्यत् पूर्वोदितक्रमात्।
अभ्यन्तराननाः सर्वे स्थापनीया विशेषतः ॥ २३ ॥
कर्णकांशगता देवाः प्राचीपश्चिमसंमुखाः।
इन्द्रानलयमाशास्थाः पश्चिमाभिमुखस्थिताः ॥ २४ ॥
पितृवारुणवायुस्थाः कुर्यात् प्रागाननास्तथा।
विष्णुश्चेत् प्राङ्मुखः सौम्ये दुर्गा चेद् दक्षिणानना ॥ २५ ॥
मातरः सौम्यवक्त्रास्तु वीरेशः पश्चिमाननः।
मातृवामस्थविघ्नेशो भवेत् प्रागाननस्तथा ॥ २६ ॥
आदौ वा द्वित्रिसाले वा निर्माल्याशीशगोचरे।
दक्षिणाभिमुखो वाथ पश्चिमाभिमुखोऽथवा ॥ २७ ॥
मूलगेहात् त्रिदण्डे वाप्यर्धयुक्तत्रिदण्डके।
तयोर्मध्येऽष्टधा भक्ते तत्तदंशावसानके ॥ २८ ॥
नवधा वाहनस्थानं तत्पीठावधि कारयेत्।
बलिपीठाद् वाथ निष्क्रान्तिगोपुराद् वा यथोचितम् ॥ २९ ॥

वृषस्थानं तु पुरतः स्यादाग्नेय्यां महानसम् ।
मातॄणां तु यमोपान्ते गजवक्त्रस्य नैर्ऋते ॥ ३० ॥
वारुणे वासुदेवस्य स्कन्दस्य तदनन्तरम् ।
वायव्यामथ वैशान्यामुमादुर्गालयः स्मृतः ॥ ३१ ॥
उत्तरे धनदस्य स्याद् गोष्ठागारं तु शूलिनि ।
मातृपीठं यमाद् बाह्ये मृगे शास्तारमाचरेत् ॥ ३२ ॥
आर्यां च वायुभागे तु फल्लाटे षण्मुखं तथा ।
सोमस्य बाह्ये धनदः निर्माल्याशी तथादितौ ॥ ३३ ॥
ईशेन्द्रमध्ये धातुः स्याद् वृत्तस्यैशेऽथवा पुरः ।
अग्निगोपुरयोर्मध्ये धान्यानामिति केचन ॥ ३४ ॥
मध्ये तु वह्निमातॄणां स्नानकार्यगृहं स्मृतम् ।
मठस्तु याम्ये बाह्ये स्यात् पुष्पस्य यमविघ्नयोः ॥ ३५ ॥
रक्षोब्धिमध्ये शास्त्राणां गोशाला वारुणे बहिः ।
वारुण्यां शयनस्थानं ज्येष्ठायां वायुदक्षिणे ॥ ३६ ॥
विद्यापीठं भवेन्मुख्ये पर्जन्ये क्षेत्रपस्य तु ।
ईशेऽन्तश्चण्डनाथस्य रवीणां तु विधेर्बहिः ॥ ३७ ॥
लोकेशानां स्वस्वदिक्षु चेन्द्राग्न्योर्मध्यमेऽश्विनौ ।
बहिर्द्वितीयहारायां विश्वेषां यमरक्षसोः ॥ ३८ ॥
शास्ता च रक्षोदिग्भागे भद्रकाली तथा बहिः ।
रक्षोवारुणयोर्मध्ये शेषनागालयं स्मृतम् ॥ ३९ ॥
वसूनामम्बुमरुतां मुनीनां वायुसोमयोः ।
सोमेशमध्ये रुद्राणां क्रमेणैवं प्रकल्पयेत् ॥ ४० ॥

यद्दिङ्मुखो भवेद् देवस्तदग्रे वाहनध्वजम्।
इन्द्रादारभ्य लोकेशान् न्यस्येद् देवप्रदक्षिणात् ॥ ४१ ॥
सर्वत्र कल्पयेद् देवे प्रनालमपि चोत्तरे।
अग्निगोपुरयोर्मध्ये धनधान्यगृहं भवेत् ॥ ४२ ॥
याम्ये मज्जनशाला स्यात् तत्रस्थं पुष्पमण्डपम्।
नैर्ऋतं स्थानमाश्रित्य कुर्यादायुधमण्डपम् ॥ ४३ ॥
वारुणे वायुदेशे वा शयनस्थानमिष्यते।
सौम्ये देशे प्रकर्तव्यं धर्मश्रवणमण्डपम् ॥ ४४ ॥
ईशे वापिं च कूपं च कुर्यात् तत्रापवत्सके।
ईशगोपुरयोर्मध्ये वाद्यस्थानं प्रकीर्तितम् ॥ ४५ ॥
आरादीशे विमानस्य कुर्यान्निर्माल्यधारिणम्।
कूपं चारामकं चैव दीर्घिका च सुरालये ॥ ४६ ॥
कुत्रापि न निषिध्यन्ते तस्मात् सर्वत्र सन्तु ते।
परिचारकदासीनां स्थानं स्यात् परितो बहिः ॥ ४७ ॥
गुरोर्मठं भवेद् याम्ये पूर्वस्मिन् वा समाचरेत्।
वैनतेयं मुखे कुर्याद् वैष्णवेऽग्नौ गजाननम् ॥ ४८ ॥
संमुखे स्थापयेच्चक्रं गरुडं तत्प्रदक्षिणे।
शङ्खं वामे बहिः कुर्यात् सूर्याचन्द्रमसौ पुनः ॥ ४९ ॥
गोपुरद्वारपार्श्वस्थौ पूर्वभागे विशेषतः।
वह्नौ वा पावने शेषः पश्चाद्भागेऽपि संमुखः ॥ ५० ॥
आदित्यश्च भृगुश्चैवाप्यश्विनौ च सरस्वती।
पद्मा च पृथिवी चैव मुनयः सचिवस्तथा ॥ ५१ ॥

द्वारपालकमध्यादिष्वन्तराले प्रकीर्तिताः ।
चण्डप्रचण्डरथनेमिसुपाञ्चजन्यं
दुर्गागणेशरविचन्द्रमहानुभावाः ।
सर्वेश्वरः सुरपतिश्च तथा दशैते
प्राकारमञ्चमुखगोपुरकल्पनीयाः ॥ ५२ ॥
एवं स्वस्वागमोक्तानां तत्तत्स्थाने विशेषतः ॥ ५३ ॥
परिवारविशेषाणां प्रतिमामथ विन्यसेत् ।
करोतु सदनं तत्र प्रतिमा कारिता यदि ॥ ५४ ॥
पीठश्चेन्नैव कर्तव्यमिति वा नियमो न वा ।
स्थिते देवे स्थितास्ते स्युः परिवारास्तथासिते ॥ ५५ ॥
निषण्णाः शयनेऽपि स्युरिति प्राह पितामहः ।
पीठं चेत् परिवाराणां तारमर्कैरङ्गुलम् ॥ ५६ ॥
तदर्धमुच्छ्रयं तस्य मेखलात्रयसंयुतम् ।
शिलाभिर्वेष्टकाभिर्वा सुधया वा प्रकल्पयेत् ॥ ५७ ॥
अथ तत्तद्बलेः कल्पगदिता देवताः क्रमात् ।
तत्तत्स्थानेषु वा कल्प्याः स्वस्वार्चनविधीरिताः ॥ ५८ ॥
परिवारबिम्बदैर्घ्यं पूजांशद्विगुणं शिवे ।
अन्येषां स्वस्वबिम्बोच्चद्विगुणं वा प्रकल्पयेत् ॥ ५९ ॥
अध्यर्धं वा तत्समं वा कारयेल्लक्षणान्वितम् ।
मूले हर्म्यत्रिपादं वा मूलार्धं वा तदर्धकम् ॥ ६० ॥
गर्भगेहसमं वाथ गर्भार्धं वा त्रिपादकम् ।
एकद्वित्रिचतुष्पञ्चषट्सप्तकरमेव वा ॥ ६१ ॥

शान्तिकादिषु यन्मूलगेहं तत्र तदेव हि।
महाप्रासादके मूले परिवारालयं पुनः ॥ ६२ ॥
आभाससदनोक्तेन मार्गेणैव समाचरेत्।
गौर्यास्तु मालिकां वाथ विमानं वा प्रकल्पयेत् ॥ ६३ ॥
अन्येषामेव देवानां मण्डपाकृति वा भवेत्।
परिवारालये द्वारं कारयेत् पूर्वमुक्तवत् ॥ ६४ ॥
त्रिवर्गमण्डपाकारं चतुर्द्वारसमन्वितम्।
उक्षादिवाहनाकारं शेषाणां तु यथोचितम् ॥ ६५ ॥
मूलद्वारसमः श्रेष्ठस्तत्त्रिपादं तु मध्यमः।
अर्धहीनः कनिष्ठः स्याद् ऋषभो लक्षणान्वितः ॥ ६६ ॥
पादाध्यर्धसमुत्सेधः सपादो द्विगुणोऽपि वा।
मातृणां कथ्यते सद्म समासेन मयाधुना ॥ ६७ ॥
द्विचत्वारिंशद्धस्तं तु पञ्चभौममथोत्तमम्।
त्रिंशद्धस्तं त्रिभौमं तु मध्यमं तदुदाहृतम् ॥ ६८ ॥
एवं विंशतिहस्तं तु कनिष्ठं त्वेकभूमिकम्।
प्रासादाद् दक्षिणे कुर्याद् द्विपदे मातृमण्डपम् ॥ ६९ ॥
आयामं द्विपदं कुर्यात् पदभागेन विस्तृतम्।
भूतांशैर्विभजेत् पश्चाद् गुणैर्भवनमिष्यते ॥ ७० ॥
अलिन्दं तत्र भागाभ्यां शिष्टाभ्यां परिकल्पयेत्।
तस्मिन्नेव तु भूतांशैस्तुरीयं विभजेत् पुनः ॥ ७१ ॥
अन्तरं तेन मानेन पदद्वन्द्वं समीरितम्।
मातृणां गर्भगेहे तु पदभागीकृते पुनः ॥ ७२ ॥

पृष्ठगां भित्तिमाश्रित्य मातृणां स्थानमुत्तमम् ।
शक्तिभागीकृते दीर्घे बाह्याद्याः पदमध्यगाः ॥ ७३ ॥
सिंहयोनिगतं कुर्यान्मन्दिरं तदुदङ्मुखम् ।
अथवा नाहमानार्धे चतुश्चत्वारिंशदंशिते ॥ ७४ ॥
अष्टाविंशतिभिस्तारं दीर्घं षोडशभिस्तथा ।
अथवा मण्डपाध्यायसमुक्तं वा समाचरेत् ॥ ७५ ॥

इति शिल्परत्ने परिवारविधानं नाम
द्विचत्वारिंशोऽध्यायः ।

अथ त्रिचत्वारिंशोऽध्यायः ।

अथ बलिपीठलक्षणम् ।

गोपुराद् बाह्यतः कुर्याद् बलिपीठं सलक्षणम् ।
प्रासादार्धाद् बहिः कृत्वा षट्सप्तवसुदण्डकम् ॥ १ ॥
दशकं वा द्वादशकं मनुदण्डमथापि वा ।
अथ षोडशदण्डं वाप्यष्टादशकमेव वा ॥ २ ॥
अथवान्यप्रकारेण पीठस्थानं विधीयते ।
त्रिसालके चतुष्पञ्चसालके वा सुरालये ॥ ३ ॥
अग्रायामस्य मध्ये स्याद् बलिपीठं सलक्षणम् ।
प्रासादमध्याद् बहिरग्रतो गते
तदुत्तरोत्थे सदलद्विसंख्यके ।
दण्डे त्रिसार्धत्रिशराङ्गसप्तके
स्वधाग्नि कुर्याद् बलिपीठिकां तथा ॥ ४ ॥

दण्डसीमा भवेत् तत्र विष्कम्भाभ्यन्तरे तथा ॥ ५ ॥

ब्रह्मसूत्राद् गतिस्तत्र बलिपीठस्य वामतः।
एकद्वित्र्यङ्गुलैर्वाथ चतुरङ्गुलतोऽपि वा ॥ ६ ॥

गर्भद्वारप्रतिसमं बाह्यद्वारस्य वा पुनः।
प्रासादस्य प्रतिसमं बलिपीठसमुच्छ्रयम् ॥ ७ ॥

पूजापीठसमं *तदङ्घ्रिरहितं गर्भप्रतिप्रोन्मितं
प्रासादप्रतिसम्मितं च बलिपीठेऽब्जान्तिमाभ्युच्छ्रयम्।
उत्सेधे दशधा कृते सति निजेष्टे पीठिकाविस्तृतिं
सप्तांशैर्विदधीत मूलनिलयौचित्यात् तदङ्गक्रियाम् ॥ ८ ॥

अन्तरालत्रिपादं वा प्रासादार्धमथापि वा।
गर्भार्धं वाथ विस्तारं गर्भगेहसमं तु वा ॥ ९ ॥

तत्पादोनं तु वा तारं बलिपीठेष्वथापि वा।
एकहस्तं द्विहस्तं वा त्रिहस्तं वा समाचरेत् ॥ १० ॥

मूलद्वारोच्छ्रयसमं तत्त्रिपाददलं तु वा।
अथवा द्वारविस्तारसमं वा द्विगुणं तु वा ॥ ११ ॥

त्रिगुणं वाथ विस्तारमधमादिक्रमेण तु।
एतेषां बलिपीठानां तुङ्गं तारसमं तु वा ॥ १२ ॥

पीठव्यासे तु षट्सप्तवसुनन्दविभाजिते।
एकांशरहितं शेषं विदुस्तदुपपीठकम् ॥ १३ ॥

---

* 'षडंशरहितम्' इति तन्त्रसमुच्चयपाठः.

अथावयवाः —

पृथ्व्या पादुकमंशतो जगतिकां वेदैर्गुणैः कैरवं
तत्पट्टीगलकम्बुनिद्रवमपि क्ष्मापङ्क्तिभूमीन्दुभिः ।
कुर्वीत ज्वलनैः कपोतमिलयाग्रे पट्टिकां पङ्कजं
नेत्राभ्यामपि सप्तविंशतिविभक्ते पीठिकाभ्युच्छ्रये ॥ १४ ॥

पीठोच्चे रदभेदिते सदलभूसार्धेपुबाणेन्दुभू-
दस्राः पादुकजागते कुमुदतत्पट्टयन्तरीपु प्रतौ ।
अंशा वेदयुगानि वेदिगलयोः सार्धौ वलभ्युत्तरै-
र्दस्रौ चेति कपोतके शशिकराः स्युः पट्टिकापद्मयोः ॥

तत्तुङ्गे शकरीद्वन्द्वभक्ते द्व्यंशेन पादुकम् ।
षडंशैर्जगतीं कुर्याद् बाणांशैः कुमुदोच्छ्रयम् ॥ १६ ॥

कम्पमेकांशतः कुर्यात् कण्ठं वेदैरुदाहृतम् ।
ऊर्ध्वकम्पं शिवांशेन महापट्टिं गुणांशतः ॥ १७ ॥

पद्मतुङ्गं द्विभागं तु द्विभागं कर्णिकोदयम् ।
महापट्टिं द्विभागेन यदि वा कर्णिकां त्रिभिः ॥ १८ ॥

अथवोपान + + + महापट्टिं द्विभागतः ।
पद्मोच्चं पञ्चभागेन शेषं पूर्ववदेव हि ॥ १९ ॥

अथवा पीठिकोत्सेधेऽप्याद्यङ्गप्रक्रियोक्तवत् ।
उपानादिप्रस्तरान्तान्यङ्गान्यत्र समाचरेत् ॥ २० ॥

ततः कुर्यात् पीठिकोर्ध्वे पीठोत्सेधत्रिभागतः ।
पद्मं पद्मस्य विस्तारं तत्तद्योग्यं समाचरेत् ॥ २१ ॥

पद्मतारयुगांशं स्यात् कर्णिकायास्तु विस्तृतिः ।
वेशनिष्क्रमणादीनि पट्टिकाकन्धरादिषु ॥ २२ ॥
आयङ्गोक्तेन मार्गेण कुर्यात् तद्बलिविष्टरे ।
पीठाकारं युगाश्रं वा चाष्टाश्रं वा कलाश्रकम् ॥ २३ ॥
वृत्ताकारं तु वा कुर्याद् द्रव्यभेदोऽत्र कथ्यते ।
भवन्ति लोहपाषाणसुधा वा मृत्तिकाथवा ॥ २४ ॥
इष्टका वा साधनानि बलिपीठविधाविति ।

पक्षान्तरम् —

अथोच्चे षोडशांशे तु कुर्याद् भागेन पादुकम् ॥ २५ ॥
वेदैर्जगतिकास्तद्वत्कुमुदं पट्टमंशतः ।
अष्टांशोनं तु वा कुर्यात् तत्त्र्यंशैः कर्णिकातिम् ॥ २६ ॥
पीठाकारचतुर्थांशं पद्मतुङ्गमुदाहृतम् ।
सभद्रं वा विभद्रं वा सोपपीठमथापि वा ॥ २७ ॥
अलङ्कारैर्विमानोक्तैर्युक्तं वा बलिविष्टरम् ।
षोडशांशीकृते तुङ्गे पादुकं त्वेकभागतः ॥ २८ ॥
वेदैर्जगतिकास्तत्र कुमुदं तु त्रिभागतः ।
पट्टमंशेन रामांशैर्गलं कम्पं तु भागतः ॥ २९ ॥
कपोतोच्चं द्विभागेन पट्टमंशेन कारयेत् ।
पीठव्यासत्रिपादं वाप्यर्धं वाब्जस्य विस्तृतम् ॥ ३० ॥
तत्त्रिभागं कर्णिकायास्तुङ्गं तद्विस्तृतार्धतः ।

अथान्यथा —

उत्सेधे सप्तभागे तु पञ्चभागस्तु विस्तृतम् ॥ ३१ ॥

उच्छ्रयैकोनविंशांशे सार्धभागेन पादुकम् ।
चतुर्भिर्जगतीं कुर्यात् कुमुदं सार्धलोकतः ॥ ३२ ॥
एकांशं पट्टिकामानं त्रिभागं गलमेव च ।
सवलभ्युत्तरं सार्धं द्विभागं तु कपोतकम् ॥ ३३ ॥
अर्धांशं पट्टिकामानं पद्मोच्चं तु द्विभागतः ।
मध्यपीठमिदं ख्यातं सर्वदेवालयोचितम् ॥ ३४ ॥
उत्सेधे नवभागे तु पञ्चभागेन विस्तृतम् ।
तदुच्चे चतुर्विंशांशे सार्धांशं पादुकोन्नतम् ॥ ३५ ॥
चतुरंशं जगत्युच्चं सार्धाग्न्यंशं तु कैरवम् ।
रामांशं प्रस्तरोत्सेधं तत्समं वेदिकोदयम् ॥ ३६ ॥
पादोत्सेधं त्रिभिर्भागैस्त्रिपादं तूत्तरोदयम् ।
तत्समं तु वलभ्युच्चं द्विभागं तु कपोतकम् ॥ ३७ ॥
अर्धांशं पट्टिकामानं पद्मोत्सेधं द्विभागतः ।
श्रीपीठाख्यमिदं पीठं मुख्यमाहुर्ऋषीश्वराः ॥ ३८ ॥
उत्सेधार्धं तु विस्तारं पञ्चांशत्रितयं त वा ।
सप्तविंशतिधा तुङ्गे कृते द्वाभ्यां तु पादुकम् ॥ ३९ ॥
सार्धवेदांशकं वप्रं चतुरंशं तु कैरवम् ।
प्रस्तरं सार्धरामांशं तत्समं वेदिकोच्छ्रयम् ॥ ४० ॥
त्रिभागं गलमानं तु सवलभ्युत्तरोन्नतम् ।
सार्धं द्यर्धं कपोतोच्चं कारयेत् पट्टमर्धतः ॥ ४१ ॥
पङ्कजोच्चं द्विभागेन रुद्रपीठमिदं स्मृतम् ।
उत्सेधे दशभागे त सप्तभागं त विस्तम ॥ ४२ ॥

तुङ्गे दन्तविभक्ते तु पादुकं सार्धभागतः ।
सार्धबाणैर्जगत्युच्चं पञ्चांशं कुमुदोन्नतम् ॥ ४३ ॥
एकांशं पट्टिकोत्सेधमन्तरीं च शिवांशतः ।
प्रत्युत्सेधं द्विभागेन वेदैस्तद्वेदिकोन्नतम् ॥ ४४ ॥
ग्रीवोच्चं तत्समं कुर्यात् सपादांशकमुत्तरम् ।
तत्समं तु वलभ्युच्चं सार्धद्व्यंशं कपोतकम् ॥ ४५ ॥
आलिङ्गपट्टमर्धेन द्व्यंशार्धं पङ्कजोन्नतम् ।
सिंहव्यालादिसंयुक्तं प्रस्तरं कारयेत् पुनः ॥ ४६ ॥
प्रतेर्मुखं च कर्तव्यं कपोते नासिकाष्टकम् ।
कपोतदैर्घ्यदिग्भागं नासिकाया विशालकम् ॥ ४७ ॥
सद्वारं वाथ विद्वारं श्रीभद्रमिति कीर्तितम् ।
उत्सेधदशसप्तांशं बलिपीठस्य विस्तृतम् ॥ ४८ ॥
पञ्चत्रिंशांशके तुङ्गे द्वाभ्यां पादुकमाचरेत् ।
षडंशं जगतेरुच्चं पञ्चांशं कुमुदोन्नतम् ॥ ४९ ॥
चतुर्भागं प्रस्तरोच्चं सिंहाद्यैस्तत्र भूषयेत् ।
वेदिकोच्चं चतुर्भागैः कृतशैवलकादिकम् ॥ ५० ॥
गलं वेदांशकं व्यर्धं वलभ्यन्वितमुत्तरम् ।
वलभौ भूतहंसाद्यैर्भूषयेत् सुमनोहरम् ॥ ५१ ॥
कपोतोच्चं त्रिभागं तु मुक्तादामादिभूषितम् ।
विशेषादष्टनासाढ्यामर्धांशेनाब्जपट्टिकाम् ॥ ५२ ॥
सार्धद्विभागं पद्मोच्चं चतुर्द्वारसमन्वितम् ।
पञ्जरादिसमायुक्तं सर्वतोभद्रनामकम् ॥ ५३ ॥

तुङ्गेन नवपञ्चांशं कुर्यात् पीठस्य विस्तृतम् ।
सप्तत्रिंशत्कृते तुङ्गे द्विभागं पादुकं विदुः ॥ ५४ ॥
पञ्चांशं जगतेरुच्चं चतुरंशं तु कैरवम् ।
तथैव प्रस्तरं वेदिकोच्चं चैव तथैव च ॥ ५५ ॥
पञ्चांशं तु गलं वेदभागं वलभिकोत्तरम् ।
तत्समं तु कपोतोच्चं पद्मपट्टमिलांशकम् ॥ ५६ ॥
पद्मतुङ्गं तु वेदांशमिदं श्रीविजयाभिधम् ।
तुङ्गसप्तांशवेदांशपीठतारमुदाहृतम् ॥ ५७ ॥
एकोनत्रिंशता तुङ्गे कृते पादुकमंशतः ।
चतुरंशैर्जगत्युच्चं कुमुदं तु त्रिभागतः ॥ ५८ ॥
प्रस्तरं वेदिकोत्सेधं त्रित्रिभागैरुदाहृतम् ।
गलमानं चतुर्भागं सवलभ्युत्तरं त्रिभिः ॥ ५९ ॥
कपोतोच्चं युगांशं तु पट्टमर्धांशतस्तथा ।
पद्मतुङ्गं त्रिभिर्भागैः श्रीच्छन्दं तत् प्रकीर्तितम् ॥ ६० ॥
तुङ्गपञ्चांशरामांशं विस्तारं तुङ्गमानके ।
त्रयस्त्रिंशत्त्रिभागे तु द्विभागं पादुकोन्नतम् ॥ ६१ ॥
चतुर्भिर्जगतीं कुर्यात् त्रिभागं कुमुदोन्नतम् ।
प्रस्तरं तत्समं कुर्यात् त्रिभागं वेदिकोन्नतम् ॥ ६२ ॥
गलमानं तु वेदांशं सवलभ्युत्तरं त्रिभिः ।
कपोतोच्छ्रयमब्ध्यंशं पट्टमर्धेन कारयेत् ॥ ६३ ॥
पङ्कजोच्चं त्रिभागार्धं श्रीरुद्रविजयाभिधे ।
तुङ्गार्धं विस्तृतं कुर्यात् तुङ्गे द्वात्रिंशधा कृते ॥ ६४ ॥

पादुकं सार्धभागेन ततः कुर्याद् यथाक्रमम्।
वप्रं कुम्भं प्रस्तरं च वेदिकां गलमेव च ॥ ६५ ॥

प्रत्येकं चतुरंशैस्तु सवलम्युत्तरं त्रिभिः।
कपोतोच्चं चतुर्भागैः पद्मपट्टं दलांशतः ॥ ६६ ॥

त्रिभागेनाम्बुजं कुर्यात् पीठे साधारणाभिधे।
तुङ्गेऽष्टांशे सार्धवेदैरंशैस्तारमुदाहृतम् ॥ ६७ ॥

त्रयस्त्रिंशदंशे तुङ्गे तु द्वाभ्यां पादुकमाचरेत्।
वप्रादि तत्कपोतान्तं यथा साधारणे तथा ॥ ६८ ॥

अंशेन पद्मपट्टं तु त्रिभिरम्बुजमानकम्।
कारयेन्मतिमानत्र श्रीकेशे बलिविष्टरे ॥ ६९ ॥

तुङ्गे सप्तांशके तारं सार्धवेदांशभागतः।
चतुर्विंशांशिते तुङ्गेऽप्येकांशं पादुकं विदुः ॥ ७० ॥

जगत्यादिकपोतान्तं त्रित्रिभागैः पृथक् पृथक्।
पट्टमर्धेन पद्मं तु कुर्यादध्यर्धमानकम् ॥ ७१ ॥

श्रीवज्रमिति विख्यातं बलिपीठमिदं त्वपि।
सप्तांशपञ्चकं तारं तुङ्गे नक्षत्रभाजिते ॥ ७२ ॥

अध्यर्धं पादुकं विद्याद् वप्रं सार्धाङ्घिभागतः।
वैरवोच्चं तु वेदांशैः प्रस्तरं तु त्रिभागतः ॥ ७३ ॥

तत्समं वेदिकामानं त्र्यंशार्धं कन्धरोच्छ्रयम्।
सार्धद्विभागमानेन भूतमालान्वितोत्तरम् ॥ ७४ ॥

कपोतं तत्समं कुर्यात् पद्मपट्टं दलांशतः।
अम्बुजोच्चं द्विभागेन सर्वालङ्कारसंयुतम् ॥ ७५ ॥

पूजितं सर्वदेवेषु श्रीकरं बलिविष्टरम् ।
पीठानि तत्पार्षदानामष्टकानि यथोचितम् ॥ ७६ ॥
इन्द्रादिदिक्षु कर्तव्यान्यन्यपीठोक्तवर्त्मना ।
स्वपादुकाद् बहिष्ठानि तले वा तत्र युक्तितः ॥ ७७ ॥
उपपीठोपरिष्टाद् वा कारयेद् बुद्धिमत्तमः ॥ ७७½ ॥

इति शिल्परत्ने बलिपीठलक्षणं नाम
त्रिचत्वारिंशोऽध्यायः ।

अथ चतुश्चत्वारिंशोऽध्यायः ।

अथ ध्वजलक्षणम् ।

मध्यहारादिमर्यादापर्यन्तस्थानतस्तथा ।
बलिपीठाद् बहिः कार्यं ध्वजस्तम्भं च लक्षणैः ॥ १ ॥
शिलया दारुणा वाथ वृत्ताकारमथापि वा ।
षोडशाश्रं तु वाष्टाश्रं कुम्भमध्यादिसंयुतम् ॥ २ ॥
फलकोपरि विन्यस्येत् स्वस्ववाहनविग्रहम् ।
जन्मादिस्तूपिपर्यन्तविमानोच्छ्रयमानतः ॥ ३ ॥
शक्तिस्तम्भसमुत्सेधमर्धं पादोनमेव वा ।
तत्समं द्विगुणं वाथ कुर्यात् क्षुद्राल्पभेदतः ॥ ४ ॥
प्रासादमानत्रिगुणं चतुर्गुणमथापि वा ।
प्रासादादग्रतो नीत्वा स्थाप्यः पञ्चगुणं तु वा ॥ ५ ॥

द्वारोच्चाब्धिरसा(ष्ट)तुङ्गबहलं तस्मात् कृशं ह्रासितं
द्वारद्वादशकं विमुच्य पुरतः प्रासादतः स्थापयेत् ।

द्वाराणां दशभिश्च सप्तदशभिः पञ्चत्रिकैरुच्छ्रयं
विंशद्भिर्निजबाहुदण्डसहितं वेद्यन्वितं च ध्वजम् ॥ ६ ॥
शततालसमायामं ध्वजदण्डं करोतु वा ।
अशीतितालमानं वा प्रासादोच्छ्रयमेव वा ॥ ७ ॥
गोपुरोत्सेधमानं वा भेदच्छेदविवर्जितम् ।
अपक्कोडव्रणं स्निग्धं ग्रन्थिरन्ध्रविवर्जितम् ॥ ८ ॥
एवं लक्षणसंयुक्तं ध्वजदण्डमिहोच्यते ।
पञ्चहस्तप्रमाणं वा सप्तहस्तमथापि वा ॥ ९ ॥
नवद्वादशहस्तं वा कुर्याद् दण्डानुसारतः ।
ध्वजयष्टिं ध्वजस्याग्रान्नीत्वाधोद्वारमानकम् ॥ १० ॥
संस्थाप्य सम्मुखमदक्षिणपार्श्वलम्बि-
घण्टास्रगुज्ज्वलपताकमभीष्टपीठे ।
तत्केतुदण्डमभिकल्पसमनुप्रतिष्ठं
सम्भाव्य साध्वभिमृशन् प्रजपेद् ध्रुवाणुम् ॥ ११ ॥
सुषिरत्रयसंयुक्तं वामभागे सुयोजयेत् ।
सुषिरस्य प्रमाणं हि प्रतिमाकारमानतः ॥ १२ ॥
घण्टापताकामालादिबन्धनार्थमिदं स्मृतम् ।
पटस्य लक्षणं मध्ये ध्वजदण्ड(स)मायतम् ॥ १३ ॥
अथवा हस्तमानं वा तदायामदलं ततः ।
दुकूलपट्टं देवाङ्गं चित्रक्षौममथापि वा ॥ १४ ॥
अथ कार्पासकृतं वापि पटं कुर्यात् सलक्षणम् ।
चित्रितं कारयेच्छत्रध्वजचामरकादिभिः ॥ १५ ॥

प्रतिष्ठाप्य ध्वजस्योर्ध्वे गरुडं वैष्णवे गृहे ।
गगने गमनारूढं पक्षविक्षेपणान्वितम् ॥ १६ ॥
कुञ्चितं वामपादं तु दक्षिणं पृष्ठतः स्थितम् ।
किञ्चिदायतवृत्ताक्षं नीलनासाग्रमेव च ॥ १७ ॥
शान्तं च हसितं देवं मकुटादिविराजितम् ।
तप्तकाञ्चनवर्णाभं कपिलाक्षं बृहद्भुजम् ॥ १८ ॥
हृदये वन्दितकरं भक्त्या दार्वादिकल्पितम् ।
द्वारोच्चमानहस्ते तु स्थापयेद् ध्वजमुत्तमम् ॥ १९ ॥
बलिपीठस्य बाह्ये तु ध्वजस्थानं विधीयते ।
देवदारुश्च खदिरोऽरिष्टं क्रमुकमेव च ॥ २० ॥
वेणुर्वा नालिकेरो वा वृक्षः स्याद् ध्वजदण्डके ।
द्वारोत्सेधसमोत्तुङ्गः कुट्टिमं तत्समं तु वा ॥ २१ ॥
सपादं वार्धपादोन + + + द्विगुणं तु वा ।
द्विगुणं वास्य विस्तारमाकृत्याद्यङ्गवत् स्मृतम् ॥ २२ ॥
मञ्चकं पादबन्धं वा सोपपीठमथापि वा ।
अथवान्यप्रकारेण ध्वजपीठं प्रकल्पयेत् ॥ २३ ॥
एकहस्तं समुत्सेधं मेखलात्रितयान्वितम् ।
तुङ्गे षडंशिते भागं मेखलाद्यागलं त्रिभिः ॥ २४ ॥
तदूर्ध्वमेखला चैकेनान्त्या च स्यात् तथांशतः ।
अधोभागेन वा कुर्यान्मेखलात्रितयं पुनः ॥ २५ ॥
तत्कुट्टिमं तु तुर्यश्रं तत्तुङ्गस्य त्रिभागतः ।
तदूर्ध्वपद्मं तत्कर्णिकायाः स्यान्निर्गतो ध्वजः ॥ २६ ॥

अथवा सर्वदेवानां वेणुना क्रमुकेण वा।
कुर्यादग्रे ध्वजं तत्तद्योग्यायामसमन्वितम् ॥ २७ ॥

अप्रधानध्वजस्तम्भा वैणवाः स्युस्तथाखिले।
तद्विमानोत्तरायामतुल्यायामाः प्रकीर्तिताः ॥ २८ ॥

इति शिल्परत्ने ध्वजलक्षणकथनं नाम
चतुश्चत्वारिंशोऽध्यायः।

अथ पञ्चचत्वारिंशोऽध्यायः।

अथ सन्धिः।

द्रव्याणां दारुमुख्यानां बलायामादिसिद्धये।
स्थितानां शयितानां च सन्धिकर्म निगद्यते ॥ १ ॥
बाह्यान्तं द्रव्ययोगेन यत्तत् स्यात् पार्श्वसन्धिकम्।
क्षथोर्ध्वद्रव्यसंयोगादाधाराधेयभागतः ॥ २ ॥
दार्विष्टकाशिलादीनि तत्तद्द्रव्याणि सर्वशः।
पूर्वाग्रमुत्तराग्रं तु विन्यसेन्नान्यथा क्वचित् ॥ ३ ॥
नासीगतोत्तरादीनि भूषणावयवानि तु।
अग्रनिष्क्रमणन्यायाद् विन्यसेन्नैव दिग्वशात् ॥ ४ ॥
प्रादक्षिण्यवशादग्रं कुर्याद् वित्तविमानके।
मूलप्रदक्षिणत्वेन विन्यासोऽप्यत्र दृश्यते ॥ ५ ॥
षडश्राष्टाश्रकादीनां दिग्गतानां तु दिग्वशात्।
कुर्यादग्रं परेषां तु प्रादक्षिण्यक्रमेण तु ॥ ६ ॥

लुपास्तम्भादि सर्वेषां स्थितानामग्रमूर्ध्वतः ।
बालकूटादिभूषाणामधोग्रं नात्र संशयः ॥ ७ ॥
तत्रापि पद्मगेहाख्यविमानस्य विशेषतः ।
कूटस्य च लुपानां च मूलमूर्ध्वेति शुश्रुमः ॥ ८ ॥
अन्तर्भागोऽन्तरे कार्यो बहिर्भागो बहिस्तथा ।
द्रव्याणां पार्श्वसंज्ञानामन्यैः प्रोक्तानि तद् यथा ॥ ९ ॥
अपिधानाख्यफलकं यथावेधपदं न्यसेत् ।
शिलां शिलाभिः सन्दध्यादिष्टकाभिस्तथेष्टकाम् ॥ १० ॥
दारुभिर्दारुमेवेह लोहं लोहेन सन्धयेत् ।
स्वजातिभिः स्वजातिं तु सन्दध्यान्न विजातिभिः ॥ ११ ॥
नवद्रव्यं नवेनैव पुराणं तु पुरातनैः ।
जीर्णं जीर्णेन सन्दध्यात् त्वक्सारैस्त्वचिसारकम् ॥ १२ ॥
जात्या विप्रेण विप्रं च क्षत्रियैः क्षत्रियं तथा ।
विशं विशान्त्यमन्त्येन शूद्रेणान्यं न सन्धयत् ॥ १३ ॥
पुरुषद्रव्यसन्धानं पुरुषेण सुशोभनम् ।
स्त्रियं चेत् संदधेत् स्त्रीभिः षण्डं षण्डेन सन्दधेत् ॥ १४ ॥
पुंस्त्रियोर्द्रव्ययोः सन्धिरविरोध इति स्मृतः ।
मूलं मूलेन सन्दध्यादग्रमग्रेण योजयेत् ॥ १५ ॥
मूलाग्रद्रव्ययोगेन सन्धानं सम्पदां पदम् ।
मूलं मूलेन नैर्ऋत्यामग्रेणाग्रं तु शूलिनि ॥ १६ ॥
योगः स्यादग्रमूलाभ्यामन्ययोर्भिन्नसन्धिषु
षडश्राष्टाश्रके गेहे क्वचिदेवं भवत्यपि ॥ १७

वास्तुमध्ये ततो द्वारे देवांशेष्वपि कर्णयोः।
दिग्विदिङ्मध्यभागे च स्तम्भमध्ये विशेषतः ॥ १८ ॥
प्रतिसन्धेस्तु मध्ये वा सन्धिकार्यं न शोभनम्।
अर्कार्किवरुणेन्दूनां स्थानं दिगिति कीर्तितम् ॥ १९ ॥
अग्निराक्षसवाय्वीशस्थानं विदिगिति स्मृतम्।
इन्द्रो ग्रहक्षतस्तद्वत् पुष्पदन्तस्तथैव च ॥ २० ॥
फल्लाटश्चेति ये तेषां स्थानं द्वारमिति स्मृतम्।
तत्र सन्धिर्न कर्तव्यः सर्वथा सर्ववेश्मसु ॥ २१ ॥
आयङ्गादुन्नतार्थं यत् सन्धानं यत्र रोचते।
तत्र जन्मादिवर्गाणामन्ते कुर्यान्न मध्यतः ॥ २२ ॥
अधोमूलं चोर्ध्वकेशमाधाराधेयसन्धिषु।
अन्तर्मूलं बहिश्चाग्रं पार्श्वद्रव्ये स्थितेऽपि च ॥ २३ ॥
अदीर्घदीर्घद्रव्याभ्यां सन्धानं सम्पदां पदम्।
समाभ्यां नैव सन्धानं कारयेन्मतिमानतः ॥ २४ ॥
चतुर्दिक्षु बहिः स्थित्वा निरीक्षेत् स्थपतिर्गृहम्।
तदा ह्रस्वं यथा वामे दीर्घद्रव्यं तु दक्षिणे ॥ २५ ॥
तथा सुधीर्विधातव्यः पुनश्च पुनरेव च।
अथवान्तर्गतः स्थित्वा स्थपतिर्वीक्ष्य तद् गृहम् ॥ २६ ॥
विज्ञाय दक्षिणं वामं दीर्घं ह्रस्वं च विन्यसेत्।
द्रव्यत्रयकृते सन्धौ समपातत्रयं पुनः ॥ २७ ॥
मध्यद्रव्यं यथा दीर्घं ह्रस्वद्रव्यौ तु पार्श्वयोः।
तत्क्रमेण यथापूर्वमुक्तं तद्वन्न्यसेत् तु वा ॥ २८ ॥

स्तम्भानां स्तम्भमध्यार्धादधस्सन्धानमुत्तमम् ।
खण्डानामूर्ध्वखण्डस्य ह्रासे सम्पद्विनाशनम् ॥ २९ ॥
कुम्भमण्ड्यादिवर्गाणां सन्धानं सम्पदां पदम् ।
शिलास्तम्भेषु सन्धानं यथायोगं समाचरेत् ॥ ३० ॥
भिन्नसन्धौ विशेषेण कुर्यादाधेयमूर्ध्वतः ।
आधारमधरीकृत्य तद्भेदमधुनोच्यते ॥ ३१ ॥
भिन्नसन्धिरिति ख्यातो भुजाकोटिस्वरूपयोः ।
द्रव्ययोर्यः कोणसन्धिः स एव स्यान्न संशयः ॥ ३२ ॥
कीलादिभिर्विना यत्राप्यन्योन्यं कबलीकृतः ।
दक्षिणोत्तरगं दीर्घं दक्षिणोत्तरदीर्घतः ॥ ३३ ॥
के पूर्वापरगं दीर्घं पूर्वापरत आयते ।
आधारमायतद्रव्यं ह्रस्वमाधेयमुच्यते ॥ ३४ ॥
यद्वा मुखपृष्ठगतद्रव्यमाधारमेव हि ।
दक्षवामगतद्रव्यमाधेयश्च न संशयः ॥ ३५ ॥
यत्र यद्धस्तसंख्या स्याद् यत्र यद्योनिसम्भवः ।
तस्याङ्गित्वं बलिष्ठत्वमाधारत्वं च कल्पयेत् ॥ ३६ ॥
नन्द्यावर्तदलाकारं नन्द्यावर्ताख्यसञ्चयः ।
तत्र दक्षिणपार्श्वस्थद्रव्यनिर्गमपश्चिमे ॥ ३७ ॥
तथा पश्चिमपार्श्वस्थं निर्गम्योत्तरभागतः ।
द्रव्यमुत्तरपार्श्वस्थं तथा निर्गम्य पूर्वतः ॥ ३८ ॥
पूर्वपार्श्वगतं द्रव्यं तद्वन्निर्गम्य दक्षिणे ।
एतत्क्रमेण सन्धानं नन्द्यावर्तमिति स्मृतम् ॥ ३९ ॥

अथैतद्वैपरीत्येन नन्द्यावर्तं जगुः परे।
भिन्नसन्धिषु तत्पृष्ठदीर्घं स्वव्यासतः समम् ॥ ४० ॥
अर्धं वा पादहीनं वा कुर्यात् पादमथापि वा।
मेषयुद्धं त्रिखण्डं चेत् सौभद्रं चार्धपाणिकम् ॥ ४१ ॥
महावृत्तं च सन्धानं स्तम्भानां पञ्चधैव हि।
मेषयुद्धं स्वस्तिकाभं सत्रिचूडं त्रिखण्डकम् ॥ ४२ ॥
सौभद्रमिति तत् प्रोक्तं पार्श्वप्राप्तचतुश्शिखम्।
गृहीतघनमानार्धं छिन्नमूलाग्रयोर्मिथः ॥ ४३ ॥
निश्छिद्रमर्पितं प्रोक्तं सन्धिः स्यादर्धपाणिकम्।
तस्यार्धे यद् वृत्ताशिखं मध्ये तन्मानवृत्तकम् ॥ ४४ ॥
निर्वृत्ताकृतिनिष्पाद्यं महावृत्तमिति स्मृतम्।
षट्शिखं झषदन्तं च सूकरघ्राणमप्यथ ॥ ४५ ॥
सङ्कीर्णकीलं वज्रं च शयितानां पञ्चसन्धयः।
अथार्धपाणिखण्डाभ्यां हलाकारास्तु षट्शिखाः ॥ ४६ ॥
समध्यस्थितकीलं च यत्र स्यात् षट्च्छिखं तु सः।
झषदन्तो जायमानतिर्यग्बहुशिखायुतः ॥ ४७ ॥
आधाराधेययोगेन सन्धिः सो + यथाबलम्।
सूकरघ्राणवद् योज्यं सूकरघ्राणसंज्ञितम् ॥ ४८ ॥
यथायुक्ति यथायोग्यं शूलैर्नानाविधैर्युतम्।
सङ्कीर्णकीलसंज्ञं स्याद् वज्राभो वज्रचूडकः ॥ ४९ ॥
तत्तद्द्रव्यविशालेन समं वार्ध्यर्धमेव वा।
व्यासार्धं वाथ पादोनं या तद्द्रव्यस्य विस्तृतिः ॥ ५० ॥

तत्कर्णमानतुल्यं वा सन्ध्यायामं प्रकल्पयेत् ।
स्तम्भविष्कम्भयोर्मध्ये सन्धिर्नैवोत्तरादिषु ॥ ५१ ॥

दक्षिणेऽपि च वामे वा स्तम्भचूडान्तकं तु यत् ।
सन्धिमध्यं नियोज्यं स्यात् तदेवं सम्पदां पदम् ॥ ५२ ॥

अथवा पादविष्कम्भदलेन चतुरंशिते ।
एकांशमथवा द्व्यंशं त्र्यंशं वा गमयेत् तथा ॥ ५३ ॥

सन्धानाधेयकस्याग्रमथवा भित्तिपादके ।
सन्धिस्थं कीलपार्श्वस्थं स्तम्भसूत्रं यथा तथा ॥ ५४ ॥

एवं —

लुपादिघनमध्यस्थं नीप्रपट्ट्यादिसन्धिषु ।
कीलपार्श्वं भवत्वेवं सर्वमूह्यं यथोचितम् ॥ ५५ ॥

अन्योन्यसन्धिविद्धे तु शिखाकीलादि चिन्त्यते ।
द्रव्याणां वसुमध्यस्था शिखा सम्पद्विनाशिनी ॥ ५६ ॥

दक्षिणोत्तरतो नीता शिखा सम्पत्करी भवेत् ।
गृहीतद्रव्यविस्तारे वसुसप्तषडंशिते ॥ ५७ ॥

शिखायाः कीलकस्यापि विस्तारः स्यात् तु भागतः ।
तदर्धं तद्धनं कुर्यात् कीलस्य त्रिपदं तु वा ॥ ५८ ॥

एकपङ्क्तिगतस्तम्भेष्वेकाकारास्तु सन्धयः ।
मिश्रसन्धिर्विनाशाय तस्मान्मिश्रं तु वर्जयेत् ॥ ५९ ॥

मल्लीलं तथा ब्रह्मराजं वै वेणुपर्वकः ।
क्रमुकं देवसन्धिश्च दण्डकः षष्ठ उच्यते ॥ ६० ॥

द्रव्यद्वयस्य त्वेकत्र सन्धिः स्यान्मल्लीलकः।
त्रिद्रव्यैर्ब्रह्मराजाख्यो वेदैर्बाणैश्च वा पुनः ॥ ६१ ॥
सन्धिः स्याद् वेणुपर्वाख्यः क्रमुकं तु रसैः स्वरैः।
अष्टाभिर्देवसन्धिः स्याद् रन्ध्रद्रव्यैस्तथैव च ॥ ६२ ॥
बहुसन्धिर्बहुद्रव्यैस्तथैव बहुसन्धिषु।
बहुद्रव्यैर्यदि + + + + दण्डकसंज्ञितः ॥ ६३ ॥
चूलिकायां लुप्तानां वै सन्धिः स्यादर्धपाणिकः।
कूटवंशादिभिस्तासां वेणुपर्वाभिधो भवेत् ॥ ६४ ॥
अर्धपाणिविशेषोऽयं भिन्नसन्धिरिति स्मृतम्।
पादोपरि भवेत् सन्धिर्नैव पादान्तरे क्वचित् ॥ ६५ ॥
ब्रह्मस्थलोर्ध्वगद्रव्यसन्धानं विपदां पदम्।
ब्रह्मस्थानस्थितः स्तम्भः स्वामिनं च विनाशयेत् ॥ ६६ ॥
तुलाद्युपरिगैर्द्रव्यैरतिदोषं न विद्यते।
पुंस्त्रीनपुंसकमहीरुहसन्धिकार्ये
पुंसा च पुंविहितमेव तथैव पुंस्त्र्योः।
नैवोभये न च नपुंसकसंगतिः स्या-
ज्जात्यैकया शुभदमुक्तमिति क्रमाद्वा ॥ ६७ ॥
पैतामहादिशास्त्रेषु यथा दृष्टं पुरातनैः ॥ ६८ ॥
तथा तत्तत् प्रकुर्वीत सौख्यायुस्संपदृद्धये।
अधिष्ठानस्य वैरूप्यं तत्सन्तानविनाशनम् ॥ ६९ ॥
प्रत्यां स्त्रीणां विनाशं तु स्तम्भे नृपपराजयम्।
प्रस्तरे द्विजनाशं स्यात् कण्ठे तु वणिजां क्षयम् ॥ ७० ॥

नासिकासु स्वपक्षाणा शिखरे राजविभ्रमः ।
स्तूपिकाकुम्भवैरूप्ये तद्राष्ट्रजननाशनम् ॥ ७१ ॥
आस्थानद्वारसोपानं सर्वेषामशुभावहम् ।
आस्थानभित्तिकस्तम्भमशक्ताङ्गविरूपता ॥ ७२ ॥
अवोदितालङ्करणमन्यच्चानिष्टदुःखदम् ।
पूजोपचारविच्छेदो बलिच्छेदोऽप्यनिष्टकृत् ॥ ७३ ॥
सर्वाङ्गसुन्दरं तस्माद् धाम कुर्यात् सलक्षणम् ।
नाशदुःखं मृतिं पुष्टिं कुलवृद्धिं कुलक्षयम् ॥ ७४ ॥
धनं सुखं च नैर्धन्यं कुर्यात् पूर्वादिदिग्दरी ॥ ७४½ ॥

इति शिल्परत्ने सन्धिलक्षणं नाम
पञ्चचत्वारिंशोऽध्यायः ।

अथ षट्चत्वारिंशोऽध्यायः ।

अथ चित्रलक्षणम् ।

एवं सर्वविमानानि गोपुरादीनि वा पुनः ।
मनोहरतरं कुर्यान्नानाचित्रैर्विचित्रितम् ॥ १ ॥
जङ्गमा वा स्थावरा वा ये सन्ति भुवनत्रये ।
तत्तत्स्वभावतस्तेषां करणं चित्रमुच्यते ॥ २ ॥
तच्चित्रं तु त्रिधा ज्ञेयं तस्य भेदोऽधुनोच्यते ।
सर्वाङ्गदृश्यकरणं चित्रमित्यभिधीयते ॥ ३ ॥

भित्त्यादौ लग्नभावेनाप्यर्धं यत्र प्रदृश्यते ।
तदर्धचित्रमित्युक्तं यत्तत् तेषां विलेखनम् ॥ ४ ॥
चित्राभासमिति ख्यातं पूर्वैः शिल्पविशारदैः ।
चित्रं वाप्यथ चित्रार्धं मृदा वा सुधयापि वा ॥ ५ ॥
दारुणा शिलया वाथ लोहैरिष्टकयापि वा ।
तत्तद्द्रव्यैः प्रकुर्वीत यथादृष्टं यथाश्रुतम् ॥ ६ ॥
यथायुक्ति यथाशोभं नानावर्णैश्च भूषयेत् ।
सुधाभिः स्निग्धभित्त्यादौ युक्तवर्णैर्विलेखयेत् ॥ ७ ॥
चित्राभासं पुनस्तेषामेकमार्गं समाश्रयेत् ।
बहिरन्तश्च सर्वेषां यत्र युञ्जीत सर्वतः ॥ ८ ॥
सुमङ्गलकथोपेतं मन्त्रमूर्त्यादिसंयुतम् ।
सङ्ग्रामं मरणं दुःखं देवासुरकथास्त्वपि ॥ ९ ॥
नग्नं तपस्विलीलां च न कुर्यान्मानुषालये ।
भित्त्यादौ तत्र लेख्यं स्याच्चित्रं चित्रतराकृति ॥ १० ॥
स्वागमाखिलवेदादिपुराणोक्तकथान्वितम् ।
नानावर्णान्वितं रम्यं न न्यूनं नाधिकं क्वचित् ॥ ११ ॥
तत्र तत्रोचिताकाररसभावक्रियान्वितम् ।
चित्रं विचित्रफलदं भर्तुः कर्तुश्च सर्वदा ॥ १२ ॥
अतोऽन्यदशुभं चित्रं विपरीतफलप्रदम् ।
न लेखयेत् तन्न लिखेल्लोकद्वयसुखेच्छया ॥ १३ ॥
तस्मात् तत्प्रक्रियां वच्मि मन्दभावहिताय च ।
तत्रादौ सुधया पूर्वमुक्तया तत्क्रमेण च ॥ १४ ॥

लिपेत् कुड्यं ततश्चित्रं लेपयेदथवा पुनः ।
दग्ध्वा शङ्खादिकं काष्ठैश्चूर्णितं यत् सुधा हि सा ॥ १५ ॥

+ + चूर्ण + + चतुर्थांशमुद्रकाथलवैः सह ।
गुलतोयेन संसिञ्चेत् तच्चूर्णं वालुकान्वितम् ॥ १६ ॥

+ + + + प्रमाणं हि सुधातुर्यांशमानतः ।
कालाग्निपक्वकदलीफलपिष्टं तु योजयेत् ॥ १७ ॥

तत्पिष्टस्य प्रमाणं हि सुधावेदांशकं स्मृतम् ।
द्रोण्यां क्षिप्त्वाथ सम्मर्द्य गते मासत्रये पुनः ॥ १८ ॥

पेषयेद् दृषदि क्षिप्त्वा दृषदा गुलवारिणा ।
नवनीतमिवायाति यावत् तावत् सुपेषयेत् ॥ १९ ॥

अथ कुड्यादिकं सम्यग् संशोध्य समतां नयेत् ।
नालिकेरत्वचामग्रैः सुसूक्ष्मं शिथिलीकृतैः ॥ २० ॥

पुनस्तद् गुलतोयेन सिक्त्वा नीत्वा दिनाल्पकम् ।
पश्चात् तत्र सुधापिष्टं तत्र दर्व्या विलेपयेत् ॥ २१ ॥

दर्व्याकारविशालादि सर्वमौचित्यभेदतः ।
लौही दारुमयी वाथ श्लक्ष्णपृष्ठा भवेदिह ॥ २२ ॥

तद्दर्वीपृष्ठभागेन निम्नोन्नतविवर्जितम् ।
लिप्त्वा पिष्टसुधां सम्यङ्मन्दं मन्दं पुनः क्रमात् ॥ २३ ॥

नालिकेरत्वचालिप्य शुद्धतोयसमन्वितम् ।
शुष्के तस्मिन् वर्णलेपं कुर्यात् चित्रार्थमेव हि ॥ २४ ॥

फलकादौ तक्षणेन स्निग्धे वर्णं विलेपयेत् ।
सुधालेपो न कर्तव्यश्चित्रार्थं फलकादिषु ॥ २५ ॥

अथ वक्ष्यामि संक्षेपात् सर्वेषां वर्णलेपनम्।
संस्कृतिं च विशेषेण तेषां योगं तथैव च ॥ २६ ॥
सितवर्णं पीतवर्णं रक्तवर्णं च कज्जलम्।
एतानि शुद्धवर्णानि श्यामवर्णं तथैव च ॥ २७ ॥
सुधावलिप्तकुड्यादौ धवलं वर्णमालिपेत्।
शङ्खशुक्त्यादिकं वाथ सितमृद्वाथ(?) चूर्णयेत् ॥ २८ ॥
कपित्थनिम्बनिर्यासतोयैरालोड्य बुद्धिमान्।
मन्दमालेपयेद् भित्तौ फलके वा यथारुचि ॥ २९ ॥
शाकोटकत्वचा वाथ केतकीहरततोऽपि वा।
यदा सुस्निग्धतां याति तदावृत्त्या विलेपयेत् ॥ ३० ॥
अथवौलूखले गर्ते सुधाचूर्णानि निक्षिपेत्।
पिष्ट्वा पुनः पुनः सम्यङ्मुसलेन महामतिः ॥ ३१ ॥
केरबालफलोदेन सिक्त्वा तं पेषयेत् पुनः।
तं पिष्टमुष्णतोयेन सम्यगालोड्य गालयेत् ॥ ३२ ॥
पुनः पूर्वोक्तमार्गेण सुधोपरि विलेपयेत्।
इदं तु फलकादौ न शक्यं शक्यं मृदादिषु ॥ ३३ ॥
एवं धवलिते भित्तौ दर्पणोदरसन्निभे।
फलकादौ पटादौ वा चित्रलेखनमारभेत् ॥ ३४ ॥
पटादौ फलकाद्युक्तमार्गमाश्रित्य लेखयेत्।
पुराणलोष्टचूर्णेन शुष्कगोमयचूर्णकान् ॥ ३५ ॥
तुल्यशीतजलेनापि योजयेत् पेषणीतले।
पिष्ट्वा तेन विधायाशु शोषयेत् किट्टलेखनीम् ॥ ३६ ॥

वर्त्याकारास्तथायामे द्वित्र्यम्भोध्यङ्गुलात्मकाः ।
देवान् वा मनुजान् वापि मृगान् नागान् विहङ्गमान् ॥ ३७ ॥
लतावृक्षादिकान् वाथ नागान् वा सागरानपि ।
श्रोत्राभ्यां वाथ नेत्राभ्यां मनसा वाथ निश्चितान् ॥ ३८ ॥
आलिखेत् किट्टलेखिन्या सुमुहूर्ते सुलग्नके ।
स्वस्थचित्तः सुखासीनः स्मृत्वा स्मृत्वा पुनः पुनः ॥ ३९ ॥
यत्र लेखा गता वामं तत्र तान् नववाससा ।
संमार्ज्य सम्यगालिख्य तत्तदाकारमुन्नयेत् ॥ ४० ॥
अथ दारून् पीतवर्णान् गिरिनद्यादिसम्भवान् ।
आदाय शुद्धतोयेन संक्षाल्यादौ विचूर्णयेत् ॥ ४१ ॥
मन्दं किञ्चिच्छिलापृष्ठे पेषयित्वा विलोड्य च ।
शुद्धतोयैर्महापात्रे मुहूर्तं प्रतिपालयेत् ॥ ४२ ॥
तदूर्ध्वांशं सारतोयमधः पङ्कविवर्जितम् ।
पात्रान्तरे विनिक्षिप्य पुनः कुर्यादमुं विधिम् ॥ ४३ ॥
एवं पुनः पुनः कृत्वा यावन्निर्मलता भवेत् ।
तत्सारं नवमृद्भाण्डे मन्दमालिप्य शोषयेत् ॥ ४४ ॥
ग्रीष्मातपेषु विधिवद् भूयो भूयो महामतिः ।
आलोड्य शुद्धतोयेषु शोषयेच्छुद्धिमिच्छकः(?) ॥ ४५ ॥
एवमेव समानीय रक्ते धातूनपि क्रमात् ।
निर्मलत्वे समुत्पन्ने शोषयेदेवमेव हि ॥ ४६ ॥
अथ तैलं समासिच्य वर्धमानेऽच्छवर्तिकाम् ।
विन्यस्य प्रज्वलेद् दीपं घटमादाय मृन्मयम् ॥ ४७ ॥

शुष्कगोमयचूर्णेन संमृज्योदरमस्य वै ।
तद् दीपोपरि दीपस्य संमुखं विन्यसेत् पुनः ॥ ४८ ॥
तत्र दीपशिखोद्भूतं कज्जलं तद्घटोदरे ।
आलम्भं सम्यगादाय मृद्घटादौ विलेपयेत् ॥ ४९ ॥
मर्दयेत् स्वस्य हस्तेन भूयोद्वर्त्य पुनस्तथा ।
शुद्धाम्बुमिश्रं संमर्द्य बहुशः शोषयेत् पुनः ॥ ५० ॥
एतत्त्रयं पुनर्युक्त्या निम्बनिर्यासवारिणा ।
सम्मर्द्य शोषयेत् पश्चादथान्यानपि पेषयेत् ॥ ५१ ॥
श्यामधातून् यवमात्रं शुद्धतोयेन पेषयेत् ।
पुनः कपित्थनिर्यासतोयैः संमर्द्य शोषयेत् ॥ ५२ ॥
लेखनी त्रिविधा ज्ञेया स्थूला सूक्ष्मा च मध्यमा ।
तद्दण्डमृतुमात्रं वा विष्कम्भं पञ्चवं स्मृतम् ॥ ५३ ॥
मुखे पुच्छे तदष्टांशमष्टाश्रं वाथ वर्तुलम् ।
कृत्वाग्रे विन्यसेच्छङ्कुं शौडमर्धाङ्गुलोन्नतम् ॥ ५४ ॥
यवाकारं च सुदृढं तत्र संयोजयेत् पुनः ।
स्थूलायां वत्सकर्णोत्थमजोदरभवं परे ॥ ५५ ॥
चिक्कोडपुच्छजं सूक्ष्मायामरोमं तृणाग्रकम् ।
तन्तुना लाक्षया वाथ दण्डाग्रकृतशङ्कुषु ॥ ५६ ॥
बध्नातु लेखनीः सम्यक् प्रतिवर्णं त्रिधा त्रिकाः ।
आकृत्या च त्रिधा स्थूला सूक्ष्मा मध्येति सा पुनः ॥
प्रत्येकं नवधा चैवं प्रतिवर्णं तु लेखनी ।
अथ मध्यमलेखन्या पीतवर्णरसेन तु ॥ ५८ ॥

किट्टलेखाबहिर्भागे लिखित्वाव्यक्तमम्बरैः ।
मार्जयेत् किट्टलेखां तां पुनः सुव्यक्तमालिखेत् ॥ ५९ ॥
रक्तवर्णरसेनाथ सर्वं सम्यक् समालिखेत् ।
ऋज्वादिस्थानभेदानां लेखने वच्मि लक्षणम् ॥ ६० ॥
ऋजु स्यात् संमुखं स्थानमन्यदर्धर्जुसंज्ञकम् ।
तृतीयं साचिकं प्रोक्तं तुर्यं व्यर्धाक्षिसंज्ञकम् ॥ ६१ ॥
पञ्चमं भित्तिकं प्राहुस्तज्ज्ञाः पार्श्वगतं तु तत् ।
पञ्च स्थानानि मुख्यानि कथितानीह संज्ञया ॥ ६२ ॥
ऋज्वादिपरतस्तस्मात् परावृत्तं चतुर्विधम् ।
एवं नवैव स्थानानि वदन्तश्चित्रलेखकाः ॥ ६३ ॥
तेषां तु लक्षणं वक्ष्ये ब्रह्मसूत्रविभेदतः ।
पूर्वतः पूर्वभागः स्यात् परभागस्तु पृष्ठतः ॥ ६४ ॥
नासाग्रमध्यान्नाभेस्तु मध्यमं संलिखेत् सुधीः ।
आपादमकुटाग्रं यत् सूत्रं ब्राह्ममिति स्मृतम् ॥ ६५ ॥
ब्रह्मसूत्राद् बहिःसूत्रे षट्षडङ्गुलमध्यगे ।
यत्तत् स्यात् तद्दृजुस्थानं रूपसांमुख्ययोगि तत् ॥ ६६ ॥
पूर्वभागगतं गात्रं सम्पूर्णं दृश्यते स्फुटम् ।
कर्णनासामितावत्र शङ्खावङ्गुलिसम्मितौ ॥ ६७ ॥
पादौ भागगतौ दृश्यावङ्गुल्याश्चित्रभागिकाः ।
ऋजुस्थानमिदं प्रोक्तं यत्र पृष्ठं न दृश्यते ॥ ६८ ॥
अथार्धर्जुं प्रवक्ष्यामि सूत्रत्रयविशेषतः ।
अन्तरं ब्रह्मसूत्रस्य पक्षसूत्रं + + + + ॥ ६९ ॥

परभागगते पादे कल्पिताङ्गुष्ठमूलतः।
ततः स्तनप्रदेशाच्च कुचचूचुकतो बहिः ॥ ७० ॥
जानुतः पञ्चमांशेन बहिर्भागे व्यवस्थितम्।
पूर्वभागे तु मध्याया अनामायाश्च मध्यगम् ॥ ७१ ॥
स्यातामेवं पक्षसूत्रे ब्रह्मसूत्रं तु कथ्यते।
ललाटे च भ्रुवोर्मध्ये नासाग्रे रन्ध्रतो बहिः ॥ ७२ ॥
नाभिरन्ध्रबहिःपार्श्वे लिङ्गमध्यसमागतम्।
परभागे तु तस्याङ्घ्रेर्गुल्फस्योपरिसङ्गतः ॥ ७३ ॥
ब्रह्मसूत्रप्रकारोऽयं भागैनैकेन सङ्कटः(?)।
अथाङ्गसन्निवेशादि सर्वमूह्यं स्वबुद्धितः ॥ ७४ ॥
अर्धर्जुकमिदं स्थानं साचिकं कथ्यतेऽधुना।
अङ्गुलानि दशैकत्र कलामात्रं ततोऽन्यतः ॥ ७५ ॥
अन्तरं ब्रह्मसूत्रस्य पार्श्वसूत्रद्वयस्य च।
ललाटाल्लोचनप्रान्तात् कपोलात् स्कन्धदेशतः ॥ ७६ ॥
एकाङ्गुलं स्तनस्यान्तं नाभेः सार्धाङ्गुलावधि।
वंक्षणादणिदेशाच्च बहिर्व्यक्तं विनिर्गतम् ॥ ७७ ॥
परपादाङ्गुष्ठमूले पादसूत्रं विधीयते।
सिन्धोच्च +(?) भ्रुवोर्मध्यान्नासारन्ध्रस्य मध्यतः ॥ ७८ ॥
त्र्यङ्गुला दृढतः(?) पश्चान्नाभिरन्ध्रस्य मध्यतः।
मेहनस्य बहिर्भागाज्जानुमण्डलपूर्वतः ॥ ७९ ॥
नखरस्य तथा प्रान्ताद् ब्रह्मसूत्रं न्यसेत् क्रमात्।
मस्तकस्य तथा पृष्ठात् कर्णोपान्तात् तथैव च ॥ ८० ॥

कन्धरात् स्कन्धसन्धेश्च स्तनचूचुकमण्डलात् ।
अङ्गुलात् पर्वतश्चैव मध्यभागेन सङ्गतम् ॥ ८१ ॥
कलामात्रं परित्यज्य काञ्चीदेशस्य मध्यतः ।
मणिबन्धगतं तद्वत् पूर्वभागस्य पार्ष्णितः ॥ ८२ ॥
अन्यपार्श्वगतं सूत्रं क्रमेणैव निरूपितम् ।
एवं साचीगतं स्थानं साकल्येन निरूपितम् ॥ ८३ ॥
द्व्यर्धाक्षि वक्ष्यते स्थानं लक्ष्यलक्षणसंयुतम् ।
एकत्रैकाङ्गुलं ह्यस्मिन्नन्यत्रैकादशाङ्गुलम् ॥ ८४ ॥
मध्याद् द्व्यर्धाक्षिके स्थाने लम्बसूत्रक्रमो भवेत् ।
आकेशान्नासिकाग्राच्च कक्षमूलाच्च नाभितः ॥ ८५ ॥
जानुमध्यात् पार्श्वसूत्रमूलेऽङ्गुष्ठकसंश्रितम् ।
सीमन्ततो भ्रुवोर्मध्याद् ब्रह्मसूत्रं विनिर्गतम् ॥ ८६ ॥
गोजीतो हनुतः कक्षमूलदेशाच्च मात्रया ।
अङ्गुलं नाभितस्त्यक्त्वा लिङ्गपार्श्वात् तथाणितः ॥ ८७ ॥
अङ्गुष्ठोपान्तदेशाच्च पूर्वसन्ध्यङ्गुलीर्व्रजेत् ।
अन्यपार्श्वगतं सूत्रमूर्ध्वपृष्ठविनिर्गतम् ॥ ८८ ॥
मणिबन्धात् तर्जनीतः पूर्वपादस्य पार्ष्णितः ।
क्रमेणैवं प्रकुर्वीत सूत्रत्रयमुदीरितम् ॥ ८९ ॥
एवं द्व्यर्धाक्षिके सूत्रस्थानं भित्तिकमुच्यते ।
पक्षसूत्रद्वयं तिष्ठेद् ब्रह्मसूत्रं न दृश्यते ॥ ९० ॥
तेनैव मिलितं कार्यं मध्यसूत्रं विचक्षणैः ।
नान्यत्र दृश्यते क्वापि ब्रह्मसूत्रं ततः स्मृतम् ॥ ९१ ॥

ऊर्ध्वपृष्ठे तथा स्कन्धे कूर्परे पार्ष्ण्युपान्ततः।
इतरत् पक्षसूत्रं तु क्रमेणैवं विधीयते ॥ ९२ ॥

ब्रह्मसूत्रात् पुरोभागे केशान्तं त्रियवान्तरम्।
नासामूलस्य सूत्रस्य यवद्वितयमन्तरम् ॥ ९३ ॥

यवमानान्तरा गोजी निम्ना सा परिकल्प्यते।
आस्यमध्यगता रेखा सूत्रादर्धयवान्तरा ॥ ९४ ॥

अन्तरं ब्रह्मसूत्रस्य चिबुकस्यैकमङ्गुलम्।
हनुचक्रं ततो लेख्यं सूत्रात् पञ्चयवान्तरम् ॥ ९५ ॥

द्व्यङ्गुलं हनुचक्रं स्याद् ग्रीवासन्धिस्तु मात्रया।
एका भागान्तरा कार्या ब्रह्मसूत्रानुसारतः ॥ ९६ ॥

घट्टिते ब्रह्मसूत्रेण सूनरोहितचूच्यते(?)।
मूलमग्रं च लिङ्गस्य भवेत् सूत्रेण घट्टितम् ॥ ९७ ॥

पक्षसूत्रस्य कूर्चस्य मध्यं द्व्यङ्गुलसंयुतम्।
अन्यस्य पक्षसूत्रस्य फलकं गोलगाधिकम्(?) ॥ ९८ ॥

कलया बाहुमूलं स्यात् फलकं द्व्यङ्गुलं ततः।
भुजमध्यप्रदेशे तु दशपञ्चनवाधिकम् ॥ ९९ ॥

अर्धाङ्गुलाधिकं कार्यं तत्फलं तु विचक्षणैः।
यवमात्रात् क्रमाद्धीना रेखा बाह्ये तु बाह्यगा ॥ १०० ॥

यावत् कूर्परगस्थानं तत्र सूत्रेण घट्टितम्।
कूर्परान्निर्गता काञ्ची जघनस्फिक्तटं तथा ॥ १०१ ॥

काञ्ची द्व्यङ्गुलतः कार्या त्र्यङ्गुलं वस्तिमस्तकम्।
वस्तिस्तु तीव्रदेशः स्याच्चतुर्भिर्निर्गतोऽङ्गुलैः ॥ १०२ ॥

स्फिजोर्मण्डलभागस्तु क्रमशो यवहीनकः।
स्फिजो बुध्नप्रदेशस्तु सूत्रस्याङ्गुलतोऽधिकः ॥ १०३ ॥
ऊरोर्बाह्यगता रेखा क्रमशः परिहीयते।
घट्टिता जानुसन्धौ तु जङ्घा स्याद् द्व्यङ्गुलाधिका ॥ १०४ ॥
अधिकैस्तत्क्रमः + + कथितः सूक्ष्मयुग्मके।
आकारं लक्षणं प्रोक्तं प्रमाणेन यथाक्रमम् ॥ १०५ ॥
अर्धमङ्गं प्रदर्श्यं स्याच्छेषं भित्तिगतं भवेत्।
चतुष्प्रकारभिन्नानां स्थानानां वच्मि लक्षणम् ॥ १०६ ॥
परावर्तगतानां वै सूत्रमानादि सर्वतः।
ऋजुकेऽर्धर्जुके साचीस्थाने द्व्यर्धाक्षिसंज्ञके ॥ १०७ ॥
यथा तथा लक्षणं स्यादियमेव भिदात्र तु।
पुरोभागं भित्तिगतं पृष्ठं दृश्यं भवेदिति ॥ १०८ ॥
एतेषां मिश्रभावानां स्थानानि स्युरनेकधा।
ऋजुस्थानमुखं यत्र तत्रान्यत् कण्ठतोऽप्यधः ॥ १०९ ॥
तत्रापि कट्यधस्त्वन्यदिति सङ्करपद्धतिः।
एवं स्वस्वोचितं स्थानं मनसा निश्चित्य बुद्धिमान् ॥
लिखेच्चित्रगतं भावं तथा व्यापारमेव च।
अथ वर्णानि विन्यस्य तत्र तत्रोचितक्रमात् ॥ १११ ॥
लेखिन्या स्थूलया मन्दं निष्कलङ्कं महामतिः।
तत्र निम्नोन्नतादीनि विशेषाणि समाचरेत् ॥ ११२ ॥
श्यामोज्ज्वलत्वभेदौ च तथा पारुष्यमार्दवान्।
विन्यासक्रमभेदौ च कुर्यात् सर्वमनोहरम् ॥ ११३ ॥

तत्तद्वर्णस्य विन्यासे श्यामता स्थूलतैव हि ।
योज्या त+लता तद्वत् क्वचिद् वर्णान्तरैः स्मृता ॥ ११४ ॥
वतोज्ज्वले(?) पीतवर्णे श्यामस्तत्रापि लोहितः ।
प्रान्ते कज्जलवर्णेन सूक्ष्मया संलिखेत् सुधीः ॥ ११५ ॥
क्षुरेण शितधारेण तत्कर्मपदमञ्जसा ।
संमृजेत्तु खरादीनि चित्रमेवं समाचरेत् ॥ ११६ ॥
अथवान्यप्रकारेण वर्णयोगः प्रकीर्त्यते ।
मृदुरक्ते तु सिन्दूरं गैरिकं मध्यरक्तके ॥ ११७ ॥
अतिरक्ते तु संयोज्यं वर्णे लाक्षारसं विदुः ।
मनश्शिला पीतवर्णे ततोऽन्यत् पूर्वमुक्तवत् ॥ ११८ ॥
गैरिकं तु शिलापृष्ठे दिनमेकं सुपेषयेत् ।
तत् कोषितं शुद्धतोयैः संग्रहेन्मुद्गरादिषु ॥ ११९ ॥
दिनार्धं पेषयेत् तद्वत् सिन्दूरं जलमिश्रितम् ।
निर्जलं चूर्णयेत् तत्र पेषण्यां तु मनश्शिलाम् ॥ १२० ॥
दिनपञ्चकमात्रं तं पुनस्तोयविमिश्रकम् ।
दिनमेकं पेषयित्वा सम्यक् पात्रेषु संग्रहेत् ॥ १२१ ॥
एतेषां निम्बनिर्यासतोयं संयोज्य युक्तितः ।
सम्मर्द्य लेपलिखनप्रक्रियाश्च समाचरेत् ॥ १२२ ॥
अथ स्वर्णं पेषणार्थं पत्रीकृत्य यथा मृदु ।
तत्पत्रं शकलीकृत्य सूक्ष्मात् सूक्ष्मतरं पुनः ॥ १२३ ॥
किञ्चित्सिकतसंमिश्रं शुद्धतोयविमिश्रितम् ।
पेषयेत् पेषणीश्वभ्रे सुश्लक्ष्णदृषदा सुधीः ॥ १२४ ॥

जाते सुपिष्टे तत्पिष्टे काचपात्रे जलैः सह ।
आलोड्योर्ध्वगतं पङ्कं सिकतां च पुनः पुनः ॥ १२५ ॥
सन्त्यज्य जातं स्वर्णस्य पङ्कमत्युज्ज्वलं बुधः ।
युक्तितो वज्रलेपेन सह + + + + + तः ॥ १२६ ॥
तत्तदुचितलेखिन्या विशेषज्ञो लिखेदिदम् ।
वराहदंष्ट्रमुख्येन शुष्के तस्मिन् पुनः पुनः ॥ १२७ ॥
यावदस्य प्रभा जाता तावन्मन्दं विघट्टयेत् ।
अथवा वज्रलेपेन स्वर्णस्थानं विलेखयेत् ॥ १२८ ॥
विन्यसेत् तत्र तत्राशु यथायुक्ति विदारितान् ।
अतीव मृदुलान् स्वर्णपट्टानतिदृढैः पुनः ॥ १२९ ॥
कार्पासपुञ्जैः संमार्ज्य प्रकाशीक्रियतामिदम् ।
एवं पूर्वैः स्वर्णलेपविधिरुक्तो द्विधा बुधैः ॥ १३० ॥
माहिषत्वचमादाय नवां तोयेन पाचयेत् ।
नवनीतमिवायाति गालयित्वा यदा तदा ॥ १३१ ॥
गुलिकाश्च ततः कार्या याः शुष्काश्च महातपे ।
वज्रलेपमिदं ख्यातं चित्रकारसुखावहम् ॥ १३२ ॥
क्षिप्त्वोष्णतोये विद्राव्य तत्तद्वर्णेषु युक्तितः ।
कपित्थनिम्बनिर्यासतोयस्थानेऽपि योजयेत् ॥ १३३ ॥
अन्योन्ययोगात् संजातवर्णभेदोऽथ कथ्यते ।
सितं रक्तेन संयुक्तं गौरच्छवि हि दृश्यते ॥ १३४ ॥
श्वेतं कृष्णं च पीतं च समभागविमिश्रितम् ।
शारच्छवीति विख्यातं वर्णकारसुखप्रदम् ॥ १३५ ॥

श्वेतं कृष्णं समं मिश्रं गजवर्णमुदाहृतम्।
रक्तं पीतं समं मिश्रं बकुलस्य फलाकृति ॥ १३६ ॥
ज्वलनाभमिदं ख्यातमग्निवर्णनिभं परम्।
पीतस्य द्विगुणं रक्तं मिश्रितं त्वतिरक्तकम् ॥ १३७ ॥
श्वेतस्य द्विगुणं पीतं मिश्रं ख्यातं तु पिङ्गलम्।
कृष्णस्य द्विगुणं पीतं मिश्रितं त्वम्बुसम्मितम् ॥ १३८ ॥
तदेव नृणां वर्णः स्यात् कृष्णं पीतसमं तु वा।
हरितालं श्यामयुतं शुकपक्षनिभं भवेत् ॥ १३९ ॥
लाक्षारसेन संयुक्तं हिङ्गुदं त्वतिरक्तकम्।
लाक्षारसेन संमिश्रं कृष्णं जम्बुफलाकृति ॥ १४० ॥
लाक्षारसं जातिलिङ्गं सितवर्णं यथा समम्।
सम्मिश्रमुत्तमं वर्णं हिङ्गुदेनात्र वा युतम् ॥ १४१ ॥
कृष्णं नीलेन सम्मिश्रं केशवर्णमुदाहृतम्।
एवं मिश्रकवर्णानि युक्त्या संयोज्य संलिखेत् ॥ १४२ ॥
सुधाधवलिते भित्तौ नैव कुर्यादिदं सुधीः।
रसचित्रं तथा धूलीचित्रं चित्रमिति त्रिधा ॥ १४३ ॥
एतान्यनलवर्णानि चूर्णयित्वा पृथक् पृथक्।
एतैश्चूर्णैः स्थण्डिले रम्ये क्षणिकानि विलेपयेत् ॥ १४४ ॥
धूलीचित्रमिदं ख्यातं चित्रकारैः पुरातनैः
सादृश्यं दृश्यते यत्तु दर्पणे प्रतिबिम्बवत् ॥ १४५ ॥
तच्चित्रमिति विख्यातं नालमाकारमात्रकम्।
शृङ्गारादिरसो यत्र दर्शनादेव गम्यते ॥ १४६ ॥

+ + + +